नं. — ४९८९

नाम. बृहत् संहिता विवृतिः

कर्ता श्री वराह मिहिरः

पत्र. सं. ८० — दं. ×

विषय: ज्योतिषम्.

बृहत्

वराहसंहिताविवृतिः

४९७९

4979

starting from 83 to 339.

1 to 82, 88 to 91, 114 to 115, 119 to 131
and 137 to 146, 149 to 174, 181 to 232, 235 to 240,
and 256 to 259, 265 to 267, 273 to 328
MISSING

F. = 81

तद्विज्ञानं तस्य ग्रहयुद्धस्य विज्ञानं यथा ज्ञायते तथा मया करणे पंचसिद्धांतिकायां सिद्धमिद्धांते तद्विज्ञानं कृतमिति केचित्सूर्यसिद्धांतादिति पठंति।
सूर्यसिद्धांतानुगणावत्सरविप्रणीतात्सिद्धांतोदयकृतमिति ॥ ॥ अथ युद्धकारणमाह ॥ वियति चरतां ग्रहाणामुपर्युपर्यात्ममार्गसंस्थानमूर्ध्व
अतिदूराद्दृग्विषये समतामिव संप्रयातानाम् ॥ आसन्नक्रमयोगाद्भेदोल्लेखांशुमर्दनासव्यैः युद्धं चतुष्प्रकारं पराशराद्यैर्मुनिभिरुक्तम् ॥ ग्रहाणां भौ
मादीनां वियत्याकाशे चरतां गच्छतामुपर्युपरि ऊर्ध्वाधःस्थितया आत्ममार्गस्थवर्त्मनि प्रतिमंडलवशेन संस्थानां दृग्विषये दृष्टिगोचरे अतिदूरादत्यंतवि
प्रकृष्टत्वात्समतां तुल्यतामिव संप्रयातानां प्राप्तवतां आसन्नक्रमयोगादासन्नः अतिनिकटः क्रमोनुपरिपाटिः आसन्नक्रमाद्यो योगस्तस्माद्युद्धं भ
वति। तच्च युद्धं पराशराद्यैर्मुनिभिः पराशरगर्गकाश्यपवज्रादिभिश्चतुष्प्रकारं चतुर्विधमुक्तम् केः भेदोल्लेखांशुमर्दनासव्यैः भेदोल्लेख
नांशुमर्दनैर्नासव्येन यच्च ग्रहयुद्धमपेकृद्दुवल्लक्ष्यते। स भेदः अधःस्थेनोर्ध्वस्थेन चाच्छाद्यते इति यावत्। यच्च ग्रहस्य ग्रहेण सह समाविधिः संसर्गः क्रि
यते। स उल्लेखः अंशवो रश्मयः तेषां अंशूनां परस्परं रश्मयः संयुक्ताः विकृतस्य ग्रहस्य मानादुवलक्ष्यंते तदंशुमर्दनम् ॥ अपसव्योप्रदक्षिण उच्यते।
समत्वाद्वा दक्षिणेन तावस्थानं अपसव्यमुच्यते। आचार्येण चंद्रग्रहसमागमे अपसव्यलक्षणं कृतम् शशिनः फलमुदक्संस्थे यद्ग्रहस्योपदिष्टं
भवति तदपसव्यमेव मेव प्रतीपमिति एतदुक्तं भवति। ग्रहस्योत्तरदिक्संस्थे शशिनि यत्फलमपसव्ये दक्षिणदिक्संस्थे तदेव फलं विपरीतं ॥ ॥
अमुमेवार्थं ऋषिपुत्र आह ॥ दक्षिणेनापसव्यः स्यादुत्तरेणाप्रदक्षिणम् ग्रहाणां च समे ज्ञेयो चंद्रो नारागयदा शशी ॥ प्रदक्षिणता चाच्चद्दं
गर्ग आह ॥ ग्रहाणां विज्ञेयं भंगेन नक्षत्राणां च तं श्रये कथं प्रद (सर्वेषां सामान्यमपसव्यते) क्षिणं ज्ञेयमपसव्यं तथैव च। नक्षत्राणां ग्रहाणां वा यदा तत्तरगः शशी।
स्वोल्लेखाश्चांशुमर्दनं चामध्यं च भेदोल्लेखांशुमर्दनासव्यास्ते चतुर्भिर्गतिविशेषैः ग्रहाणां चतुष्प्रकारमेव युद्धं पराशराद्यैर्मुनिभिरुक्तं पराशरग तन्प्रदक्षिणमित्या
र्गकाश्यपवज्रवसिष्ठैरभिहितम्। पराशराद्यैरित्यनेन मुनीनां वचनभेदं प्रदर्शयति। यथा ऋषिपुत्रादिभिर्ग्रहयुद्धं पंचदशप्रकारमुक्तं परा हुर्भवेद्दक्षिणेसुव
शरादीनामेव यन्मतं तच्चाचार्यस्यापि स्वसिद्धांते येन स्थानैः स्थाने बाह ॥ गर्गवसिष्ठपराशरमतमेतदिति ॥ ततश्च पराशरः ॥ नक्षत्राभेदं समरा छ्ये। नक्षत्रस्य ग
हाणां वा यदा दक्षि
णेनोक्तेन

अधःस्थेनोर्ध्वस्थाच्छाद
तेन्यत्वादर्शे

तथाचगर्गः ॥ क्रादनंरोदनंचैवरश्मि

८५ तद्यथाभेदंसमारोहणमुल्लेखनंरश्मिसंसर्गश्चेति। ग्रहयुद्धंचतुर्विधमाचक्ष्यतेकुशलाः तेषांपूर्वान्पूर्वोगरीयान् ॥ तथाचगर्गः ॥ क्रादनंरोदनंचैवरश्मि
मर्दंतथैवच। अपसव्यंग्रहाणांचचतुर्धायुद्धमुच्यते ॥ तथाचकाश्यपः ॥ सर्वग्रहेभ्यः शीघ्रेंदुस्तत्तस्यैवचात्मजः भार्गवोरविभौमौचजीवोमंदः शनैः
चरः ॥ शीघ्रगामंदगाश्चैते कालेत्विकर्द्धगामिनः ततोयोगोभवेदेषांवक्तोरांविकमाश्रिताः उपर्युपरिसंस्थानेदृश्यंतेयुगपत्स्थिताः भेदोल्लेखांशुमर्दाश्च
चापसव्यस्तथापरः चतुष्प्रकारःसंयोगोयुद्धेतुदिविचारिणामिति॥ एवमन्योन्यापेक्षयापसव्यमुच्यते ॥ अथचतुष्प्रकारस्ययुद्धस्यप्रत्येकंफल
चतुष्टयमाह ॥ भेदेवृष्टिविनाशोभेदःसुहृदांमहाकुलानांच। उल्लेखेशस्त्रभयंमंत्रिविरोधःप्रियान्नत्वं ॥ अंशुनिरोधेयुद्धानिक्ष्टतांशस्त्रत
चतुष्टयमाह ॥ भेदेवृष्टिविनाशोभेदःसुहृदांमहाकुलानांच। उल्लेखेशस्त्रभयंमंत्रिविरोधःप्रियान्नत्वं ॥ अंशुनिरोधेयुद्धानिक्षितांशस्त्रत
क्रुदु ^^ क्रोदविमर्दाः युद्धेचाप्यपसव्येभवंतियुद्धानिभूपानाम् ॥ भेदसंज्ञितेयुद्धेवृष्टिविनाशोवर्षणांतेसुहृदांमित्राणांमहाकुलानांचप्रधानानांचपर
स्परंभेदोभवति ॥ उल्लेखेउल्लेखसंज्ञितेयुद्धेशस्त्रभयंशस्त्राद्भयं। मंत्रिविरोधःसचिवविग्रहःप्रियान्नत्वंदुर्भिक्षंभयमित्यर्थः अंशुविरोधसंज्ञि
तेयुद्धेभूस्तांराज्ञांयुद्धानिभवंति। तथाशस्त्रेणक्रोदविमर्दाः अवमर्दःशब्दंप्रत्येकमभिसंबध्यते। शस्त्रेणकुभिक्षक्रुध्(अ)वावमर्दाभवंतिएतैर्जना
उपतापंतेअवमर्दमतीवपीडामित्यर्थः युद्धेचाप्यपसव्यइतिनकेवलमंशुविरोधेयुद्धानिभूस्तांभवंति। यावदपसव्येनग्रहयुद्धेभूपानांयुद्धान्ये
वभवंतिनात्रपसव्यसंज्ञितंयुद्धंतदतिरिच्यतेयस्माद्भेदोल्लेखयोःयदन्यत्तदंशुमर्दनम् भेदोल्लेखांशुमर्दनान्येवत्रयोगतिविशेषात्अवगम्यंतेतस्मा
त्रयएवयुद्धभेदावक्तव्याःइत्यत्रोच्यते। ग्रहाश्चेत्यदक्षिणादिक्स्थिततापरुषताकंपनंविवर्णताविकृततात्र्यधिरूढतास्वदृश्यताप्रातिनिष्टत्वमिति ८५
पराभवलिंगानिउत्तरदिक्स्थिततास्निग्धतावैपुल्यादीविजयलिंगानिदक्षिणादिक्स्थितोपियदावैपुल्यास्निग्धतादिभिर्विजयलिंगैर्युक्तोभवति
तदासजेताकल्प्यतेयदादक्षिणादिक्स्थोजेताभवतितदाकिमुत्तरदिक्स्थितेग्रहेजेतारलंस्फुटोद्रहस्पातिजितोयदानष्टोविनाशमुपयातीत्येवमा
दिकंनदेवफलंउत्तवंइग्रहसमागमोत्केनराशिनिफलमुदक्स्थेयङ्गुरस्मौम्यंभवतितदपसव्येसर्वमेवप्रतीपं। यस्ययेनार्थसंबंधोहरस्पापित
स्यतदित्यनेनन्या(य्)येनफलंवैपरीत्येकल्प्यतइ ड्यापसव्यासंस्थानेवाग्रहाणांयुद्धस्यापसव्यसंज्ञितस्यफलंकल्प्यतइति, आचार्यार्यभट्टेनचाक्रदक्षिणा
दिकंनदेवफलंउत्तवंइग्रहसमागमोक्तेनराशिनिफलमुदक्स्थेयङ्गुरस्मौम्यंभवतितदपसव्येसर्वमेवप्रतीपं। परोत्तरानुक्रमेणग्रहयुद्धग्रहाणांपरिभ्रमोयः ॥
पदि २ पत्र २ ज्ञित
१ + ति। आचार्यार्यभट्टोपनिब

इमेक दिशि व ५।

~~किमोच~~ः सोपसव्यमाह ॥ —— देवाः पश्यंति भूगोलार्धमुदक्संस्थिताः सव्यम् अपसव्यं तथार्धं दक्षिणं वडवामुखे प्रेता इति ॥ एतैरनेका
कारैराचार्याणां दर्शनैर्मंदधियां शिष्याणां विलीभूतचित्तानां विकल्पितं विकल्पानां शान्त्या आचार्येणेदमपसव्यसंज्ञितं चतुर्थं युद्धभेदं कल्पयित्वा
फलमुक्तं। पराशरादिभिर्बहुभिः कृतं न त्वमनीषिकवाय यथा यदेवोत्तरे व्यवस्थिते ग्रहे जेतरि फलं दक्षिणादिक्स्थिते अपसव्यसंज्ञिते ग्रहे जेतरि तदेव फलं
किमत्राप्येवं मन्यसे। यथा सव्यापसव्यमाचार्येण नियमेनैवाभिहितम्॥ तथाचाह॥ गंधर्वनगरमुत्थितं तत्पांडुरमशनिपातवातकम्। दीप्तेनेंद्रदृष्ट
सुवामेरिभयं जयः सव्ये॥ वामपार्श्वस्थे अरिभयं जयः सव्ये लोके च वामपार्श्वं यत्सव्यमुच्यते॥ तथा च भगवान्व्यास आह॥ युध्यतः प्राङ्मुखस्याग्र
सुपर्णो यं समायतः अपसव्येन पक्षान्वा थामे दक्षिणे भवान्॥ तथा च बादरायणः॥ तत्रापि हि बेर्म्नयनं दक्षिणमर्कः शशी सव्यम् वामेरिभयं जयस्सो
मोद्भूत्यस्यान्य एवार्थः स उच्यते। क्षितिस्थानमन्यथा सव्यापसव्यं ग्रहर्क्षाणामन्यथा प्राचीदिशं गच्छतां पिपासूनां उत्तरदिक्स्थः शकुनः प्राचीं दिशमासा
दयन् दक्षिणां पर्येति यः सं प्रदक्षिण उच्यते सव्यः च प्रदक्षिणम् सव्यापसव्ययोरभेद एवाचार्य आह। ऐंद्रानलादिशोर्मध्ये त्रिभागे पुष्यवस्थिताः कोशा
ध्यक्षानलाजीवितपोषुक्तः प्रदक्षिणमित्यादि॥ आचार्यार्यभट्टेन सव्यापसव्यं भागतानामुक्तमतः कस्माद्ग्रहर्क्षाणामुक्तमप्युच्यते मेघमूलनिवा
सीनि यानि सत्त्वानि तानि मिथुनांतमर्कं ध्यक्षितिजलेखास्तत्रमेव पश्यंति तथैव वडवामुखनिवासीनि॥ अत्रोक्तमेवाचार्येण॥ यस्मात्त्रं भूष्टता
न्द्याणद्वयेनोन्नतिं व्रजत्यर्कः तस्मात्तांतरचारिणममराः पश्यंति नोर्ध्वमधः तस्मात् क्षितिजलेखामनुष्यवत्सर एवांगीकृत्याचार्यार्यभट्टेनोक्तम्। सर्वमेव
शकुनादयो यातुर्वामपार्श्वादग्रत आगत्य दक्षिणपार्श्वेन क्रामंति यत्तत्प्रदक्षिणं सव्यं च एतद्विपरीतं दक्षिणपार्श्वाद्वामपार्श्वगमनं यत्तदपसव्यम्
वामेरिभयं जयः सव्ये तदुक्तं प्रदक्षिणेन जयम्। आचार्येणेदं प्रदर्शितमेव प्रदक्षिणं तु यो यात्रायां जयदं नेष्टमन्यथेति मप्याद्यदव्यतद्वामं विपरी
तम्। वामेरिभयमिति ग्रहाणां सव्यापसव्यता उत्तरदिक्स्थः प्रदक्षिणो दक्षिणादिक्स्थो जेता यदा तदा तदपसव्यमिति नन्विदं तत्कथमवगम्यते इदम
त्रोच्यते उक्तमेवेदं यतोऽनुलोमेन भागत्याभेदेन ग्रहाणां फलं प्रतिभेदान्न प्रदर्शितं तत्रैकमेव फलं तथा चानुलोमगः प्रतिलोमगो वा दक्षिणो

नरेणावोल्लेखं करोति। तत्राप्येकमेव फलं तथांशविमर्दस्याप्यनुलोमेन प्रतिलोमेनापि फलस्याभेदः एवं संस्थानत्रयं चैतत् यदंशुमर्दनस्य फलं अपसव्य
संज्ञितस्य तदेव फलम्। एतदुक्तं भवति यस्य ग्रहस्योत्तरदिक्स्थस्य यत्फलमभिहितं तस्य ग्रहस्य दक्षिणादिक्स्थस्यापसव्यसंज्ञितस्य जयसंयुक्तस्य तदे
व फलम्। तस्मादपसव्यनिर्देशो यः स नातिरिच्यत इति ॥ अधुना ग्रहाणां यानि नागराक्रंदसंज्ञामाह ॥ रविराक्रंदो मध्ये पौरः परे परे स्थितो या
यी। पौरा बुधगुरुरविजा नित्यं शीतांशुराक्रंदः॥ केतुकुजराहुशुक्रा यायिन एते ग्रहा घ्नंति। आक्रंदयायिपौरांञ्जयिनो जदाः स्ववर्गस्य ॥ रविः
सूर्यो मध्ये मध्याह्नकाले आक्रंदसंज्ञो भवति। याताः पश्चिमात्स्थिताः पापा ग्रहाः तस्य पश्चात्स्थितः आक्रंदः पौराः स एव हि पूर्वे पूर्वाह्णे दिनस्य प्रथमस्य
त्रिभागे रविः पौरो नागरो भवति। अपरे रपराह्णे दिनस्य पश्चिमत्रिभागे यायी भवति। यायी यो यात्याक्रम्य आगतो याति बुधगुरुरविजः सौम्यो जीव
सौरा नित्यं सर्वकालं पौराः नगराः शीतांशुः चंद्रः सर्वकालमाक्रंदः केतुकुजशुक्रा यायिनः केतुः शिखी कुजोंगारकः राहुः सैंहिकेयः शुक्रो
भार्गवः एते ग्रहा यायिनः एत एव हता घ्नंति। आक्रंदयायिपौरान् आक्रंदयायिपौराः ग्रहाः हताः पराजिताः आक्रंदयायिपौरान् नृपान् घ्नंति नाश
यंति। एत एव जयिनः स्ववर्गस्यात्मीयवर्गस्य जयदा भवंति॥ अत्रैव विशेषमाह ॥ ॥ पौरे पौरेण हते पौराः पौरान्नृपान्विनिघ्नंति। एवं यायाक्रंद
नागरयोर्द्विग्रहाश्चैव ॥ पौरेण नागरेण ग्रहेण पौरे ग्रहे हते विजिते सति पौरान्नृपाः पौरान्नवनृपान्विनिघ्नंति नाशयंति एवमनेनैव प्रकारेण या
याक्रंदाः परस्परं विनिघ्नंति नागरयायिग्रहाश्चैवमपि जिताः परस्परं विनिघ्नंति॥ तथा च पराशरः तेषां तज्जयाद्द्विजयो वधाद्वधोऽन्योन्यभेदाद्भेदैः
समानामयम् ॥ अथ जितलक्षणमाह ॥ दक्षिणदिक्स्थः पुरुषो वेपथुरप्राप्य सन्निवृत्तोऽणुः अधिरूढो विकृतो निष्प्रभो विवर्णश्च यः स जि
तः ॥ यो ग्रहो दक्षिणदिक्स्थो याम्याशास्थः पुरुषो रूक्षो निःस्नेहो वेपथुः सकंपः अन्यं ग्रहमप्राप्य सन्निवृत्तो निवर्तितः विपरीतां गतिमापन्नः अ
णुः स्वल्पः अधिरूढोऽन्येनाक्रांतः विकृतो विकारं गतः निष्प्रभो दीप्तिरहितः विवर्णो विगतवर्णः स जित इति॥ तथा च पराशरः॥ दशभिर्लक्ष
णैर्ग्रहं जितं विद्यात् विवर्णः परुषो रूक्षो याम्याशामार्गस्थो निरुद्धो निष्प्रभो विहतो जवाभिहतो प्राप्यानिवृत्तो वेपनश्चान्यथा विजयी॥ तथा च गर्गः

अरश्मिर्लोहितः श्यामः परुषः स्तब्ध एव च । अपसव्यगतो यश्च वक्रान्तः पतितस्तथा । च्युतस्थानाद्गतो यश्च प्रतिस्तब्धस्तथैव च । निष्प्रभो विहतश्चापि जवेनाति
हतश्च यः अप्राप्य वारिष्टोनावो ऊर्ध्वपतः क्षमस्त एव च । लक्षणैः सप्तदशभिः ग्रहं विद्यात्पराजितम् ॥ ॥ अथ जयिनो लक्षणमाह ॥ ॥ उक्तविपरीतलक्षणसंप
न्नो जयगतो विनिर्देश्यः विपुलः स्निग्धो द्युतिमान्दक्षिणदिक्स्थो विजययुक्तः ॥ दक्षिणदिक्स्थः पुरुषद्युत्यादिना ग्रंथेन यल्लक्षणमुक्तं तस्माद्विपरीतलक्ष
णसंपन्नः तद्यथोत्तरदिक्स्थः अवेपथुः सव्यकपागतो विपुलः उपरिस्थितः अविहतस्तेजस्वी स जययुक्त इति ॥ तथा च गर्गः ॥ द्युतिमान् रश्मिसंपन्नः प्रसन्नो
रजतप्रभः बृहद्वपुधरः चैव यः स मे व्य ग्रहो भवेत् ॥ प्रभावर्णाधिको यश्च ग्रहमाहत्य तिष्ठति । तादृशं जयिनं विद्याद्ग्रहं ग्रहसमागमे । एवंविधो ग्रहो जयगतो
विनिर्देशो वक्तव्यः । तथा यो विपुलो बिंबः स्निग्धो निर्मलो द्युतिमान् कांतियुक्तः स दक्षिणस्यां दिशि स्थितोपि जययुक्त इत्येतत् शुक्रस्य प्रायः संभवति । तथा च
पुलिशाचार्यः । सर्वे जयिन उदक्स्था दक्षिणादिक्स्थो जयी शुक्र इति ॥ ॥ अथ यदत्राह ॥ ॥ द्वावपि मयूखयुक्तौ विपुलौ स्निग्धौ समागमे भवतः तत्रान्यो
न्यं प्रीतिर्विपरीतावात्मपक्षघ्नौ ॥ द्वावपि ग्रहौ मयूखयुक्तौ रश्मिजालेन महता संयुक्तौ विपुलौ विस्तीर्णौ स्निग्धौ निर्मलौ यदि समागमे संयोगे भवतः तत्र त
स्मिन्समागमे अन्योन्यं परस्परं प्रीतिस्तौ ग्रहौ येषां मुक्तौ रविराज्ञो देशमध्य इत्यनेन तेषां प्रतिर्माचीभवति तावेव ग्रहौ विपरीतौ रश्मिरहितावल्पौ रूक्षौ यदि समागमे
भवतः तदात्मीयपक्षघ्नौ स्वस्वपक्षघ्नतः ॥ अत्रापि विशेषमाह ॥ युद्धं समागमो वा यद्यव्यक्तौ स्वलक्षणैर्भवतः भुविष्टतामपि तथा फलमव्यक्तम्
निर्देश्यम् ॥ युद्धांतरात् ग्रहाणां भौमादीनां परस्परं समागम एषामेव चंद्र समामाह । युद्धं समागमो वा यदि लक्षणैः युद्धसमागमोक्तैरव्यक्तावल्
पौ भवतः युद्धमात्रं जयपराजयरहितमित्यर्थः यथा द्वावपि मयूखयुक्तौ विपुलौ स्निग्धौ विपरीतलक्षणौ स्थितौ वा न तेन ज्ञायते को जितः कश्च जयी
समागमः ग्रहाणां चंद्रे ग्रहयुत्तरगते दक्षिणादिग्गते वा यत्कुभाशुभफलमुक्तं तत्र यद्यव्यक्तः समागमो भवति । एतदुक्तं भवति । ग्रहाश्चंद्रेणोत्तरेण न च दक्षि
णेन वा याति मध्येनागमनं करोति तदा तत्र भेदफलं वक्तव्यं न समागमोक्तं फलम् तदव्यक्तसमागमस्य तथा तेनैव प्रकारेण च भुविष्टमोष्टतां राज्ञामव्यक्त
मलक्षमेवं फलं विनिर्देश्यं वक्तव्यम् जये सत्यव्यक्तो जयश्चादेश्यः पराजये पराजयः एवं चंद्रस्योत्तरगमनेन शुभं फलं वक्तव्यम् दक्षिणेनाशुभं मध्येन
मध्यमिति ॥ ॥ अथ भौमस्य सर्वग्रहविजितस्य फलमाह ॥ ॥ गुणानि तते वनिस्तुते वाह्लीका यायिनो निर्वार्ताश्च । शशिजो न श्रूरसेनाः क

लिंगसाल्वाः चपीड्यंते ॥ सौरेणारे विजिते जयंति पौराः प्रजाश्च क्षीदंति । कोष्ठागारम्लेच्छक्षत्रियतापश्च शुक्रजिते । अवनिसुतेंगारके गुरुणा बृह-
स्पतिना जिते पराभूते । वह्लीकाः जनायायिनो जिगमिषवः अग्निवार्त्ताः सुवर्णाकारश्च शूद्रनयः एते पीड्यंते उपताप्यंते । शशिजेन बुधेन जितो भौमः शू-
रसेनाः जनाः कलिंगाः साल्वाः चपीड्यंते । सौरेण शनैश्चरेणारे अंगारके जिते पौरा नगरा जयंति विजयं प्राप्नुवंति । प्रजाः च सीदं अवसादं यांति । शुक्र-
जिते भौमे कोष्ठागाराणामवल्लेश्च ग्रामाणां म्लेच्छानां क्षत्रियाणां च तापः संतापो भवति पीडा भवतीत्यर्थः ॥ ॥ अथ बुधस्य सर्वग्रहजितस्य फलमा-
ह ॥ भौमेन हते शशिजे वृक्षसरितापसाश्मकनरेन्द्राः उत्तरादिक्स्थाः क्रतुदीक्षिताश्च संतापमायांति ॥ गुरुणा जिते म्लेच्छशूद्रचौरार्थयु-
क्तपौरजनाः त्रैगर्त्तपार्वतीयाः पीड्यंते कंपते च मही । रविजेन बुधे नांगारिके न हते वृक्षास्तरवः सरितो नद्यः तपसाः तापसिकाः जनाः अश्मकः पर्व-
तवासिनः नरेंद्रा राजानः उत्तरदिक्स्थाः सौम्याः शागनिवासिनो जनाः क्रतुदीक्षिताः सत्याज्ञयाजिनः एते सर्व एव संतापं पीडामायांति गुरुणा बृहस्पतिना
राजिते बुधे म्लेच्छजनाः शूद्राः शूद्रजातयः चौराः तस्कराः अर्थयुक्ताः सधनाः पौरजनः पुरवासिनः त्रैगर्त्ता जनाः पार्वतीयाः पर्वतवासिनः एते सर्वे एव
पीड्यंते उपताप्यंते । मही भूः कंपते चलति रविजेन शनैश्चरेण बुधे ध्वस्थे विजिते नाविकाः कैवर्त्ताः योधाः शस्त्रवृत्तयः अब्जाः जलजाः सधनाढ्येश्वराः
गर्भिण्यः सगर्भाः स्त्रियः एते सर्व एव पीड्यंते । भृगुणा शुक्रेण विजिते बुधे अग्निकोपो वह्निप्रकोपः सस्यानां धान्यानामंबुदानां च मेघानां वायिनायि-
यास्तनां च ध्वंसो विनाशो भवति ॥ अथ जीवस्य सर्वग्रहविजितस्य फलमाह ॥ जीवे शुक्राभिहते कुलूतगांधारकैकयामद्राः साल्ववत्सा
वंगा वा गाः सस्यानि च निहंति भौमेन हते जीवे मध्यादेशो नरेश्वरा गावः सौरेणार्जुनायनवसाति यौधेयशिविविप्राः ॥ शशितनयेनापि जिते (
बृहस्पतौ म्लेच्छशस्त्रभृतः उपयांति मध्यदेशश्च संक्षयं यच्च भक्तिफलम् ॥ जीवे बृहस्पतौ शुक्राभिहते कुलूता जनाः गांधाराः कैकयाः मद्राः
साल्वाः वत्साः वंगाः गावो धेनवः सस्यानि धान्यानि च निहंति । भौमेनांगारकेन हते जीवे अर्जुनायना जनाः वसातयः यौधेयाः शिवयः विप्राः
ब्राह्मणाः एते सर्व एव पीड्यंते शशितनयेन बुधेनापि जिते बृहस्पतौ अपिशब्दश्चार्थे । म्लेच्छजनाः सात्यभृतः सत्यवादिनः शस्त्रभृतः शस्त्रवृत्तयः
मध्यदेशश्च एते सर्व एव संक्षयं विनाशं यांति । अन्यच्च गुरुभक्तिफलं यत्प्रागुक्तं तच्च सर्वं संक्षयं यांति ॥ ॥ अथ शुक्रस्य सर्वग्रहविजितस्य

फलमाह ॥ ॥ शुक्रे बृहस्पतिजिते यायी श्रेष्ठो विनाशमुपयाति। ब्रह्मक्षत्रविरोधः सलिलं च न वासवस्त्यजति ॥ कोसलकलिंगवंगा वत्सा मत्स्याश्च
मध्यदेशयुताः महतीं व्रजन्ति पीडां नपुंसकाः शूरसेनाश्च ॥ कुजविजिते भृगुतनये बलमुख्यवधो नरेन्द्रसंग्रामाः। सौम्येन पार्वतीयाः क्षीरविनाशोऽल्पवृ
ष्टिश्च ॥ रविजेन सिते विजिते गणमुख्याः शस्त्रजीविनाः क्षत्रम्‌ जलजाश्च निपीड्यन्ते सामान्यं भक्तिफलमन्यत् ॥ बृहस्पतिजिते शुक्रे यायी नायकः
श्रेष्ठः प्रधानो विनाशं क्षयं याति मुपयाति प्राप्नोति। तथा ब्रह्मक्षत्रस्य ब्रह्मणानां क्षत्रियाणां च विरोध उपद्रवः वासव इन्द्रः सलिलं जलं च त्यजति न वर्ष
तीत्यर्थः तथा कोसलाः जनाः कलिंगाः वंगाः वात्स्याः मत्स्याश्च एते एवं मध्यदेशयुता मध्यदेशेन समन्विता महतीं पीडां व्रजन्ति प्राप्नुवन्ति। तथा नपुंसका
क्लीवाः शूरसेनाश्च जना महतीं पीडां व्रजन्ति। भृगुतनये शुक्रे कुजविजिते भौमकृते बलमुख्यः सेनापतिः तस्य वधं मरणं भवति। नरेन्द्राणां राज्ञां संग्रामायु
द्धानि भवन्ति। सौम्येन बुधेन जिते शुक्रे पार्वतीयाः पर्वतनिवासिनः नाशमायान्ति गवां क्षीरं च विनाशो भवति। अल्पा वृष्टिश्च भवत्येव। रविजेन शनैश्चरेणासि
ते शुक्रे विजिते गणमुख्या गणप्रधानाः शस्त्रजीविनः शस्त्रवृत्तयः क्षत्रं क्षत्रवर्गश्च जलजाश्च जलोद्भवाश्च निपीड्यन्ते पीडामुपयान्ति एतद्विशेषफलम्‌ सा
मान्यं भक्तिफलमन्यद् अन्यदपरं वत्सरस्वभक्तिफलमुक्तम्‌ तदपि कृति ॥ ॥ अथ सौरस्य ग्रहविजितस्य फलमाह ॥ असिते सितेन निहतेऽर्घवृद्धि
रहिविहगमानिनां पीडा। क्षितिजेन तंगनान्ध्रकाशिवाह्लीकदेशानाम्‌ ॥ सौम्येन पराजिते मंदे गवणिग्विहगपशुनागाः संताप्यन्ते गुरुणा स्त्रीबहुलाम
हिषकशकाश्च ॥ असिते सौरे सितेन शुक्रेण निहते विजिते अर्घवृद्धिर्भवति स च इद्धानां दुर्लभेवस्व अहीनां सर्पाणां विहगानां पक्षिणां मानिनां मानयु
क्तानां जनानां च पीडा भवति। क्षितिजेनांगारकेन सौरे विजिते तंगनाः जनाः अन्ध्राः उड्राः काशयः वाह्लीकाः एतेषां जनानां ये देशास्तेषां पीडा भवति। सौ
म्येन बुधेन पराजिते विजिते मंदे शनैश्चरे अंगा जनाः वणिजः क्रयविक्रयजीविनः विहगाः पक्षिणः पशवः चतुष्पदाः नागा हस्तिनः एते संतप्यन्ते
पीड्यन्ते। तथा गुरुणा बृहस्पतिना जिते सौरे स्त्रीबहुला ये देशाः महिषकाः शकाश्च जनाः संताप्यन्ते पीड्यन्ते ॥ ॥ अत्रैव विशेषमाह ॥ अयं विशे
षोऽभिहितो हतानां जज्ञवागीशसितासितानाम्‌ फलं तु वाच्यं ग्रहभक्तितोऽन्यद्यथा तथाग्रे विहिताः स्वभक्तीः ॥ कुजोंऽगारकः ज्ञो बुधः वागीशो बृह
स्पतिः सितः शुक्रः असितः सौरः एषां हतानां जितानामयं विशेषोऽभिहित उक्तः अन्यदपरं यत्फलं तद्ग्रहभुक्तितो वाच्यं यथा येन प्रकारेण यत्तेनाद्य तेन वाह

ताः पराजिताः तथा तेनैव प्रकारेण यत्र मध्यकं वा हता स्वभक्तीर्दृष्टिविनाशयंतीत्यर्थः॥ तथा च पराशरः॥ ग्रहस्य येयस्य हतस्य देशाः पीडां स
द्यन्ति तत एव तस्य। संप्राप्तवीर्यस्य जये समृद्धा भवंति सम्यक्त्वाच्च तत्प्रदाः स्युः॥ ॥ इति भट्टोत्पलविरचितायां संहिताविवृतौ ग्रहयुद्धो नामा
ध्यायः सप्तदशः॥ ॥ ॥ अथ समागमाध्यायो व्याख्यायते॥ ॥ तत्रादावेव चंद्रमसो गतिलक्षणमाह॥ भानां यथासंभवमुत्तरेण या
तो ग्रहाणां यदि वा शशांकः प्रदक्षिणं तत्कुरुते नृपाणां याम्येन यातो न शिवः शशांकः॥ शशांकः चंद्रो भानां नक्षत्राणां यथासंभवं उत्तरेण याती
गतः यथासंभवमिति निकटवर्त्तिनां प्रदर्शयति। येषां चंद्रविक्षेपाद्दूनो विक्षेपस्तत्तुल्यो वा तेषां प्रायेण संभवति। यथा कृत्तिकारोहिणीपुष्यमघाचि
त्राविशाखानूराधाज्येष्ठाशतभिषग्रेवतीनां संभवति। अन्येषां कदाचित्संभवति दूरवर्त्तिनात्कुतोऽन्तरेण तस्य गमनं न संभवति। यथा स्वातिश्रवणधनिष्ठा
दिषु स्वातिः सप्तत्रिंशे भागे उत्तरविक्षेपः चंद्रस्य सार्धाश्चत्वारः तस्य सर्वकालं दक्षिणेन याति चंद्रः येषां चंद्रविक्षेपादधिक उत्तरतो विक्षेपस्तेषां सदैव द
क्षिणेन याति। येषां चंद्रविक्षेपादधिको दक्षिणो विक्षेपस्तेषां सदैवोत्तरेण याति चंद्रः एवं भौमादीनां यथासंभवमपि योज्यम् एवमेषां संभवति तेषां योज्यम्
ग्रहाणां भौमादीनां वोत्तरेण यातः प्रदक्षिणं कृत्वा तच्च प्रदक्षिणं गमनं नृपाणां राज्ञां शुभं श्रेयस्करम् याम्येन दक्षिणेन शशांको यातो न शिवो न शुभद इत्यर्थः
ग्रहाणामपि यथासंभवं योज्यम्॥ तथा च ऋषिपुत्रः॥ दक्षिणेनापसव्यं स्यादुत्तरेण प्रदक्षिणम् ग्रहाणां चंद्रमा ज्ञेयो नक्षत्राणां तथैव च॥ तथा च वृद्धग
र्गः॥ नक्षत्राणां ग्रहाणां वा यदा त्वुत्तरतः शशी। तत्प्रदक्षिणमित्याहुर्भवेत् क्षेमसुवृष्टये॥ नक्षत्राणां ग्रहाणां वा यदि दक्षिणतो व्रजेत् अपसव्यं तदेव
स्याद्दुर्भिक्षभयलक्षणम्॥ मुदिता अथाङ्गारकस्योत्तरगते चंद्रे फलमाह॥ चंद्रमा यदि कुजस्य यात्युदक् पार्वतीयबलशालिनां जयः क्षत्रियाः प्रमु
दिताः सयायिनः भूरिधान्यवसुन्धरा॥ कुजस्यांगारकस्य चंद्रस्य यद्युदगुत्तरेण याति गच्छति तदा पर्वतीयानां पर्वतनिवासिनां बलशालिनां ब
लेन ये शालंते श्लाघंते तेषां च जयो भवति। तथा च सयायिनो यायिसहिताः क्षत्रियाः प्रमुदिता हृष्टा भवंति। तथा च वसुंधरा भूः भूरिधान्येन बहुधान्येन
मुदिता हृष्टा भवति॥ अथ बुधस्याह॥ उत्तरतः स्वसुतस्य शशांकः पौरजयाय सुभिक्षकरश्च। सस्यचयं कुरुते जनहार्दिं कोशचयं च नराधिप
तीनाम्॥ शशांकः चंद्रः स्वसुतस्यात्मीयपुत्रस्य बुधस्योत्तरत उत्तरेण यदि याति तदा पौराणां नृपाणां जयाय भवति। सुभिक्षं करोति सुभिक्षकरश्च

भवति। तथाचतस्यानांचयंउपचयंजनानांलोकानांचहार्दिंतुष्टिंनराधिपतीनांराज्ञांकोशजयंभांडागारवृद्धिंचकरोति ॥ अथगुरोराह ॥ वृहस्प
तेरुत्तरगेशशांकेपौरद्विजाः क्षत्रियपंडितानां। धर्मस्यदेशस्यचमध्यमस्यवृद्धिः सुभिक्षंमुदिताः प्रजाश्च ॥ शशांकेचंद्रेवृहस्पतेरुत्तरगेउत्तरस्यांदिशिस्थिते।
पौराणांजनानांद्विजानांब्राह्मणानांक्षत्रियाणांराजन्यानांपंडितानांविदुषांतथाधर्मस्यमध्यमस्यचदेशस्यमध्यदेशाख्यस्यवृद्धिर्भवतिसुभिक्षंचभवति।त
थासर्वाःप्रजाःमुदिताहृष्टाभवंति ॥ अथशुक्रस्याह ॥ भार्गवस्ययदिवास्युदक्शशीकोशयुक्तगजवाजिवृद्धिदः यायिनांचदिजयोधनुष्मतांस
स्यसंपदपिचोत्तमाशुभा ॥ भार्गवस्यशुक्रस्यशशीचंद्रोयद्युदयुत्तरेणयातितदाकोशयुक्तानांसंचितभांडागाराणांगजानांवाजिनामश्वानांवृद्धिप्रदोभ
वति। तथाधनुष्मतांधनुर्भृतांयायिनांचजिगमिषूणांविजयोभवतितस्यानामपिचोत्तमातदातस्मिकालेसंपद्भवति। अपिशब्दोतीवार्थो॥ ॥
अथसौरस्याह ॥ रविजस्यशशीप्रदक्षिणंकुर्याज्जेतृपुरभूभृतांजयः शकवाह्लिकसिंधुपह्लवाश्चम्लेच्छायवनैःसमन्विताः ॥ रविजस्यशनैश्चरस्य
शशीचंद्रःप्रदक्षिणामुत्तरगमनंचेद्यदिकुर्यात्तदापुरभूभृतांपुरनिवासिनांराज्ञांजयोभवति। तथाशकाजनाःवाह्लिकाःसैंधवाःपह्लवाःएतेसर्वेयवनैः
समन्विताःसयवनाम्लेच्छाजोभवंतिमुदंहर्षंभजंतेसेवंतेप्रहृष्टाभवंतीत्यर्थः ॥ अत्रैवविशेषमाह ॥ येषामुदक्स्खलतिभग्रहाणांशालेयरश्मिनिरु
पद्रवाश्च। तद्विपर्ययेतरभक्तिर्देशान्प्रशान्तियाम्येननिहंतितानि ॥ येषांभानांनक्षत्राणांग्रहाणांताराग्रहाणांचभौमादीनांशालेयराशिक्षिमिदी
धितिः चंद्रउदयुत्तरेणनिरुपद्रवउत्पातरहितोगच्छतियातितद्द्रव्याणितेषांभग्रहाणांद्रव्याणियान्युक्तानिग्रहभक्तिमध्येनक्षत्रेरुचतथाग्रहाणां
मध्याद्येपौरानगरायेचनरयायिनस्तांस्तथातद्भक्तिदेशांतेषांग्रहाणांयेस्वभक्तौदेशाउक्तास्तांश्चप्रशांतिपुष्टिंनयति। याम्येनदक्षिणेनगतस्ता
न्द्रव्यादीनिनिहंतिविनाशयंति ॥ अत्रैवपुनरपिविशेषमाह ॥ शशिनिफलमुदक्स्थेयद्ग्रहस्योपदिष्टंभवतितदपसव्येसर्वमेवप्रतीपं।
इतिशशिसमवायःकीर्तिताभग्रहाणांनखलुभवतियुद्धंसाकमिंदोर्यतस्तैः ॥ शशिनिचंद्रमसिग्रहस्योदक्स्थेउत्तरस्यांदिशिस्थितेयत्फ
लमुपदिष्टमुक्तंचंद्रमायदिउदक्स्याद्युदगित्यादिकंतदेवसर्वंनिःशेषमपसव्येदक्षिणदिग्गतेचंद्रेप्रतीपंविपरीतंभवतिइत्येवंप्रकाराभग्रह
णांभानांनक्षत्राणांग्रहाणांचशशिसमवायाःचंद्रसंयोगाःकीर्तिताउक्ताःनखल्विति। खल्वित्ययंशब्दोनिश्चयार्थः इंदोःचंद्रस्यग्रहैर्भौमादिभिः

८२ अहैः नक्षत्रैश्च शशांकसमायुक्तं न भवतीति किल सूर्यस्य ग्रहैः सह समागमोऽस्तमयशब्दवाच्यः चंद्रेण सह समागमशब्दवाच्यः भौमादीनां परस्परं युद्धशब्दवाच्य
इति अयमस्मिञ्शास्त्रे सिद्धांतः॥ तथा चाचार्यविष्णुचंद्रः॥ दिवसकरेणास्तमयः समागमः शीतरश्मिसहितानाम्‌ कुजसुतादीनां युद्धं निगद्यते न्योन्य
युक्तानामिति॥ येः चोक्तमादित्यस्य जयपराजयते गालवामनावाच्या॥ ॥ ॥ इति भट्टोत्पलविरचितायां संहितावृत्तौ समागमाध्यायो ष्टा
दशः॥ ॥ ॥ अथ ग्रहवर्षफलाध्यायो व्याख्यायते॥ कस्य ग्रहस्य वर्षे कीदृशानि शुभाशुभानि फलानि भवंति यत आचार्येण पूर्वमेव प्रतिज्ञात
मासीत्‌ वर्षाय ग्रहस्य फलं मासे च मुनिप्रणीतम्‌ आलोक्य तत्तद्दृष्ट्वैवं ग्रहेभ्योऽरातं ज्ञोतरविधिनादृ इति॥ ॥ तत्रादावेवादित्यस्य वर्षफलमाह॥ २॥
सर्वत्र भूर्विरलसस्ययुता वनानि दैवाग्निभक्षयिषुदंष्ट्रिसमाकुलानि। नद्यश्च नैव हि पुनः प्रचुरं स्रवंति रुग्भेषजानि न तथातिबलान्वितानि॥ तीक्ष्णं
तपत्यदितिजः शिशिरेपि काले नात्यंबुदाजलमुचोचलसन्निकाशाः नष्टप्रभर्क्षगणशीतकरं नभश्च सीदंति तापसकुलानि सगोकुलानि॥ हस्त्यश्व
पत्तिमदसस्यबलैरुपेताबाणासनासिमुसलातिशयाश्चरंति। ब्रंतोह पायुधिष्टपानुचरेश्च देशान्संवत्सरे दिनकरस्य दिनेथमासे॥ दिनकरस्यादि
त्यस्य संवत्सरे वर्षे दिने वा तद्वर्षे मासे वा ईदृशानि फलानि भवंति॥ तथा च यवनेश्वरः॥ अब्दाश्रयं लक्षणमीरितं यद्ग्रहस्वभावप्रभवं जनानाम्‌ तदेव
तन्मासदिनर्तुयुक्तं तदीश्वरस्थानविकल्पितं च॥ एवं वर्षजं फलं मासदिवसहोरास्वपि बोद्धव्यम्‌ तत्र रविवर्षे मासे दिने वा कीदृशानि फलानि सर्वत्र सर्व
स्मिन्देशे भूरवनिर्विरलैस्तनुभिः सस्यैर्वान्यादिभिर्युतासंयुक्ता भवति तथैवान्यान्यरण्यानि दंष्ट्रिभिः सर्पवराहादिभिः समाकुलानि संयुक्तानि भवंति। की
दृशैः दंष्ट्रिभिः देवाः चैव हि योयातिभक्षयिष्णवो भक्षयितुमिच्छोस्तथाग्नेरैदैवशब्देन प्राक्कर्मोच्यते॥ तथा चोक्तम्‌॥ प्राग्जन्मनि कृतं कर्म शुभं वा यदि वा
शुभम्‌। दैवशब्देन निर्दिष्टमिह जन्मनि तद्बुधैरिति। तस्माद्वनानि दैवाग्निभक्षयिषुः दंष्ट्रिसमाकुलानि भवंति। नद्यः सरितः प्रचुरं भूतं पयो जलं न स्रवंति
स्पंदंति। रुजां रोगाणामुपशमार्थं यानि चेभेषजानि द्रव्याणि तानि न तथा तेन वध्यकारेणातिबलान्वितानि वीर्ययुक्तानि न भवंति रोगोपशांतिं सम्यग्न कुर्वं ८२
तीत्यर्थः तथा अदितिजः आदित्यः शिशिरेपि काले माघफाल्गुणमासात्ये शीतकालेपि तीक्ष्णमतिचंडं तपति संतापयति। अंबुदा मेघा अचलसन्निकाशाः
पर्वताकारा अपि नातिजलमुचो न प्रभूतं जलं मुंचंति त्यजंतीति तथा नभ आकाशं कीदृशं नष्टप्रभर्क्षगणशीतकरं नष्टप्रभो विगतकांति र्क्षगणो नक्षत्रसमूहः

87

समाजेत्याख्या यस्य। यमः सौरः जीवो गुरुः अनयोः संगमे संयोगे यद्यन्यः कश्चिद्ग्रह आगच्छेत्तदा कोशाख्यो योगः एको ग्रहः पश्चात्पश्चिमायां दिश्युदितः
आदित्यमंडलान्निर्गतोन्यो द्वितीयः प्राक् पूर्वस्यां दिशि अर्कमंडलादेवोद्गतस्तौ तथाभूतौ यद्येकर्क्षगौ भवतस्तदा सन्निपाताख्यो योगः एतेषां पंचानां स
स्थानानां अभावे योग्रहसंयोगः समागम इति ज्ञेयः। तत्र च समागमे सर्व एव ताराग्रहा अविहततनवो निर्विकारशरीराः स्निग्धा निर्मला विपुला विस्ती
र्णाश्च समागमे धन्याः शुभाः॥ अन्यथा अशुभा इति॥ तथा च समाससंहितायाम्। ग्रहकोशसन्निपातौ संवर्त्तसमागमौ समाजश्च। सम्मोह इति चैते
पांल्कागमस्मात्समादेश्यम्॥ सूर्यजगुरुसंयोगे द्वावप्यकोपरः समागच्छेत् सहि भवति कोशसंज्ञो दुर्भिक्षभयावहो लोके ॥ एक उदितः प्रतीच्या
मपरः प्राच्यां ग्रहोदितो यदि च अन्योन्यमयोस्ताभिः विल्लिखेत् सहि सन्निपाताख्यः सहपौरेण च पौरो यायी सह यायिना ग्रहो यद्य दृश्येत समायुक्तः स
समाजाख्यः समुद्दिष्टः अथ यायिनागराख्याः चत्वारः पंच वा सह भवेयुः एकर्क्षे संवर्त्तः शिखिराहुयुतः स सम्मोहः अन्यथा समागमः यतः पूर्वमेवोक्त मू
प्रत्यर्चिषः प्रसन्नास्संस्फुरितकिरणाः प्रदक्षिणावर्त्ताः सुस्निग्धामलतनवः क्षेमसुभिक्षावहास्तेस्युः॥ ॥ अथैतेषां फलान्याह॥ सम्मोहसंवर्त्तस
मागमाख्यौ सम्मोहकोशौ भयदौ प्रजानाम् समाजसंज्ञस्तु समाः प्रदिष्टा वैरप्रकोपः खलु सन्निपाते ॥ संवर्त्तसमागमाख्यौ द्वौ योगौ समौ न शुभौ ना
प्यशुभं फलं कुरुत इति भावः याद्दशाभावात्पूर्वमभूवंस्तादृशा एव संवर्त्तसमागमयोरिति सम्मोहकोशौ प्रजानां लोकानां भयदौ भयं ददतः समाजसंज्ञे
समाजाख्ये तु समाशोभनास्समाः प्रदिष्टा उक्ता तद्वर्षे शोभनं भवतीत्यर्थः। केचिद्बहुवचनं पठंति। सुसमाः प्रदिष्टा इति सुसमाभावाः प्रदिष्टा उक्ताः या
दृशाः पूर्वमभूवंतदधिका भवंतीत्यर्थः सन्निपाते वैरप्रकोपः लोकानां परस्परं वैरो भवति। खलु शब्द आगमद्योतनार्थः॥ तथा च काश्यपः ॥
संवर्त्तसंगमौ मध्यौ सम्मोहो भयदः स्मृतः कोशश्चानिष्टफलदः समाजाख्यः सुमध्यमः सन्निपाते महावैरं अन्योन्यमुपजायते। तथा च समाससंहि
तायां॥ संवर्त्तसमागमयोः साम्यं मोहभयानि कोशे च। सुसमाः समाजसंज्ञे वैराणि पृथक् सन्निपाताख्ये॥ तथा चात्रायं विशेषः समाससंहितायाम्॥
दुर्भिक्षरोगतस्करशस्त्राग्निवृष्टिक्षुधं ग्रहाः कुर्युः आनीलवीथ्यां ज्ञेयाः अथ वीथ्यां नेयमपरिहाणिः शस्त्रभयं मृगवीथ्यां जारद्गव्यां क्षुधं च रोगांश्च। पशु

१८२

नागगोवीथ्यां अषभाख्यायां चन्द्रपयीड। लुलभिद्भिरावत्यां गजवीथ्यां च कात्वामोदाः अतिजलमोदं ऊर्ध्वनागाख्यायां चसर्वेलु। अफोदये प्रवासे
च सोमस्य सर्वं अफलतथा। विचार्य वीथीमार्गांश्च लोके ब्रूयात् शुभाशुभमिति ॥ ॥ ॥ इति भट्टोत्पलविरचितायां संहिताविवृतौ ग्रहशृंगाटकं नाम
विंशोध्यायः ॥ ॥ ॥ अथ गर्भलक्षणं नामाध्यायो व्याख्यायते ॥ ॥ ॥ तत्रादावेव प्रयोजनदर्शनार्थमाह ॥ ॥ अन्नं जगतः प्राणाः
प्रावृट्कालस्य चान्नमायत्तम्। यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन ॥ जगतो विश्वस्यान्नं प्राणाः असवः यथा प्राणिनामन्नं विना प्राणा न वर्तन्ते।
तच्चान्नं प्रावृट्कालस्य वर्षासमयस्यायत्तं तदाधीनं यस्मादेवमतोस्माद्धेतोः प्रयत्नेनातिशयेन प्रावृट्कालः परीक्ष्यो विचार्य इत्यर्थः ॥ ॥ अथ तल्
लक्षणानि वक्ष्यामीत्याह ॥ तल्लक्षणानि यानि मुनिभिर्निबद्धानि तानि दृष्ट्वेदम्। क्रियते गर्गपराशरकाश्यपवज्राद्यैर्विरचितानि ॥ तस्य
प्रावृट्कालस्य यानि लक्षणानि विज्ञानकारणानि मुनिभिर्वसिष्ठादिभिर्निबद्धानि विरचितानि दृष्ट्वा अवलोक्य तथा गर्गपराशरवज्रकाश्यपादि
भिः यानि च विरचितानि आदिग्रहणाद्बादरायणासितदेवलादयो गृह्यन्ते। एतानि सर्वाणि च दृष्ट्वा समवाप्य इदं प्रावृट्काललक्षणं क्रियत इति ॥ ॥
अथ गर्भलक्षणस्य दैवविदः प्रशंसार्थमाह ॥ दैवविद् वाहितचित्तो द्युनिशं यो गर्भलक्षणो भवति। तस्य मुनेरिव वाणी न भवति मिथ्याम्बुनिर्देशे ॥ २
यो दैववित्कालज्ञः अविहितचित्तोऽह्नि निशामहोरात्रं गर्भलक्षणो भवति। तस्याम्बुनिर्देशे वृष्टिकथने मुनेः ऋषेरिव वाणी गीर्मिथ्या निष्फला न भवति
अपि तु सत्यस्वरूपा भवतीत्यर्थः ॥ अत्र शास्त्रप्रशंसार्थमाह ॥ किं वातः परमन्यच्छास्त्रं ज्यायोस्ति यद्विदित्वैव। प्रध्वंसिन्यपि काले त्रिका
लदर्शी कलौ भवति ॥ अतोस्मात् गर्भलक्षणशास्त्राज्ज्योतिःशास्त्राद्वा अन्यदपरं शास्त्रं ज्यायः प्रशस्ततरं किं वास्ति विद्यते यच्छास्त्रं ग्रन्थं विदि
त्वैवं ज्ञात्वा कलौ युगे प्रध्वंसिन्यपि सर्वशास्त्रविनाशकर्तरि सत्यपि यतः सर्वशास्त्राणां कलौ दिनानुदिनं ध्वंसोस्ति तथाभूतेपि त्रिकालदर्शी भूतभव्यभ
विष्यस्य कालस्य वेत्ता भवतीत्यर्थः ॥ अथात्रैवापरमतं स्वमतं चाह ॥ केचिद्वदन्ति कार्तिकशुक्लान्तमतीत्य गर्भदिवसाः स्युः। न च तन्मतं बहू
नां गर्गादीनां मतं वक्ष्ये ॥ केचिदाचार्याः सिद्धसेनप्रभृतयः कार्तिकमासस्य शुक्लान्तं शुक्लपक्षावसानं पौर्णमास्यन्तमतीत्यातिक्रम्य गर्भदिवसाः स्युः।

१८२

भवेद्युरितिवदंतिकथयंति ॥ तथाचसिद्धसेनः ॥ शुक्लपक्षमतिक्रम्य कार्त्तिकस्य विचारयेत् गर्भाणां संभवं सम्यक् तस्य संपत्तिकारणम् ॥ नचतन्मतं
वस्तूनामिति ॥ यदेतत्प्रायुक्तं कार्त्तिकशुक्लांतमतीत्यगर्भदिवसाः स्युरितितत्रवस्तूनां प्रस्तुतानां नमतम् तस्माद्गर्गादीनां गर्गवसिष्ठपराशरकाश्यपपुत्रका
श्यपानां मतं वक्ष्ये कथयिष्य इति ॥ तत्राह ॥ मार्गशिरःसितपक्षप्रतिपत्प्रभृतिनिशाकरेणाषाढायाम् पूर्वावासमुपगते गर्भाणां लक्षणां ज्ञेयम् ॥ मार्ग
शीर्षमासस्य सितपक्षप्रतिपत्प्रभृति शुक्लपक्षप्रतिपदारभ्य क्षपाकरेचंद्रे अषाढायां पूर्वां समुपगते प्राप्ते वा शब्दो ऽत्रचार्थे मार्गशीर्षशुक्लपक्षेय
तत्सर्वं
दा पूर्वाषाढास्थं चंद्रमा भवति तदारभ्य गर्भाणां लक्षणां ज्ञेयं ज्ञातव्यमिति ॥ तथा चात्र गर्गः ॥ शुक्लादौ मार्गशीर्षस्य पूर्वाषाढां यदा स्थिते ॥ निशाकरे
तु गर्भाणां तदादौ लक्षणां वदेत् ॥ काश्यपश्च ॥ सितादौ मार्गशीर्षस्य प्रतिपद्दिवसे यदा ॥ पूर्वाषाढागते चंद्रे गर्भाणां धारणां भवेत् ॥ ॥ यन्नक्षत्र
मुपगते गर्भश्चंद्रो भवेत् सचंद्रवशात् पंचनवतिदिनशते तत्रैव प्रसवमायाति ॥ योगर्भो यन्नक्षत्रमुपगते यस्मिन्नक्षत्रे व्यवस्थिते चंद्रे भवेत्सग
र्भः चंद्रवशाच्चंद्रयुक्तनक्षत्रवशात्प्रसवं याति ॥ कियता कालेनेत्याह ॥ ॥ पंचनवते दिनशते अतिक्रांते सार्धैः षड्भिः मासैर्गतैस्तत्रैवतस्मिन्नेव
नक्षत्रे प्रसवमायाति प्रसूयत इति एतदुक्तं भवति ॥ यन्नक्षत्रमुपगते चंद्रे गर्भः संभूतस्तस्मात्पंचनवते दिनशते ऽतीते तन्नक्षत्रस्थे चंद्रे प्रसवंया
ति ॥ ननुच ॥ यदुक्तं ॥ चंद्रवशात्प्रसवमायातिकिमत्र चंद्रमानवशात् पंचनवते दिनशते प्रसवं यात्यथ तत्र चंद्रवशादित्यनेनेदं प्रदर्शयति ॥ यन्नक्षत्रे
चंद्रे गर्भः संभूतः तत्रैव सावनमानवशात्तन्नक्षत्रस्थे प्रसवं याति ॥ नन्वत्र चंद्रवशादित्युक्तं कथं सावनं मानमवगम्यत इत्युच्यते ॥ तत्रैव प्रसवमाया
तीति वचनाद्यागयातदिवसेषु द्वादशदिवसात्पंचनवतिशतयुक्ते चक्रगणाकृते तन्नक्षत्रगतश्चंद्रमा भवति ॥ अन्यथा पंचनवतिदिनशते चंद्रयुक्त
गर्भनक्षत्रं न भवत्येव द्वादशवर्षमात्रिंशीयते ॥ सचंद्रवशाच्चंद्रयुक्तगर्भनक्षत्रवशात्तत्रैव व्यवसानेन च स्पष्ट्या निमानानि आचार्येण प्रदर्शितानि युगव
र्षमासपिंडरविमानं साधिमासकं चंद्रमित्यादि ॥ तथाचाचार्येण समाससंहितानिबंधे स्पष्टतरमुक्तम् ॥ पौषे सितशुक्लाद्यैः श्रावणशुक्ला
दयो विनिर्देश्याः सार्धैः षड्भिर्मासैर्नभविसाकन्म नक्षत्रेतस्मादेवं स्थितसावनमानवशाद्गर्भप्रसव इति ॥ अथपुनरपि गर्भाणां दृष्टानां प्र
सवकालज्ञानमाह ॥ ॥ सितपक्षभवाः कृष्णे शुक्ले कृष्णा द्युसंभवा रात्रौ ॥ नक्तंप्रभवाश्चाह्नि संध्याजाताश्च संध्यायाम् ॥ सितपक्षभवाः शुक्ला

पक्षसंभूता गर्भाः पुरतः पंचनवतिदिनशते गते शुक्लपक्षे प्रसवमायांति। एवं कृष्णपक्षोद्भवाः शुक्लपक्षे कृष्णा संभवादिसंभवा गर्भा रात्रौ प्रसवमायांति। नक्तंप्रभवा रात्रिसंभवाश्चाह्नि दिवसे प्रसवमायांति संध्याजाताः संध्यायामेव प्रत्ययाद्भवंति प्राक्संध्यासंभूता अपरसंध्यायामपरसंध्यासंभूताः प्राक्संध्यायामिति॥ तथा च गर्गः॥ दिवा भवति यो गर्भः रात्रौ सद्भूतिपद्यते। शुक्लपक्षसमुद्भूतः कृष्णपक्षे च वर्षति। पौर्णमास्यां यथोत्पन्नः सामावास्यां प्रवर्षति। अमावास्यां समुद्भूतः पौर्णमास्यां प्रवर्षति। पूर्वसंध्यासमुद्भूतः पश्चिमायां प्रवर्षति। पश्चिमायां समुद्भूतः पूर्वसंध्यां प्रवर्षति॥ पूर्वह्नि यः समुद्भूतः पश्चाद्रात्रौ प्रवर्षति। निशायां पश्चिमे यश्च स पूर्वाह्णे प्रसूयते। दिनार्धे तु समुत्पन्नः स दिनार्धे प्रसूयते। निशार्धे तु समुत्पन्नः स निशार्धे प्रसूयत इति॥ अथ गर्भाणां विशेषलक्षणं कालनिर्देशं चाह॥ मृगशीर्षाद्या गर्भा मंदफलाः पौषशुक्लजाताश्च। पौषस्य कृष्णपक्षेण निर्दिशेत् श्रावणस्य सितम्॥ माघसितोत्था गर्भाः श्रावणकृष्णे प्रसूतिमायांति। माघस्य कृष्णपक्षेण निर्दिशेद्भाद्रपदशुक्लम्॥ फाल्गुनशुक्लसमुत्था भाद्रपदस्यासिते विनिर्देश्याः तस्यैव कृष्णपक्षोद्भवास्ते चैते श्वयुक्शुक्ले॥ चैत्रसितपक्षजाताः कृष्णेश्वयुजस्य वारिदा गर्भाः चैत्रासितसंभूताः कार्त्तिकशुक्लेभिवर्षंति॥ मृगशीर्षा मार्गशीर्षः तदाद्याः तत्प्रथमपक्षजाता गर्भा मंदफला अल्पवर्षदा भवंति। प्रथमपक्षः शुक्लपक्षः तत्र जाताः संभूताः तथा पौषशुक्लजाताश्च गर्भा मंदफला एव। अस्मिन्नर्थे लक्षणे चैत्रासिताद्या मासा विज्ञातव्याः यथा चैत्रस्य शुक्लपक्षो वैशाखस्य कृष्णपक्षो द्वितीयश्च चैत्रमासः एवमन्येषां मासानामपि परिकल्पना कार्या॥ एवमेतत्प्रमाणं पौषस्य कृष्णपक्षेण श्रावणस्य सितं शुक्लपक्षं निर्दिशेद्वदेत्। एतदुक्तं भवति पौषकृष्णपक्षसंभूतो गर्भः श्रावणशुक्लपक्षे प्रसूयत इति॥ एवं माघसितोत्था गर्भा माघशुक्लपक्षे संभूताः श्रावणस्य कृष्णपक्षे प्रसूतिमायांति प्राप्नुवंति। तथा माघस्य कृष्णपक्षेण भाद्रपदे शुक्लं निर्दिशेद्वदेत्। फाल्गुनशुक्लपक्षसंभूता गर्भा भाद्रपदस्यासिते कृष्णपक्षे विनिर्देश्या वक्तव्याः। तस्यैव फाल्गुनस्य ये तु कृष्णपक्षोद्भवा गर्भाः ते श्वयुक्शुक्ले पक्षेभिवर्षंति। चैत्रसितजाताः चैत्रशुक्लपक्षसमुद्भूता ये गर्भास्ते श्वयुजस्य कृष्णपक्षे वारिदा वृष्टिप्रदाः चैत्रासितसमुद्भूताः चैत्रकृष्णपक्षोद्भवाः कार्त्तिकशुक्लपक्षेभिवर्षंति॥ तथा च गर्गः॥ माघेन श्रावणं विद्याद्भाद्रं वै फाल्गुनेन तु चैत्रेनाश्वयुजं प्राहुर्वैशाखेन तु कार्त्तिकम्। शुक्लपक्षेण

न्नभ्वस्य॰

कृत्तंतुक्तस्तपरेणाचेतरम् रात्रह्रो विपर्यासंकार्यंकालेऽविनिश्चयमिति॥ पराशरस्याप्येवंमतम्॥ अथमेघानांवायोश्चलक्षणमाह॥
पूर्वोद्भूताःपश्चादपरोत्थाःप्रभवंतिजीमूताःशेषास्वपिदिक्ष्वेवंविपर्ययोभवतिवायोश्च॥ जीमूतामेघागर्भकालेपूर्वस्यांदिशिसमुद्भूतास्तेप्र
सवकालेपश्चात्पश्चिमायांदिशिसंभवंतियेचापरोत्थागर्भकालेपश्चिमायांदिशिसंभूतास्तेप्रसवकाले~~पश्चात्पश्चिमायांदिशिसंभवंतियेचापरोत्था~~
~~गर्भकालेपश्चिमायांदिशिसंभूतास्तेप्रसवेपश्चा~~प्राक्पूर्वस्यांदिशिसंभवंति। शेषास्वप्यास्वपिदिक्ष्वेवमनेनैवप्रकारेणविपर्ययोविपरीतोभवति। तद्व
नैरृत्याम् नैरृतीऐशान्याम् इतिवायोरनिलस्य
था। दक्षिणाउत्तरस्याम् उत्तरादक्षिणस्याम् आग्नेयीवायव्यां। वायवीआग्नेय्याम्। ऐशानीसमुद्भूतानैरृत्याम् नैरृतीऐशान्याम् इतिवायोरनिलस्य
चाप्येवमेवविपर्ययोविपरीतोवाच्यः यथामेघानांदिग्व्यत्ययउक्तस्तथावायोरपिवाच्यः यथापूर्वोद्भूताः पश्चात्तथापूर्वोद्भूतोगर्भकालेवायोः प्रवर्ष
णकालेपश्चिमायांदिशिभवत्येवंसर्वत्रयोज्यम्॥ तथाचपराशरः॥ अथमाघेनश्रावणंफाल्गुणेनभाद्रपदंचैत्रेणाश्वयुजंवैशाखेनकार्तिकंर
भुलेनहासंहतस्तेनशुक्लंदिवसेनरात्रिंरात्र्यादिवसंगर्भाः प्रवर्षंति॥ ॥ अधुनागर्भसंभवलक्षणान्याह॥ ॥ ह्लादिमृदुदक्षशिवशक्रदिग्भ
वोमारुतोवियद्विमलम्। स्निग्धसितबहुलपरिवेशपरिवृतौहिममयूखार्कौ॥ पृथुबहुलस्निग्धघनंघनसूचीक्षुरकलोहिताभ्रयुतम्। काकांड
मेचकाभंवियद्विशुद्धेंदुनक्षत्रम्॥ सुरचापमंद्रगर्जितविद्युत्प्रतिसूर्यकाशुभासंध्या। शशिशिवशक्राशांतरवाः शांतमृगाः पक्षिरवसंघाः॥
विपुलाः प्रदक्षिणचराः स्निग्धमयूखाग्रहानिरुपसर्गाः तरवश्चनिरुपसृष्टांकुरानरचतुष्पदाहृष्टाः॥ गर्भाणांपुष्टिकराः सर्वेषामेवत्रयोविशेषः
स्वर्तुस्वभावजनितोगर्भविवृद्ध्यैस्तमभिधास्ये॥ गर्भग्रहणकालेईदृशानिलक्षणानिशुभानि॥ तद्यथामारुतोवायुः ह्लादीआह्लादकः मृदुः
सुखस्पर्शः उदग्उत्तराशिवदिगैशानीशक्रदिक्पूर्वाआसामान्यतोसमुद्भूतस्तथावियदाकाशंविमलंनिर्मलंहिममयूखः चंद्रः आदित्यः तौस्निग्धे
नात्रहेणासितेनशुक्लेनबहुलेनघनेनपरिवेशेनपरिवृतौव्याप्तौवियदाकाशंपृथुबहुलंस्निग्धंघनम्। पृथवः विस्तीर्णाः बहुलाः घनाः स्निग्धाः
अप्रहताः घनाः मेघाः यस्मिन् तथाघनसूचीमेघएवसूच्याकारः क्षुरकः क्षुराकारोमेघः लोहिताभ्राणिलोहितवर्णानितैर्युतंसंयुक्तंवियत्का
कांडमेचकाभंकाकांडोवायसांडोनीलवर्णः मेचकोवर्हिकिंठसमवर्णः काकांडमेचकवदाभाकांतिर्यस्मिन् विशुद्धोनिर्मलइंदुः चंद्रोनक्षत्राणिभा

स्या =

निचयस्मिन् तथा संध्या पूर्वापरा वा सुरचापेरोहिधनुषा मंद्रेणा मधुरेण गर्जितेन गर्जितं मेघशब्दः विद्युत्तडित् प्रतिसूर्यो द्वितीयोर्कः एतैर्युताः शुभाः
शस्ताः तथा पक्षिणां विहगानां मृगाणामारण्यपशूनां च संज्ञाः सुस्वराः शशिशिवशक्राशास्था शशिनः आशा उत्तरादिक् शिवाशा ऐशानी शक्रा
शा पूर्वा एतास्वाशासु स्थिताः ते च शांतरवा मधुरस्वना अनर्काभिमुखा अतथा प्रस्फा विपुलाः विस्तीर्णाः बिंबाः प्रदक्षिणचराः नक्षत्राणां मुत्तरेणमा
र्गेण चरंति एवं पूर्वमेवकुं भानां यथा संभवमुत्तरेणयतो ग्रहाणां यदि वा शशांकः प्रदक्षिणं तदिति। अतः प्रदक्षिणचराः स्निग्धमयूखाः निर्म
लरश्मयः निरुपसर्गाः निरुत्पाताः तथा तरवः वृक्षाः निरुपसृष्टांकुराः निरुपसृष्टा निर्बाधाः अंकुरा येषाम् नरचतुष्पदा हृष्टाः नराः मनुष्याः
चतुष्पदा गवादयः एते हृष्टाः प्रमुदिताः गर्भाणामिति एवमनेन प्रकारेणाये गुणा उक्तास्ते सर्वेषामेव गर्भाणां पुष्टिकराः एते च मार्गशिरः सितपक्ष
प्रतिपत्प्रभृति वैशाखांतं यावल्लक्षणीयाः ॥ अत्रास्मिन् गर्भलक्षणे योन्यो विशेषस्तत्तुस्वभावजनितः स्वेनात्मीयेन तत्तुस्वभावेन जनि
त उत्पादितस्तं गर्भविवृद्धौ गर्भाणां विवृद्धये विशेषं समभिधास्ये कथयिष्ये॥ तथा च पराशरः॥ अथ गर्भसंस्थास्तु मेघादिषु चतुर्षु मासेषु पुषः
शुचौ धारणा न भोनभस्योः प्रावृट् तस्या अनुबंधो वर्षासु प्रसवंति। तत्र वायुः अविद्युत् स्तनयित्नुवर्षाणि गर्भास्तां प्रशस्ता भाच यस्मिन्काले स्यु
र्येदुनक्षत्राश्रयाणां वर्षलिंगानां प्रादुर्भावः पंचरूपता गर्भाणां धारणा मासेन प्रकृतिरिति ॥ अधुना लक्षणमाह ॥ पौषे समार्गशीर्षे
संध्यारागोंबुदाः सपरिवेशाः नात्यर्थं मार्गशीर्षे शीतं पौषेतिहिमपातः ॥ माघे प्रबलो वायुस्तुषारकलुषद्युती रविशशांकौ। अतिशीतं सघनस्य
च भानोरस्तोदयौ धन्यौ ॥ फाल्गुनमासे रूक्षः चंडः पवनोभ्रसंप्लवाः स्निग्धाः परिवेषाश्चासकलाः कपिलस्ताम्रो रविश्च शुभः ॥
पवनघनवृष्टियुक्ताश्चैत्रे गर्भाः शुभाः सपरिवेशाः घनपवनसलिलविद्युत्स्तनितैश्च हिताय वैशाखे ॥ पौषेमासे मार्गशीर्षे मार्गशीर्षस
हिते संध्यारागः संध्ययोरक्तत्वम् अंबुदाः मेघाः सपरिवेशाः परिवेशयुक्ताः तथा मार्गशीर्षे मासे नात्यर्थं नातिबहु शीतं पौषेऽतिहिमपातः
शुभः माघेमासे प्रबलश्चंडो वायुः तथा रविशशांकौ अर्कचंद्रौ तुषारकलुषद्युती तुषारधूतनिर्हिमकांतिः सूर्यः कलुषद्युतिरनिर्मलकांति
श्चंद्र इत्यर्थः अतिशीतमत्यर्थं शीतं भानोरादित्यस्य सघनस्य मेघस्यास्तोदयौ धन्यौ शुभावित्यर्थः फाल्गुनमासे पवनो वायुः रूक्षः परुषः चंडोति

वेगः अभ्राणां मेघानां संप्लवा उद्गमाः स्निग्धाः सूर्याचंद्रमसोश्च परिवेशाः अमलकलाः खंडाः रविः आदित्यः कपिलवर्णः ताम्रवर्णश्च शुभः शस्तः चैत्रेमा
सेगर्भाः पवनेन वायुना मेघैर्मेघवृष्ट्यावर्षणेन च युक्ताः सपरिवेषाः परिवेषसहिताः शुभाः वैशाखेमासे घनैर्मेघैः पवनेन वायुना सलिलेन जलेन विद्युता ता
डिताः स्तनितेन गर्जितेन च युक्ता गर्भा हिताय भवंति॥ तथा च काश्यपः॥ शीतमभ्रं तथा वायुः चंद्रार्कपरिवेशणम्‌ माघे मासे परीक्षेत श्रावणे वृष्टिमादिशेत्
फाल्गुने चाभ्रसंघातवृष्टिः स्तनितमेव च। पुरोवाताश्च ये प्रोक्ता मासे भाद्रपदे शुभम्‌ बकुपुष्पफलावृक्षा वाताः शर्करकर्षिणः शीतवर्षं तथा श्राविणाश्चैत्रेणाश्व
युजं वदेत्‌ वक्रतिर्यग्भवो वाताः पुरः शीघ्रप्रदक्षिणाः वैशाखेतानि दृष्टानि कार्तिके मासि वर्षति॥ तथा च समाससंहितायाम्‌॥ शस्तानि मृगान्मासाः शीत
हिमवायुवृष्टिगर्जघनभानि। स्तनिततडिज्जलमारुतघनतापाश्चातिशं वैशाखे। छन्नेन शुक्लपक्षः सितेन दृष्टो निशादिनोप्येन। राचक्षेत्रं ध्यावांसंध्यादिय
त्यया ज्ञालदा॥ ॥ अथ गर्भकाले मेघानां लक्षणमाह॥ मुक्तारजतनिकाशास्तमालनीलोत्पलांजनाभासाः जलचरसत्त्वाकारा गर्भेषु घनाः प्रभूतज
लाः॥ तीव्रदिवाकरकिरणाभितापिता मंदमारुता जलदाः रुषिता इव धाराभिर्विसृजंत्यंभः प्रसवकाले॥ ये घना मेघा मुक्तारजतनिकाशा मुक्ताफल
नां रजतस्य रूप्यस्य निकाशाः सदृशाः अतिशुक्लवर्णा इत्यर्थः अथवा तमालनीलोत्पलांजनाभासाः तमालवृक्षस्य नीलोत्पलस्यांजनस्य च सदृशव
र्णाः अतिकृष्णा इत्यर्थः जलचरसत्त्वाकाराः जलचरा ये सत्त्वाः जलप्राणिन एषां मकरमत्स्यनक्रकूर्मशिशुमारप्रभृतयः एवंविधाः गर्भेषु घना दृष्टाः प्र
भूतजलाः बहुवर्षदाः तीव्रदिवाकरकराभितापिताः इति ये मेघास्तीव्रैश्चंडदिवाकरकिरणैरर्करश्मिभिरभितापिता दग्धदेहाः संपादिताः मंदमा
रुताः स्वल्पपवना जलदा मेघा एवंविधा ये गर्भकाले दृश्यंते ते प्रसवकाले पंचनवतिदिवसशते गते अंभः पानीयं रुषिता रुष्टाः क्रुद्धा इव धाराभिः
विसृजंत्युत्सृजंति अतिवृष्टिदा भवंतीत्यर्थः॥ तथा च समाससंहितायाम्‌॥ पृथुघनबहुला जलदा जलचरसत्त्वान्विताः शुभा गर्भाः स्निग्धसित
बहुलपरिवेषपरिवृतौ हिमकरोस्रकरौ॥ दूरखगमृगा मुदिता निरुपद्रुतास्तरवः वियदमलं च यदा भवति तदा सुसमा॥ स्निग्धतडित्प्रति
सूर्यकमत्स्याः शक्रधनुः प्रथमा। परिमध्ये ज्ञातखवाह्वगपङ्क्ति मनुष्याः शक्राशा शीघ्रदिक् पवनश्च॥ ॥ अधुना गर्भोपघातलक्षणा
न्याह॥ ॥ गर्भोपघातलिंगान्युल्काशनिपांसुपातदिग्दाहाः क्षितिकंपखपुरकीलककेतुग्रहयुद्धनिर्घाताः॥ रुधिरादिवृष्टिवैकृतप

२०५ रिचेंद्रधनुः परिधिदर्शनं राहोः ३४ त्सुत्पातैरेतैस्त्रिविधैश्चाच्चेर्हतोगर्भः ॥ इमानि लक्ष्यमाणानि गर्भाणामुपघात लिंगानि विनाशचिह्नानि एतैर्गर्भोहतो विनश्यति। तद्यथा। उल्कापातः अशनिर्विद्युत् पांसुपातः पांसुवर्षणम् दिग्दाहो दिशांदाहः क्षितिकंपो भूचलनम् खपुरं गंधर्वनगरम् कीलास्तमिसकीलकाः केतुः शिखी ग्रहयुद्धम् निर्घातो निर्घातशब्दः तथा दृष्टोवर्षरोहिधिरादिवैकृतम् विकारः रक्तमांसवसाघृत तैलादिवर्षणम् परिघस्य लक्षणम्।

परिघइतिमेघरेखयातिर्यक् भास्करोदये अस्ते वेतितस्य परिवस्ये इंद्रधनुषः सुरचापस्य दर्शनम् परिघस्य लक्षणम् राहोर्दर्शनम् इत्येवं प्रकारैरुत्पातैरन्यैस्त्रिविधैर्दिव्यांतरिक्षभौमैरुत्पातैर्गर्भोहतोनष्टो वाच्यः एतदुक्तं भवति गर्भे दृष्टे यदि पश्चादुक्तानामुत्पातानामन्यतमो भवति तदा गर्भोहतोऽस्य

अभ्रवर्षे पाठः ०

रसव

समनंतरं पश्चादुत्पातसंभवो नान्यद् इति ॥ तथाच गर्गः॥ अस्मिन्वर्षतिमो वर्षमांसशोणितवर्षणम् उल्कानिर्घातकंपाश्च वज्रपातस्तथैव च। परिवेशाः परिघ्योवासवस्यधनुषि च। अन अस्तनितं वर्षं दिशांदाहस्तथैव च। अनार्तवं पुष्पफलं धमणीयेषुवर्षणम् ग्रहयुद्धेषु घोरेषु हता गर्भा विनिर्दिशेत्॥ तथाच पराशरः॥

95

तेषु ग्रहाणामुदयास्तमयोल्कानिर्घाताशनिपातगंधर्वनगरादिदिग्दाहरश्मिवर्णविकारभूचलनप्रादुर्भावो वर्षाश्चवर्षाख्याः॥ पुनरपि विशेषमाह ॥

स्वर्तुस्वभावजनितैः सामान्यार्थैश्च लक्षणैर्वृद्धिः गर्भाणां विपरीतैस्तैरेव विपर्ययो भवति ॥ पौषे समार्गशीर्षे संध्यारागैर्बुधाः सपरिवेषाः॥ स्वर्तुस्वभावजनितानि गर्भाणां लक्षणानि। तथाफाल्गुनादिष्वेतद्दौ शीवशक्रादिभवो मारुत इत्यादीनि सामान्य लक्षणानि ॥ एवं स्वर्तुस्वभावजनितैर्यैश्च सामान्य लक्षणैर्गर्भाणां वृद्धिरुक्ता तैरेव विपरीतैर्विपर्यस्थैर्विपर्ययो विपरीतो गर्भाणां हानिरिति॥ अर्थादेवमध्यमैर्मध्यमं फलं वक्तीमिति ॥ ॥

अथयेषु नक्षत्रेषु गर्भः संभूतः बहुतोयदो भवति तदाह ॥ ॥ भद्रपदाद्वयविश्वांबुदेवपैतामहेष्वथर्क्षेषु। सर्वेष्वृतुषु विवृद्धो गर्भो बहुतोयदो भवति ॥ भद्रपदाद्वयं पूर्वभद्रपदोत्तरभद्रपदे विश्वेदेवोत्तराषाढा अंबुदेवा पूर्वाषाढा पैतामहं रोहिणी एतेषु पंचसु नक्षत्रेषु सर्वेष्वृतुषु विवृद्धो गर्भः पौषे मार्गशीर्षे संध्याराग इत्यादिभिर्गुणैः पुष्टः प्रवर्षणे बहुतोयदः प्रभूतवर्षदो भवति। सांप्रतं येषु नक्षत्रेषु गर्भः संभूतो बहून्यहानि वर्षति॥ २०५

तान्याह ॥ शतभिषगाश्लेषार्द्रास्वातिमघासंयुतः शुभोगर्भः पुष्णाति बहून् दिवसान्हंत्युत्पातैर्हतैस्त्रिविधैः ॥ शतभिषक् अश्लेषा आर्द्रास्वातिः मघा एभ्यः शतभिषगादिभ्यः पंचभ्यः संभूतो गर्भः एतेषां मध्यादेकतमेन नक्षत्रेण संभूतः शुभः शुभफलो भवति स च बहून्दिवसान्पुष्णाति प्रभू

तान्युक्तानि पुष्टिं नयति पुष्टिनिमित्तान्यभिहितानि हलादिस्तद्वद्दगित्यादीनि पृष्टैवैनकृते विच्छेदो गर्भस्त्रिविधैरुत्पातैर्दिव्यांतरिक्षभौमैर्हतोल्पात्म
नो विनाशयतीत्यर्थः। एतदुक्तं भवति। कृतस्तावंत्येव दिनानि न वर्षति गर्भोपघातलिंगान्युल्काशनिपांसुपातदिग्दाहइत्याद्युक्तानि त्रिविधमुत्पातलक्षणा
माचार्येण समाससंहितानिबंधे स्पष्टतरमुक्तम्॥ दिव्यं ग्रहर्क्षजातं भुवि भौमं स्थिरचरोद्भवं यच्च। दिग्दाहोल्कामारुतपरिवेशाद्यं वियत्प्रभवम्॥
तथा च गर्गः॥ प्राजापत्यं मृगाख्ये पौरोहं चानिलवारिजं। आषाढाद्वितयं चैव तथा भाद्रपदाद्वयम्। नक्षत्रदशकं चैतद्यदि स्याद्ग्रहदूषितं। न गर्भाः संपदंया
ति योगक्षेमं न कल्प्यते। उल्कयाभिहतं वापि केतुना वाप्यधिष्ठितं। न गर्भाः संपदं यांति वासवश्च न वर्षति॥ अधुनानंतरोक्तार्यायां दिवससंख्यानिगमं
करोति॥ मृगमासादिष्वष्टौ षट् षोडश विंशतिश्चतुर्युक्ता। विंशतिरथ दिवसत्रयमेकतमर्क्षेण पंचभ्यः॥ मृगमासप्रादिर्येषां मासानां
ते मृगमासादयः तेषु मृगमासादिषु प्राक्परिपठितानां पंचानामन्यतमेन नक्षत्रेण यदा गर्भो विवृद्धस्तदा यथासंख्यमेते दिवसा योजनीयाः येचोक्ता नक्ष
त्राणां अन्यतमेन नक्षत्रेण मार्गशीर्षमासे गर्भः संभूतः तदा पंचनवतिदिवसशते अतिक्रांते अष्टौ दिवसान्प्रवर्षति देवः एवं पौषे षट् माघे षोडश फा
ल्गुने चतुर्युता विंशतिः अथानंतरं वैशाखे दिवसत्रयमिति। एवं शतभिषगादिभ्यः पंचभ्यो मध्यादेकतमर्क्षेण वृष्टिप्रमाणम्॥ ॥ अमुमेवा
र्थमृषिपुत्र आह॥ माघे षोडश संख्यास्तु षोडशाष्टौ च फाल्गुने विंशतिः चैत्रमासे तु त्रयश्चेंद्राग्निदैवते॥ अष्टौ सौम्येऽथ षट् पौषे संख्यास्ता
सु च वर्षति एवमेतावंति दिवसानि पंचनवतिदिवसशते अतिक्रांते प्रवर्षतीत्यर्थः गर्भो बहुतोयदो भवत्यनेनैवाति दिष्टं यथा प्रवर्षणे तावती पानी
यसंख्या अर्धसंख्या वाचार्येण समाससंहितानिबंधनेऽप्युक्ताः पंचनिमित्तैः शतयोजनं तदर्धार्धमेकहान्यतः वर्षति पंचनिमित्ताद्रूपेणैकेन योगर्भ
इति निमित्तान्यानि पंचाचार्यो वक्ष्यति। पवनसलिलविद्युद्गर्जिताभ्रान्वितोयः स भवति बहुतोयः पंचरूपोऽभ्युपेत इति निमित्तान्येकोत्तरवृद्ध्या
मार्गशीर्षमासादिषु परिपठितानि। पौषे समार्गशीर्षे इत्यादि तथा मृगशीर्षाद्या गर्भा मंदफला इत्यनेन ग्रंथेन मार्गशीर्षजातानां गर्भाणां पौषशुक्ल
जातानां च मंदफलतोक्ता॥ ततोऽपवादमाह॥ सर्वैश्चलक्षणैर्विवृद्धो बहुतोयदो भवतीति तेन पंचनिमित्तसंयुक्तो गर्भः पुष्टो बहुतोयदो भवति॥

२७६

गर्भाणां पुष्टिनिमित्तान्यभिधीयंते तानि निमित्तानि च प्राक्प्रदर्शितानि विशेषनिमित्तैर्युक्तो गर्भो बहुतोयदो भवति ॥ तान्याह ॥ पंचनिमित्तैः शतयोजनं तदर्धार्धमेकहान्यतः वर्षति पंचनिमित्तारूपेणैकेन योगर्भः ॥ पंचभिर्निमित्तैः संयुक्तो गर्भ आसमंताद्योजनशतं वर्षति तदर्धार्धं तदा दीत्य नेनतस्य वयोजनशतस्य परामर्शं करोति पंचानां निमित्तानामेकैकनिमित्तहानौ सामान्येनैवाशेषविधिक्रमेणार्धमत्र योजनीयम् चतुर्निमित्तस्तदर्धं शतार्धं पंचाशद्योजनानि वर्षति त्रिनिमित्तो गर्भः तदर्धं सार्धानि द्वादश योजनानि वर्षति ॥ वर्षति पंच निमित्ताद्रूपेणैकेन यो गर्भ इति पंचानां निमित्तानामन्यतमद्रूपेणै केन वः संयुक्तो गर्भः समंतात्पंच योजनानि प्रवर्षति पंच संख्याग्रहणं निर्दिष्टावीवक्षमनिर्देशश्च कदोसार्थमिति प्रत्येकनिमित्तसंयुक्तानां गर्भाणां पादीय संख्यामाह ॥ ॥ द्रोणः पंचनिमित्ते गर्भे त्रीण्याढकानि पवनेन. षड्द्विकृतानवाभ्रैः स्तनितेन द्वादश प्रसवे ॥ वृष्टे रा ढकद्रोण प्रमाण परिज्ञानम् ॥ पराशर आह ॥ आढकाश्चतुरो द्रोणमपां विद्यात्प्रमाणतः धनुष्प्रमाणां मेदिन्यां भिद्याद्द्रोणं निवर्षणात् समे विशांगुलानाह द्विचतुष्कांगुलो कृते । भांडे वर्षति संपूर्णे ज्ञेयमाढकवर्षणम् ॥ तथाचाचार्य आह ॥ हस्तविशालं कुंडकमधिकृत्याम्बुप्रमाणनिर्देशः पंचाशत्पलमाढकमनेन मिनुयाज्जलम् पतितमिति द्रोणः पंचनिमित्ते पंचनिमित्तसंयुक्ते गर्भे द्रोणः प्रवर्षति षड्द्विकृता आढकानीत्यनुवर्तते विद्युता संयुक्ते गर्भे आढकानि षड् वर्षति नवाभ्रैरभ्रैर्मेघैः संयुक्ते गर्भे नवाढकानि प्रसवकाले वर्षति प्रसवकालेऽभिहित एवं पंचनवतेर्दिनशतेनैव प्रसवमायाति ॥ अमुमेवार्थं दृष्ट्वा गर्गश्चाह ॥ वातेनच्याढकं विद्यात्स्तनिते द्वादशाढकम् नवाढकं तथाभ्रेषु द्योतने षडाढकं । निमित्तपंचकोपेते द्रोणं वर्षति वासवः इति ॥ अत्रैव विशेषमाह ॥ क्रूरग्रहसंयुक्ताः करकाशनिमत्स्यवर्षदा गर्भाः शशिनि रवौ वा शुभसंयुक्ते वीक्षिते भूरिवृष्टिकराः ॥ गर्भनक्षत्रे चेत्क्रूरग्रहसंयुक्ते पापग्रहाधिष्ठिते गर्भाः करकाशनिमत्स्यवर्षदाः करकाशनिरुपलवृष्टिः मत्स्या मीनास्तैः संयुक्तं वर्षं ददाति शशिनि चंद्रे रवौ वा आदित्ये वा तत्र स्थिते तस्मिञ्छुभग्रहैः बुधजीवशुक्राणामन्यतमैः संयुते संयुक्ते दृष्टे च दृष्टे संयुतश्चासौ वीक्षितश्च तस्मिंस्तथाभूते भूरिवृष्टिकरा बहुवर्षदा गर्भाः ॥ अथ गर्भसंभवे सति विशेषलक्षणम् ॥ गर्भसमयेऽतिवृष्टिर्गर्भाभावाय निर्निमित्तकृता. द्रोणाष्टांशेऽभ्यधिके वृष्टे गर्भः स्रुतो भवति ॥ गर्भसमये गर्भग्रहणका

२७६

लेनिर्निमित्तकृता अतिवृष्टिः निमित्तं कारणं यथा प्रायो ग्रहाणामुदयास्तकाले समागमे मंडलसंक्रमे च पक्षक्षये तीक्ष्णकरायनांते वृष्टिर्गतेर्के
नियमेन चार्द्राम् इति एवं निमित्तरहिता अतिवृष्टिर्गर्भाभावाय गर्भविनाशाय भवति। द्रोणः पलशतद्वयं तस्याष्टांशः पलानां पंचविंशतिः तदभ्यधिके
वृष्टे गर्भः स्रुतः परिस्रुतो भवति न जलप्रद इत्यर्थः॥ अत्रैव विशेषमाह॥ गर्भः पुष्टः प्रसवे ग्रहोपघातादिभिर्यदि न दृष्टः आत्मीयगर्भसमये
करकामिश्रं ददात्यंभः॥ योगर्भो गर्भग्रहणकाले पुष्टः प्रसवे प्रसवकाले पंचनवतिदिनशते ग्रहोपघातादिभिस्तत्पातैः ग्रहोपघातः क
श्चिद्ग्रहस्तत्कालमेवाग्रहप्रदो भवति। यथा भौमः प्राजापत्ये श्रवणे इति। आदिग्रहणात् दिव्यांतरिक्षभौमैस्तत्पातैर्यदि न दृष्टः स चात्मीयगर्भ
समये पुनः पुरस्ताद्द्वितीयगर्भग्रहणकाले अंभः पानीयं करकामिश्रमुपलसंयुक्तं ददाति॥ अत्रैव दृष्टांतमाह॥ काठिन्यं याति यथाचि
रकालधृतं पयः पयस्विन्याः कालातीतं तद्वत्सलिलं काठिन्यमुपयाति॥ यथा पयस्विन्याः सक्षीराया धेनोः पयः क्षीरं चिरकालधृतं प्रभूतका
लमुषितं काठिन्यं कठिनतां याति गच्छति तद्वत्तथा कालातीतं सलिलं जलं काठिन्य काठिन्यमुपयाति प्राप्नोति सलिलमुपलतां प्रतिपद्यत इ
ति॥ अथ गर्भस्य पुष्टिलक्षणमाह॥ पवनसलिलविद्युद्गर्जिताभ्रान्वितो यः स भवति बहुतोयः पंचरूपाभ्युपेतः विसृजति यदि तो
यं गर्भकालेतिभूरि प्रसवसमयमित्वा शीकरांभः करोति॥ पवनो वायुः सलिलं जलं विद्युत् तडित् गर्जितं मेघशब्दः अभ्राणि मेघाः एतैः
पंचभिर्यो गर्भोन्वितो युक्तः स बहुतोयो बहुजलप्रदो भवति। यतः स गर्भः पंचरूपाभ्युपेतः पंचभी रूपैः संयुक्तैरतो बहुतोयदो भवति। एवं
विधो गर्भो गर्भकाले यद्यतिभूरितोयं प्रभूतपानीयं विसृजत्युत्सृजति तदा प्रसवसमयं प्रवर्षणकालमित्वा प्राप्य पंचनवतिदिनशते अतीते
शीकरांभः करोति जलबिंदुप्रभृतं वर्षतीत्यर्थः॥ ॥ ॥ इति भट्टोत्पलविरचितायां संहिताविवृतौ गर्भलक्षणं नामाध्याय एको
नविंशः॥ ॥ ॥ अत्र गर्भधारणाध्यायो व्याख्यायते॥ ॥ ॥ तत्रादावेव तासां लक्षणमाह॥ ज्येष्ठसिताष्टम्याद्याश्चत्वारो वायुधारणा दिव
साः मृदुशुभपवनाः शस्ताः स्निग्धघनस्थगितगगनाश्च॥ ज्येष्ठसितशुक्लपक्षे अष्टम्याद्याश्चत्वारो ये दिवसास्ते वायुधारणा दिवसाः वायुर्धारणा येषां

तेदिवसावायुनाधार्यंतियथातेषांप्रसवोनभवतितेचदिवसावायुनाधार्यं तेतेषांप्रसवोनभवतितेचदिवसाःमृदुशुभपवनाः शस्ताः शुभाः मृदुः सुखसंस्प
र्शः शुभउदक्शिवशक्रादिग्भवः पवनोवायुः मृदुशुभपवनाः शस्ताः तथास्निग्धघनस्थगितगगनाश्चशस्ताएवस्निग्धैरत्रदैः घनैः मेघैः स्थगितंछन्नमा
काशंयेषुदिवसेषु॥ अथतास्वेवविशेषमाह ॥ तत्रैवस्वात्याद्येष्टष्टेभचतुष्टयेक्रमान्मासाः श्रावणाद्याज्ञेयाः परिस्रुताधाराणस्तासु॥
तत्रैवतस्मिन्नेवज्येष्ठसितेस्वात्याद्येस्वातिपूर्वकेभचतुष्टयेनक्षत्रचतुष्केदृष्टेस्वातिविशाखानूराधाज्येष्ठाख्येक्रमात्परिपाट्याश्रावणपूर्वाश्चत्वारो
मासाज्ञेयाः श्रावणभाद्रपदाश्वयुजकार्तिकाख्याः ताश्चधाराणपरिस्रुताः स्युर्भवेयुः नजलप्रदाभवंति ॥ एतदुक्तंभवति॥ स्वातौदृष्टेयाश्राव
णेवृष्टिर्विशाखायांभाद्रपदेअनूराधायामाश्वयुजेज्येष्ठायांकार्तिकइति ॥ तथाकाश्यपः॥ ज्येष्ठस्यशुक्लाष्टम्यादिनक्षत्रेभगदैवते।धार
णाश्चतुरःप्रोक्तामृदुवातमसीरिता। नीलांजननिभैर्मेघैर्विद्युत्स्तनितमारुतैः विस्फुलिंगरजोधूमैःछन्नेशशिदिवाकरे। एकरूपाः शुभाज्ञेयाश्च
शुभाः सांतराः स्मृताः अनार्यैस्तस्करैश्चौरैः पीडाचैवसरीसृपैः ततःस्वात्यादिनक्षत्रैः चतुर्भिःश्रावणादयः परिपूर्णाः शुभास्तासुः सौम्याः
शिवस्तुभिक्षदः स्वातौतुश्रावणंप्रोक्ताद्दृष्टेथेंद्राग्निदैवते।भाद्रपदेत्ववृष्टिःस्यान्मैत्रेचाश्वयुजास्मृता। ऐंद्रेलकार्तिकेविद्यात्सृष्टेदृष्टिनिर्दृतिच
एतेषुयदिनोवृष्टिस्तदासौभिक्षलक्षणम्॥ पुनरपिविशेषमाह ॥ यदितास्सुरेकरूपाशुभास्ततः सांतरास्तेनशिवाय। तस्करभयदाः
चोक्ताः श्लोकाश्चाथनवासिष्टाः ॥ ताधारणायद्येकरूपाश्चतुर्ष्वपिदिवसेषुसदृशाःस्युर्भवेयुस्ततः शुभाः सांतराः सविशेषाविसदृशा
नशिवायश्रेयसेभवंति। ताश्चतस्करभयदाः चोरभीतिप्रदाश्चोक्ताः कथिताः॥ अत्रास्मिन्नर्थेप्यमीवासिष्टाः श्लोकावसिष्ठमहर्षिणोक्ताः

कथितालिख्यंते ॥ अथतानिचाह ॥ सविद्युतःसपृषतःसपांसूत्करमारुताः सार्कचंद्रपरिछन्नाधारणाः शुभधारणाः॥ यदातुविद्युतः
श्रेष्ठाःशुभाशाःप्रत्युपस्थिताः तदापिसर्वसस्यानांवृद्धिंब्रूयाद्विचक्षणः ॥ सपांसुवर्षाः सापश्चशुभाबालक्रियापिवापतत्रिणांसस्वनावा
क्रीडापांसुजलादिषु॥ रविचंद्रपरीवेशाःस्निग्धानात्यंतदूषिताः वृष्टिस्तथापिविज्ञेयासर्वसस्यार्थसाधका॥ मेघाःस्निग्धाःसंहताश्चप्रदक्षिणग

तिक्रियाः तदाऽस्यान्महतो वृष्टिः सर्वसस्याभिवृद्धये॥ एवंविधा धाराः शुभा धारणा भवंति। कीदृश्यः सविद्युतः विद्युत्तडित्तया सहिताः सहार्क
चंद्राभ्यां परिविष्टाभ्यां वर्त्तते मेघाच्छादिताः तदा वा रविचंद्रौ स्थगितौ या यास्तु यदा तु श्रेष्ठाः शोभना विद्युतस्ततडितो भवंति ताश्च शुभाशाः प्रत्युपस्थिताः शुभा वा
आशा दिशः शशिशिववह्न्यर्कदिशः ताभ्यः प्रति उपस्थिता उत्पन्नाः तदापि विचक्षणैः पंडितैः सर्वसस्यानामशेषधान्योद्वृद्धिं संपत्तिं ब्रूयाद्वदेत् सपांशु
वर्षा इति॥ सपांशुवर्षेण वर्त्तते यस्याः सपांशुवर्षाः सा पयः अद्भिः सहिताः अथवा बालानां शिशूनां शुभा क्रिया शोभना चेष्टा शुभेन कर्मणा जनशुभप्र
देन क्रीडनम्। पांशुना जलेन वा आदिग्रहणाद्गोमयकर्दमादिना रविचंद्राभ्यां शशिसूर्याभ्यां चंद्रसूर्यौ [illegible] परिवेशाः स्निग्धाः अरूक्षाः नात्यंतदूषिता
नातिविकृताः तथापि सर्वसस्यार्थसाधिका वृष्टिर्विज्ञेया यया वृष्ट्या सर्वसस्यानामर्थसिद्धिर्भवति सर्वाणि सस्यानि निष्पद्यंते इत्यर्थः मेघाः स्नि
ग्धा इति यदेवंविधा मेघघना दृश्यंते तदा सर्वसस्याभिवृद्धये निःशेषसस्यानामभिवेवर्धनाय महती प्रशस्ता वृष्टिः स्याद्भवेत् कीदृशा मेघाः
स्निग्धा अरूक्षाः संहताघनाः प्रदक्षिणगतिक्रियाः प्रादक्षिण्येन गतिक्रिया येषाम् यथा पूर्वस्यां स्थिता दक्षिणां व्रजंति दक्षिणस्यां पश्चिमां
पश्चिमायां उत्तरामुत्तरस्यां पूर्वमिति॥ ॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृत्तौ धारणाध्यायो द्वाविंशः॥ ॥ अथ प्रवर्षणा
ध्यायो व्याख्यायते॥ ॥ तत्र तावल्लक्षणमाह॥ ज्येष्ठां समतीतायां पूर्वाषाढादिसंप्रवृष्टेन। शुभमशुभं वा वाच्यं परिमाणं चांभसस्तज्ज्ञैः॥ ॥
ज्येष्ठमासस्य यं पौर्णमासी ज्येष्ठी तस्यां समतीतायां अतिक्रांतायां पूर्वाषाढमादितः कृत्वा सर्वेषु नक्षत्रेषु संप्रवृष्टेन प्रवर्षितेन तज्ज्ञैः पंडितैरं
भसो जलस्य परिमाणं शुभमशुभं वा वाच्यं वक्तव्यम् दृष्टे शुभमदृष्टे वाऽशुभमिति। तथा च गर्गः ज्येष्ठे मूलमतिक्रम्य मासि प्रतिपदं तरा। वर्षाद्वृष्टि
ज्ञानार्थं निमित्तान्युपलक्षयेत्॥ अधुना जलप्रमाणार्थमाह॥ हस्तविशालं कुंडकमधिकृत्यांबुप्रमाणनिर्देशः पंचाशत्पलमाढक
मनेन मिनुयाज्जलं पतितम्॥ हस्तविशालं हस्तविस्तीर्णं कुंडकं समपरिवर्तुलमधिकृत्य कृत्वा अंबुप्रमाणनिर्देशो जलप्रमाणकथनं
कार्यम् पंचाशत्पलमाढकमनेन प्रमाणेन पतितं जलं पानीयं मिनुयान्मापयेत् एतदुक्तं भवति। हस्तविशालं कुंडकं वर्षति देवे संस्थाप्य पतत्यज्जलं

पतितंतन्मापयेत् यद्यपिपलशतद्वयंभवतितदाढकोद्रोणोऽष्टष्टः यतउक्तं। पंचाशत्पलमाढकं। चतुराढकैर्द्रोणइति॥ तथाचसमाससंहितायाम्॥
ज्येष्ठस्यपौर्णमासीमतीत्यसमुद्रयायथावृष्टेः आषाढ्यैर्जलमानंमागधमानेनकृत्तमिति॥ यदुक्तं॥ ज्येष्ठंसमतीतायांपूर्वाषाढादिसंप्रवृष्टेन। शुभमशुभं
वावाच्यंपरिमाणंचांभसस्तज्ज्ञैरिति॥ तत्रवर्षप्रमाणमाह॥ येनधरित्रीमुद्राजनिताबिंदवस्तृणाग्रेषु। वृष्टेनतेनवाच्यंपरिमाणंवारिणःप्रथमम्॥
येनवृष्टेनधरित्रीमुद्रास्थमुद्राजनिताविगतधूलीजाता। अथवातृणानामग्रेषुजातेषुबिंदवोजलकणादृश्यंते तेनवृष्टेनपूर्वाषाढादौप्रथमजेन
नक्षत्रेणवर्षणंभवतितेनैवजलप्रमाणंलोकेवक्तव्यंनापरेणनक्षत्रेणवर्षेपितिभवत्स्वपिगर्भेषुधारणास्वपिसत्सुयदिप्रवर्षणकालेनव
र्षतितदाप्रसवकालेवृष्टिर्नस्यादित्युतइदमुपपद्यते। परिमाणंचांभसःप्रसवकालेवाच्यमिति॥ अत्रैवमतांतरमाह॥ ॥ केचिद्यथाभि
वृष्टंदशयोजनमंडलंवदंत्यन्ये। गर्गवसिष्ठपराशरमतमेतद्द्वादशान्नपरम्॥ केचिन्मुनयःकाश्यपप्रवृत्तयोयथाभिवृष्टंयावत्तावन्मा
त्रंवृष्टंकथयंति। प्रवर्षणकालेयथातथैकस्मिन्नपिप्रदेशेवृष्टेवर्षाकालेशोभनंवर्षंपूर्वाषाढादिप्रायम्॥ तथाचकाश्यपः॥ प्रवर्षणेयथादेशं
वर्षणंयदिदृश्यते। वर्षाकालंसमासाद्यवासवोबहुवर्षति॥ अन्येदेवलादयोदशयोजनमंडलंवृष्टंवदंति। प्रवर्षणकालेयोजनदशकेवृष्टेवर्षाका
लेअंबुकथनंनास्माद्गन्दइति॥ तथाचदेवलः॥ प्रवर्षणेयदावृष्टंदशयोजनमंडलं। वर्षाकालंसमासाद्यवासवोबहुवर्षति॥ गर्गवसिष्ठपराशराणामेतत्
मतंयथाद्वादशयोजनात्परंप्रवर्षणकालेयोजनद्वादशकेवृष्टेवर्षाकालेअंबुकथनंनास्माद्गन्दइति॥ तथाचगर्गः॥ आषाढादिषुवृष्टेषुयोजनद्वाद
शात्मकेप्रवृष्टेशोभनंवर्षंवर्षाकालेविनिर्दिशेदिति॥ पुनरपिविशेषमाह॥ येषुचभेषुअभिवृष्टंप्रसवत्तेषुवदवर्षतिप्रायः यदिनाप्यादिषुवृष्टंस्त
वेषुतदात्वनावृष्टिः॥ येषुचपूर्वाषाढादिषुभेषुनक्षत्रेषुअभिवृष्टंप्रवर्षणकालेभूयः पुनःतेष्वेवनक्षत्रेषुप्रायोबाहुल्येनवर्षतिप्रसवकालेआषा
दिषुपूर्वाषाढादिषुसर्वेषुनक्षत्रविंशत्स्वपिनक्षत्रेषुयदिनवृष्टंतदात्वनावृष्टिःप्रसवकालेभवतीति॥ ॥ अधुनानक्षत्राणांवृष्टिप्रमाणमाह॥ ॥
हस्ताद्यसौम्यचित्रापौष्णधनिष्ठासुषोडशद्रोणाःशतभिषगैंद्रस्वातिषुचत्वारःकृत्तिकासुदश। श्रवणमघानुराधाभरणीमूलेषुदशचतुर्युक्ताः॥

२८

98

फाल्गुन्यां पंचकृतिः पुनर्वसौ विंशतिर्द्रोणाः ऐंद्राग्न्याख्ये वैश्वे विंशतिः सार्पे भे दशत्र्यधिकाः आहिर्बुध्न्यार्यम्णप्राजापत्येषु पंचकृतिः। पंचदशाजे पुष्ये
च कीर्तिता वाजिभे दश द्वौ च। रौद्रे षोडश कथिता निरुपद्रुतेष्वेते ॥ हस्तः आप्यं पूर्वाषाढा सौम्यं मृगशिरः चित्रा पौष्णं रेवती धनिष्ठा एतेष्वेकतमेन प्रवर्षण
काले यदि वर्षति तदा प्रत्येकं षोडश द्रोणा वर्षति। एवं शतभिषक्। ऐंद्रं ज्येष्ठा स्वातिः एतेषु चत्वारो द्रोणा वर्षति कृत्तिकासु दश द्रोणाः श्रवणे मघानुर
राधा भरणी मूलं। एतेषु दश चतुर्युक्ताश्चतुर्दश द्रोणाः फल्गुन्यां पूर्वफल्गुन्यां पंचकृतिः पंचविंशतिर्द्रोणाः पुनर्वसौ विंशतिर्द्रोणाः ऐंद्राग्न्याख्ये विशा
खायां। वैश्वे उत्तराषाढायां विंशतिर्द्रोणाः सार्पभे आश्लेषायां दश त्र्यधिकास्त्रयोदश द्रोणाः आहिर्बुध्न्ये उत्तरभद्रपदायां आर्यम्णे उत्तरफल्गुन्यां। प्राजा
पत्ये रोहिण्यां। एतेषु पंचकृतिः पंचविंशतिर्द्रोणाः आजे पूर्वभद्रपदायाम् पुष्ये च पंचदश द्रोणाः कीर्तिताः उक्ताः आश्विन्यां वाजिभे दश द्वौ च द्वादश द्रो
णाः रौद्रे आर्द्रायां षोडश द्रोणाः कथिता उक्ताः य एते प्रवर्षणकाले द्रोणा नक्षत्रेषूक्तास्ते निरुपद्रुतेषु उपद्रवरहितेषूक्ता वाच्या इति॥ तथा च समास
संहितायाम्॥ दशयुक्ताश्चित्रकनैतिथिरसाष्टदिग्विषयरापजलतिथिभिः तिथिरसरसैश्च विरसामदशकृताः षड्विहीनाश्च॥ जलमकृदशक
सहिता जलरसयुक्ताः षड्नाश्च। विवसतिथिपक्षसहिताश्चाश्विन्यादिषु जलद्रोणा इति॥ अत्रैव विशेषमाह॥ रविरविसुतकेतुपीडिते भे क्षितितन
यत्रिविधाद्भुताहते च। भवति च न शिवं न चापि वृष्टिः शुभसहिते निरुपद्रवे शिवं च ॥ रविरादित्यः रविसुतः सौरः केतुः शिखी एतेषामन्यतमेन भे
नक्षत्रे उपहते तत्रस्थित इत्यर्थः तथा क्षितितनयेनांगारकेनाभिहते भिन्ने घातिते वक्रातिवक्रमध्यगमनयोगतारकभेदानामन्यतमेन तथा
त्रिविधेनोत्पातेन दिव्यांतरिक्षभौमेन चाहते न शिवं श्रेयो न चापि वृष्टिर्भवति शुभसहिते बुधजीवशुक्राणामन्यतमेन संयुक्ते निरुपद्रुते अथो
त्पातरहिते प्रवर्षणे शिवं श्रेयश्च भवति॥ तथा च गर्गः॥ सूर्यसौराहते वाथ नक्षत्रे भौमघातिते। उत्पातैस्त्रिविधैर्वापि राहुणा केतुनापि वा। अवृ
ष्टिमशुभं विद्याद्विपरीते शुभं वदेदिति ॥ ॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ प्रवर्षणं नामाध्यायस्त्रयोविंशः ॥ २
अथ रोहिणीयोगाध्यायो व्याख्यायते ॥ ॥ ॥ तत्रादावेवागमप्रदर्शनार्थमाह ॥ ॥ ॥ कनकशिलाचयविवरजलकुसुमासंग

२८

मधुकरानुकूलतेबहुविहगकलहसुरयुवतिगीतमंद्रस्वनोपवनेसुरनिलयशिखरिशिखरेबृहस्पतिर्नारदाय ॥ याजाह ॥ गर्गः पराशरः कश्यप
श्चयांशिष्यसं[illegible]भ्यः तानवलोक्ययथावत्प्राजापत्येंदुसंप्रयोगार्थान् अल्पग्रंथेनाहंतानेवाभ्युद्यतोवक्तुम् ॥ यान् प्राजापत्येंदुसंप्रयोगार्थान्
प्राजापत्यंरोहिणीतस्याः इंदुनाचंद्रेणसहसंप्रयोगः समागमस्तत्रयानर्थान् शुभाशुभान् बृहस्पतिः सुरगुरुः नारदायाह नारदोनाममुनिः
तस्मैप्रोक्तवान् कस्मिन्स्थानेसुरनिलयशिखरिशिखरेसुरनिलयशिखरीमेरुः सुरादेवाः तेषांनिलयः स्थानम् सुरनिलयः चासौ
शिखरीपर्वतः तस्यशिखरेपृष्ठेयत्तदुपवनमुद्यानंतस्मिन् कीदृशेउपवनेकनकशिलाः सुवर्णपाषाणास्तासांचयः संचयस्तत्रयानिवि
वराणिछिद्राणितेषुयेजातास्तरवोवृक्षाः तेषुयानिकुसुमानिपुष्पाणितेषुचमधुकराणांभ्रमराणांयआसंगआसक्तिः तंश्लेषस्तेनाकुल
तम् शब्दोयस्मिन्नुपवनेतथाबहवोनानाप्रकारायेविहगाः पक्षिणस्तेषांकलहआलापास्तेनतथासुरयुवतयोदेवास्त्रियोविद्याधर्यः
तेषांगायमानानांगीतेयोसौमंद्रोमधुरःस्वनःशब्दःस्यतोपवनेतस्मिन् तथागर्गःपराशरःकश्यपश्चशिष्यसं[illegible]भ्यः कात्रसमूहेभ्यो
यान्योगानाख्येतोवान् उत्सवानेवालोक्यविचार्ययथावत्स्फुटमल्पग्रंथेनहंतानेवप्राजापत्येंदुसंप्रयोगार्थान्वक्तुंगादिकमभ्युद्यतोस्मी
ति ॥ अथसरोहिणीयोगःकस्मिन्कालेविचार्यइत्येतदाह ॥ ॥ प्राजेषमाषाढतमिस्रपक्षेरूपाकेरणोपगतंसमीक्ष्य। वक्ष्यामि
दृष्टंजगतोशुभंवाशास्त्रोपदेशाद्गुरुचिंतकेन ॥ योगोयथानागतएववाच्यः साधिक्षपयोगःकरणेमयोक्तः चंद्रप्रमाणाकृतिवर्णमार्गैरुत्पात
वातैश्चफलंनिगद्यम् ॥ आषाढमासस्यतमिस्रपक्षेकृष्णपक्षेप्राजेशरोहिणीरूपाकरेणचंद्रेणोपगतंसंयुक्तंसमीक्ष्यदृष्ट्वायहचिंत
केनदैवज्ञेनशास्त्रोपदेशात् ग्रंथागमात् जगतोजनस्येष्टंशुभमशुभमनिष्टंवावक्तव्यम् कथनीयम् योगोयथेतियथायेनप्रकारेणायो
गोरोहिणीयोगोरोहिणीयोगोनागतोभावीएवंवाच्योवक्तव्योत्रसाधिक्षपयोगोनक्षत्रयोगकरणेपंचसिद्धांतिकायांमयोक्तःकथितः ॥ तथाव
पंचसिद्धांतिकायाम् ॥ बुद्ध्वाशशिविक्षेपंछायांवातारारशशांकविवरंच। संसाध्यचवक्तव्यः पश्चात्तारासमायोगः इत्यादिनाग्रंथेनेति ॥ तथाचब्रह्म

२८

सिद्धांते ॥ ध्रुवकाह्वनः पश्चादधिकः शाखार्जितेन्यथायोगः अन्यच्च रुमेलकवदिति चंद्रप्रमाणाद्युति चंद्रस्य प्रमाणेन बिंबपरिमाणेन कान्त्याकां
त्यावर्णेन सितगाधिकेन मार्गेण यथा पूर्वोद्यास्वष्टस्तु दिक्संस्थित्या एते स्तथोत्पातैस्तत्कालजातैरुल्कापातादिभिर्वातैश्चानिलैः शुभाशुभं फलं
निगद्यं वक्तव्यमिति ॥ ॥ अथ तत्र विधानमाह ॥ पुराद्युदग्यत्पुरतोपि वास्थलं प्रकोपितस्तत्र हुताशनतत्परः ग्रहान्सनक्षत्रगणान्समालिखे
त्सधूपपुष्पैर्बलिभिश्च पूजयेत् ॥ सरत्नतोयौषधिभिश्चतुर्दिशं तरुप्रवालापिहितैः सुपूजितैः अकालमूलैः कलशैरलंकृतं कुशास्तृतं
स्थंडिलमावसेद्द्विजः ॥ पुरान्नगराद्युदक्पूर्वस्यां दिशि यत्स्थलं तत्र तस्मिन्स्थले द्विजो ब्राह्मणः प्रकोपितो दिनत्रयं स्थितस्तत्र चक्रावोप
वासो हुताशनतत्परो अभिहवनपरः ॥ तथा च गर्गः नगराद्युपनिष्क्रम्य दिशं प्रागुत्तरां शुचिः विविक्ते प्रस्थले देशे देवतायतनेपि वा राज्ञा नियुक्तो दैवज्ञः
कृतशौचो जितेंद्रियः निमित्तकुशलो धीरः शुक्लांबरसमावृतः उपवाससमायाति चतुर्दष्टमीसंयतव्रतः ततोष्टम्याः परे यस्मिन्दिने संयुज्यते शशी ।
प्राजापत्येन च ततो निमित्तान्युपलक्षयेत् ग्रहान्सनक्षत्रगणान्समालिखेत् तस्मिन्स्थले ग्रहानादित्यादीन्सनक्षत्रगणान्नक्षत्रसमूहेन सहिता
न्समालिखेत् सम्यगालिखेत् तानालिख्य सधूपपुष्पैः पुष्पधूपसहितैः बलिभिरुपहारैः पूजयेदर्चयेत् तथैवंविधं स्थंडिलं द्विजश्चावसेदधिव
सेत् सरत्नैर्मणिभिस्तोयैर्जलैरौषधिभिः सुगंधद्रव्यैः सहयं वर्तते कलशास्तैः चतुर्दिशमलंकृतं शोभितम् अन्यच्च किंभूतैस्तरुप्रवा
लापिहितैः तरूणां वृक्षाणां ये प्रवालाः पल्लवास्तैरासमंतादपिहिता आच्छादितास्तैस्तथा सुपूजितैः शोभनं कृत्वा चंदनादिभिः चर्चितैः
अकालमूलैरकालानि मूलानि येषामग्निपाकेन कृष्णवर्णाभास अपायेषाम् नसंति कीदृशं स्थंडिलं कुशास्तृतम् दर्भैराच्छादितमिति
ततः तत्र किं कुर्यादित्याह ॥ ॥ आलभ्य मंत्रेण महाव्रतेन बीजानि सर्वाणि निधाय कुंभे। आद्यानि चामीकरगर्भतोयैर्होमो मरुद्वारुणा
सौम्यमंत्रैः ॥ ततः सर्वाणि बीजानि महाव्रतेन महाव्रतनाम्ना मंत्रेणालभ्याभिमंत्र्य कुंभे निधाय विनिक्षिप्य आद्यानि मज्जनीयानि कैः चा
मीकरं सुवर्णादि गर्भकुशांश्च विद्यंते येषु तैस्तोयैः तथा होमाग्निर्होमो मरुद्वारुणसौम्यमंत्रैः मरुद्वायोर्वरुणस्यापां पतिः सौम्यः एषां मंत्रैर्होमं कार्यं

मः कार्यः ।

१००

केषांचित्पाठे सौम्यचरुर्वारुणसौम्यमंत्रैः चरुः स्थालीपाको वारुणसौम्यमंत्रैर्होमो होतव्य इति ॥ तत्किं कुर्यादित्याह ॥ अदृष्टां पता
कामसितां च विद्याद्दंडप्रमाणात्त्रिगुणोच्छ्रितां च। आदौ कृते दिग्ग्रहणेन सम्यग्धातृभस्य तारायोगगते शशांके ॥ अदृष्टां स्वहस्तेन कृतां
पताकां वैजयंतीमसितां कृष्णवर्णां विद्यात् उच्छ्रयेत् तां च दंडप्रमाणां चतुर्हस्तसंमितान् चतुर्हस्तो दंडः ॥ तथा च पुराणे॥ चतुर्हस्तो धनुः
स्मृतः धनुर्दंडयुगं नालीतुल्यान्येतान्यथांगुलैरिति। एवं चतुर्हस्तां पताकां त्रिगुणोच्छ्रितां द्वादशहस्तोच्छ्रितामित्यर्थः॥ एतदुक्तं भवति ॥ ॥
द्वादशहस्तोच्छ्रिते काष्ठे तं निबध्नीयादिति। आदौ प्रथमं दिग्ग्रहणे दिक्साधने कृते तत्पताकया नभस्वान्वायुः शशांके चंद्रे रोहिणीयोगगते
यास्यो यस्नीतद्यः कस्यां दिशि वहतीति तत्र दिक्साधनमाचार्येण पंचसिद्धांतिकायामुक्तम् ॥ तद्यथा॥ शंकुः चतुर्विस्तारे वृत्ते छायाप्रवे
शनिर्गमात् अपरैन्द्रीदिक्सिद्धिः यवाच्च याम्योत्तरे मध्ये। सलिलसमीकृतायां अवनौ मध्ये चतुर्विंशत्यंगुलप्रमाणेन सूत्रेण कर्कटकेन
वृत्तमालिखेत् तस्य वृत्तस्य विष्कंभोऽष्टाचत्वारिंशदंगुलानि भवंति। तस्मिन् शंकुचतुर्विस्तारे वृत्ते मध्यप्रदेशे शंकुः देयः ततः पू
र्वकपालस्थे सवितरि तस्य शंकोः छाया तद्वृत्तपरिधौ यत्र प्रवेशं करोति तत्र बिंदुर्देयः सा ऐंद्री पूर्वादिग्भवति। ततोऽपरकपालस्थे सवितरि
तस्यैव शंकुच्छाया तद्वृत्तपरिधौ यत्र निर्गमं करोति तत्र बिंदुर्देयः सैंद्री पूर्वदिग्भवति। एवं छायाप्रवेशनिर्गमनादपरैन्द्रीदिक्सिद्धिरिति। ततः
तयोः बिंद्वोः मत्स्यकावगाहि सूत्रप्रसार्य रेखां कुर्यात् सा प्राच्यपरै रेखा भवति। यावच्च याम्योत्तरे साध्ये याम्योत्तरे दक्षिणोत्तरे च यावत्
साध्ये॥ यथा तत्साधनं प्रदर्श्यते॥ तत्रैकं बिंदुं मध्ये कृत्वा द्वितीयं बिंदुमादाय तावत्सूत्रेण वृत्तमालिखेत् एवं द्वितीयं बिंदुं मध्ये कृत्वा
परं बिंदुमादाय तावत्सूत्रेणालिखेत् एवं वृत्तद्वयस्य परामर्शात् प्रवेशान्मध्ये यवाकार उत्पद्यते तस्य तन्मध्यगता रेखा कार्या। सा च
याम्योत्तरा एवं दिक्चतुष्टयसिद्धिः ततः स्वबुद्ध्या विदिशः साध्याः एवं दिक्स्थापनं कृत्वा कृते दिग्ग्रहणे तन्मध्ये पताकां निरोपयेत् तथा
रोहिणीयोगगते शशांके चंद्रे वायुर्ग्रसितः कस्यां दिश्युद्गतः कार्ययातीति ॥ अथ वातेन शुभाशुभमाह ॥ तत्रार्धमासाः प्रहरैर्विकल्प्या

१००

वर्षानिमित्तं दिवसास्तदंशैः सद्येन गच्छनु शुभदः सदैव यस्मिन्प्रतिष्ठाबलवान्स वायुः ॥ तत्र तस्मिन्नरोहिणीयोगे प्रहरैरहोरात्राष्टभागैरर्धमा
साः पक्षा विकल्प्याः विकल्पनीयाः किमर्थं वर्षानिमित्तं वर्षासमयज्ञानार्थम् एतदुक्तं भवति। यस्मिन्नहोरात्रे रोहिण्याः सह चंद्रमा युज्यते तत्र सू
र्योदयात्प्रभृति प्रथमं प्रहरं यावच्छोभनो वातो वहति तदा श्रावणस्य प्रथमपक्षे देवो वर्षति अशुभे वाते अनावृष्टिस्तत्रैव वक्तव्या। एवं द्वितीय
प्रहरे शोभने वाते वहति श्रावणस्य द्वितीयपक्षे वर्षति तृतीये भाद्रपदस्य प्रथमपक्षे चतुर्थे भाद्रपदस्य द्वितीयपक्षे वर्षति। तथा रात्रौ प्रथमप्रह
रे शोभनवाते आश्वयुजे प्रथमपक्षे वर्षति। द्वितीयप्रहरे द्वितीयपक्षे तृतीयप्रहरे कार्तिके प्रथमपक्षे चतुर्थे द्वितीयपक्षे वर्षति अशुभे वाते अनावृ
ष्टिः एवं यथासंभवं योज्यम् दिवसास्तदंशैरिति तदंशैः प्रहरांशैर्दिवसा वाच्याः प्रहरेण यदि पक्षस्तत्प्रहरार्धेन सप्त मासार्धानि दिवसानि प्रहर
चतुर्भागेन पादोनानि च वाच्याः एवमादि। केचित्तेनात्र मासाः प्रहरैर्विकल्प्या इति पठंति। तेनांतरोक्ते न नभस्वता अत्र योगे प्रहरैर्मासा विकल्प्या वि
कल्पनीया निश्चयीकर्तव्या इत्यर्थः वर्षानिमित्तं वर्षासमयनिमित्तं दिवसास्तदंशैस्तस्य प्रहरस्यांशैर्भागैर्दिवसा विकल्प्याः प्रहरस्य त्रिंशत्तमो भा
गो दिवस इति यदि तत्र दिने सूर्योदयात्प्रभृति प्रहरं यावच्छोभनो वातो वहति तदा श्रावणे समग्रं वातं वर्षति एवं द्वितीयप्रहरे भाद्रपदं तृतीये माश्व
युजं चतुर्थे कार्तिकमिति। एवमशोभने वाते अनावृष्टिस्तदंशैर्दिवसा वाच्याः एतदेव व्याख्यानं शोभनं यस्मादनंतरसूत्रमाचार्येण ॥ गर्गपराशर
मतं वच्मि गर्गादीनां च मतं। तेनात्र मासाः प्रहरैर्विकल्प्या इति नार्धः प्रहरैः। तथा च गर्गः उदक् चोदग्वाहः ध्वं चतुर्भागो विभज्य च। क्षितातितार्ध
मासानां चतुर्णामपि पलक्षयेत्। आचार्येण च रोहिणीयोगस्यातिदेशः कृतः गर्गोक्तेन च वातचक्रेण प्रहरैर्मासाः ॥ तथा च गर्गः ॥ दिनार्धमथवा
वाह्यौर्द्धौ मासौ तत्र वर्षति अहस्त्वपश्चिमे भागे पश्चिमौ द्वौ तु वर्षति ॥ अथ पूर्वं वाति त्वन्यभागं तत्पश्चिमं ततः मध्याह्ने वाति चेद्वायुर्मध्यौ स
मौ तु वर्षति भाद्रपदाश्वयुजौ च एवं मासावेतौ तु मध्यमौ। एतयोरपि निर्देश्याः वर्षारात्रस्य संपदः ॥ तथा च ऋषिपुत्रः ॥ दिनार्धं वाति चेद्वायुः पूर्वप
श्चिममेव वा। मासद्वयं तदा वर्षाविभागः पूर्वपश्चिमे। समग्रं दिवसं वायुर्यदि वाति तु लक्षणः मासांस्तु श्रावणाद्यान्वै तेषां संपद्धि निर्दिशेत् ॥ तस्मा

तेनात्रमासाद्भुतिशोभनः पाकः सव्येनगच्छन्नितिनभस्वान्सव्येनप्रादक्षिण्येनगच्छञ्जन्तूनांसर्वकालंशुभदः यथा पूर्वस्यांस्थित्वाआग्नेय्यांवातिततोदक्षिणां
ततोनैरृतींततः पश्चिमांइत्यनेनप्रकारेणेति। अर्थादेवापसव्येनगच्छन्नशुभदः यस्मिन्प्रतिष्ठेति यस्मिन्वायौप्रतिष्ठास्थैर्यमादिक्षु भवति सएवबलवान्स
नशुभाशुभंवदेत्‌ केदेवंव्याचक्ष्यते। आदित्यास्तमयंयोवायुः सप्रतिष्ठेत्येतन्नशोभनम्‌॥ तथाच ऋषिपुत्रः वाद्यांतंमारुतंवापियोवायुःप्रतिवायति। त
त्रैयाबलवान्वायुस्तस्यैवफलमादिशेत्‌॥ अथतच्छुभाशुभमाह॥ दृष्टंतद्योगेकुरितानितानिसंतीक्ष्बीजानिरितानिकुंभे। येषांतुयोंशोंकुरितः योंशोंकुरित
तदंशस्तंतेषांतुवृद्धिंसमुपैतिनान्यः॥ रोहिण्यास्तुशशिनोयोगेदृष्टंतंवानिबीजानिकुंभेप्राक्स्थापितानितेषांयान्यंकुरितानितान्येकस्मिन्वर्षेसंति
भवंति। किंयस्मादर्थेयेषामपिकुंभस्थितानांयोंशोयोभागोंकुरितस्तदंशस्तंभागस्तेषामेववृद्धिंसमुपैतिप्राप्नोतिनान्यइति॥ अथरोहिणीयो
गेयद्यक्षस्यातितदाह॥ शांतपक्षमृगरावितादिशानिर्मलंवियदनिर्भितानिलः शस्यतेशशिनिरोहिणीगतेमेघमारुतफलानिवच्म्यतः॥
शशिनिचंद्रेरोहिणीगतेरोहिणीयोगतेइदमिदंशस्यतेन्यस्यतेशांतैरनर्काभिमुखैर्मधुरस्वनैश्चपक्षिभिर्विहगैर्मृगैः चारणपशुभिर्दिशः
आशाराविताःशब्दकारिताः वियदाकाशंनिर्मलंविमलमनिलोवायुरनिंदितःउत्सितः तथाचगर्गः॥ योगेस्यतुप्रशस्तावाताः ह्लादयंतःसुखप्रदः
प्रदक्षिणाःश्रेष्ठतमाः पूर्वपूर्वोत्तराइति। अतोस्मादनंतरंमेघानामाराणांमारुतस्यचवायोःफलानिवक्ष्यामिकथयामिति॥ अधुनात्वन्येवाह॥
क्वचिदसितसितैःसितैश्चापिचित्रैःक्वचिदसितैर्भुजगांगैरिवांबुवाहैः वलितजठरपृष्ठमात्रदृश्यैःस्फुरिततडिद्रसनैर्वृतंविशालैः॥ विकसित
कमलोदरावदातैरकणाकरच्छतिरंजितोपकंठैः कुरितमिववियद्घनैर्विचित्रैर्मधुकरकुंकुमकिंशुकावदातैः॥ वियदाकाशमंबुवाहैर्मेघैः
विशालैर्विस्तीर्णैर्वृतंव्याप्तंकीदृशैरंबुवाहैर्भुजगैःसर्पैरिवकिंभूतैःसर्पैः वलितजठरपृष्ठमात्रदृश्यैः वलितानांस्वकायपरिवेष्टितावयवानांजठरपृ
ष्ठमात्रंदृश्यंयेषांतुभुजगानां। क्वचिज्जठरमेकदेशंक्वचित्पृष्ठैकदेशंइत्यसितसितानामत्रोपमानम्‌ यतःसर्पाणामुदरंश्वेतवर्णंभवतिपृष्ठंकृष्णवर्णं
मतः क्वचिदसितसितैः कृष्णैःशुक्लैश्चश्यामिश्रवर्णैः क्वचिच्चासितैःशुक्लवर्णैरेवक्वचिच्चासितैःकृष्णवर्णैर्वियन्मेघैर्वृतंतद्रतडितः विद्युतस्ताए

१०१

वस्फुरिताचलितारसनाजिह्वा येषां तैः तथा विकसितं प्रफुल्लं कमलं पद्मं तस्योदरं गर्भः तद्वद् अवदाताः शुभ्रास्तैस्तथा अरुणकराणां सूर्यरश्मी
नां लोहितकांतीनां व्याप्तिः कांतिस्तया रंजितानि सरागान्युपकंठानि कंठसमीपानि येषां तैः विचित्रैर्नानावर्णैर्मेघैर्घनैः वियदाकाशं कुरितं रंजित
मिव। किंभूतैः मधुकरकिंशुकोडुमावदातैः मधुकराः भ्रमराः असिताः किंशुकः पुष्पविशेषः तद्वदवदातैः सितगौरैस्तद्वद्गौरैरिति ॥ अन्यच्च ॥
असितघननिरुद्धमेव वा चलिततडित्स्फुरचापचित्रितम्। द्विपमहिषकुलाकुलीकृतं वनमिव दावपरीतमंबरम् ॥ अथवांबरमाकाशं व
नमरण्यमिव दावपरीतं दावो वनाग्निस्तेन परीतं व्याप्तमिव यतः असितैः कृष्णैः घनैः मेघैर्निरुद्धं स्थगितं तथा चलिताभिस्तडिद्भिः स्फुरद्भिर्दीप्तिभिः
सुरचापैरिंद्रधनुर्भिश्चित्रितं नानावर्णतामुपगतं। कीदृशमुत्प्रेक्ष्यते। द्विपमहिषकुलाकुलीकृतं वनमिव मेघानां तत्सादृश्यम्। द्विपकुलैः हस्तिसमूहैः
महिषकुलैश्चाकुलीकृतम्। सोद्यमैस्तैः संयुक्तमतो दावपरीतं वनमिवोत्प्रेक्ष्यते ॥ अन्यदप्याह ॥ अथवांजनशैलशिलानिचयप्रतिरूप
धरैः स्थगितं गगनम्। हिममौक्तिकशंखशशांककरद्युतिहारिभिरंबुधरैरथवा ॥ अथवांजनशैलस्यांजनपर्वतस्य शिलानां पाषाणानां
यो निचयः समूहः तान् प्रतिरूपधरैः तादृशैरंबुधैर्मेघैः स्थगितमाछादितं गगनमाकाशम्। कृष्णैरित्यर्थः। अथवा हिमस्य तुषारस्य मौक्तिकस्य मु
क्ताफलानां शंखस्य कंबुनः शशांककराणां चंद्ररश्मीनां द्युतिहारिभिः कांतिचोरकैरंबुधरैर्मेघैः श्वेतवर्णैः स्थगितमाकाशमित्यर्थः ॥ ॥
अन्यच्च ॥ तडिद्धेमकक्ष्यैर्बलाकाग्रदंतैः स्रवद्वारिदानैः चलद्भ्रांतहस्तैः विचित्रेंद्रचापध्वजोच्छ्रायशोभैस्तमालालिनीलैर्वृतं वा घनागैः ॥
अथवा मेघा एव नागा हस्तिनस्तैर्वियद्वृतं व्याप्तम्। तडितो विद्युतस्ता एव हेमकक्ष्याः सौवर्णानि मध्यबंधनानि येषां बलाहकाः पक्षिविशेषास्त
एवाग्रदंताः पुरोवर्तिनो रदाः शुक्लत्वाद्येषां स्रवद्वारि वर्षज्जलं तदेव दानं मदजलं येषाम्। चलंति भ्रांतानि चाग्राणि यानि तान्येव हस्ताः करा येषां
विचित्रं नानावर्णमिंद्रचापमिंद्रधनुस्तदेव ध्वजोच्छ्राययशोभा येषां उच्छ्रितं चोपरि ध्वजं ह्युगजानां भवति तमालो [illegible] अलिर्भ्रमरः
तद्वन्नीलत्वं येषां तैस्तथाभूतैः ॥ अन्यच्च मेघवर्णनमाह ॥ संध्यानुरक्ते नभसि स्थितानामिंदीवरश्यामरुचं घनानां। हंसानिपीतांबरवेष्टितस्य

कांतिं हरे चोरयतां यदा वा ॥ घनानां मेघानां नभस्याकाशे संध्यानुरक्ते संध्यारागरंजिते लोहिते स्थितानां कीदृशानामिंदीवरश्यामरुचां । इंदीव
रं नीलोत्पलं तद्वत् श्यामा रुक् कांतिर्येषाम् तथाहतानां हृदानिसहृताः । अत एवोत्प्रेक्ष्यते । हरेर्भगवतो नारायणस्य पीतांबरवेष्टितस्य पीतवस्त्रप्रावृत
शरीरस्य कांतिं दीप्तिं चोरयतां मुष्णतां वा यदा यस्मिन्नभसि ॥ अथ मेघवर्णनमाह ॥ सशिखिचातकदर्दुरनिःस्वनैर्यदि विमिश्रितमं
दपटुस्वनाः खमवतत्य दिगंतविलंबिनः सलिलदाः सलिलौघमुचः क्षितौ ॥ एवं यदा सलिलौघमुचो मेघाः सलिलस्य जलस्यौघं समूहं मुं
चंति परित्यजंति यतः क्षितौ भूमौ सलिलदा जलं ददातीत्यर्थः अथ चैवंविधाः सलिलदा मेघाः क्षितौ भूमौ सलिलौघमुचो भवंतीति यत्स्वनाः कीदृशाः
शिखिमयूराः चातकाः सारंगाः तेषां निःस्वनाः शब्दाः शिखिचातकानां दर्दुराणां ये निःस्वनाः तैर्विमिश्रिता मंद्रा मधुराः पटवः स्वनाः शब्दाः येषां
ते तथाविधाः तथा खमाकाशमवतत्य व्याप्य यदि दिगंतविलंबिनः दिगंते आशापर्यंते तेषु ये विलंबंते ते तथाविधाः ॥ अन्यच्चाह ॥ निगदि
तरवैर्जलधरजालैस्त्वहरेकमर्कांशुस्थगितं ह्यहर्दिनद्वयं वा । अथवा अहर्दिनमेकमनेन प्रकारेण सुभिक्षं भवति तथा भूरवनिर्मुदितजना प्रहृष्ट
लोकाः प्रचुरजना भूरितोया च भवति ॥ तथा च गर्गः ॥ दधितथामलक्रौंचताम्राभारुणसन्निभाः शुककौशेयमांजिष्ठास्तपनीयसमप्रभा । अ
च्छिन्नमूलास्तु स्निग्धाः पर्वताकारसन्निभाः घना घनं प्रशस्यंते विद्युत्स्तनितसंकुलाः ॥ तथा च पराशरः ॥ रोहिणीयोगे पुनः प्रदक्षिणोपसृष्टदुर्मति
तः स्निग्धवर्त्तिकाभ्राणि विद्युद्वक्रचापालंकृतानि स्वादुसुरभिविमलशिशिरतापच्छिद्वांभसां वृष्टिः क्षेमसुभिक्षाय ॥ यावतो दिवसान्निमि
त्तप्रादुर्भावानुबंधस्तावद्वर्षाणि सुभिक्षक्षेममारोग्यं चाद्विलवासिनां बिलेभ्यो निष्क्रमणं स्त्रीपुरुषबालानां प्रमोदः पक्षिणां क्षीरपुष्पफलवृ
क्षसेवनं तद्गुणामक्लिष्टतापत्रता पुरपौरहिताय ॥ तथा च समाससंहितायाम् ॥ आषाढवकुलपक्षे चित्रिसकरे रोहिणीसमायुक्ते यदि गगन
दृग = ममलमत्यर्थं तीव्ररश्मिः सहस्रांशुः ॥ सलिलगुरुनवजलधरतडिल्लतालोलरंजितदिगंतः आसितनलभेकचातककदंबविमिश्रमा
कारम् ॥ क्षितितनयरविजरहितः स्फटिकनिभश्चंद्रमा निरुत्पातः मरुतश्च पूर्वपूर्वोत्तराः शांतमृगविरुताः ॥ ॥ अथाशुभा

१०२

102

नां मेघानां लक्षणमाह ॥ रूक्षैरल्पैर्मारुताक्षिप्तदेहैरुष्ट्रध्वांक्षप्रेतशाखामृगाभैः । अन्येषां वा निंदितानां स्वरूपैर्युक्तैः श्वभ्रैर्नैव शिवं नापि वृष्टिः ॥

मे

एवंविधैरभ्रैर्नाशिवं श्रेयो न चापि वृष्टिर्वर्षणं भवति। कीदृशैः रूक्षैः रक्तिमैः अल्पैर्लघुभिः मारुतेन वायुना आसमंतात् क्षिप्ताः प्रेरिताः देहाः शरीराणि येषां तैः उष्ट्रः करभः ध्वांक्षः काकः प्रेतः शवः शाखामृगो वानरः एतेषां सदृशी आभा मा(?) दृश्यमा(?) ... र्वा येषां तैस्तथा(?) तैरन्येषामपरेषां वा प्राणिनां

दि

निंदितानां कुत्सितानां श्वमार्जाररासभानां स्वरूपैः सदृशैः युक्तैः निःशब्दैश्च ॥ तथा च गर्गः ॥ छिन्नमूलाश्च रूक्षाश्च शुक्ला वा या कुलीकृता। पापसत्वानुकाराश्च मेघाः पापफलप्रदाः ॥ ॥ अथ कुंभलक्षणमाह ॥ ॥ विगतघने वा वियति विवस्वान् स्फुटमयूखः सलिलक्षेदवपुः(?) सरद्वफुल्लं निशि कुमुदाढ्यं खमुडुविशुद्धं यदि च सुदृष्टं ॥ अथ विवस्वानादित्यो वियत्याकाशे विगतघने मेघरहिते स्फुटमयूखः चंडरश्मिर्भवति। तदेवमनेन प्रकारेण सलिलक्षेदाज्ज्वलं करोति। तथा खमाकाशं निशि रात्रौ उडुविशुद्धं निर्मलं नक्षत्रं कुमुदाढ्यं कुमुदबहुलं सरद्वफुल्लं विलसितं यदि दृश्यते तदा सुवृष्टौ शोभनवृष्टये भवति ॥ ॥ अथ दिग्विभागेन मेघफलमाह ॥ पूर्वोद्भूतैः सस्यनिष्पत्तिरभ्रैराग्नेयाशासंभूतैरग्निकोपः। याम्यैः सस्यं क्षीयते नैरृतैरर्धं पश्चाज्जातैः शोभना वृष्टिरभ्रैः ॥ वायव्यस्थैर्वातवृष्टिः क्वचिच्च पुष्टा वृष्टिः सौम्यकाष्ठासमुत्थैः पुष्टं सस्यं स्थाणुदिक्संप्रवृद्धैः वायुश्चैवं दिक्षु धत्ते फलानि ॥ अभ्रैर्मेघैः पूर्वोद्भूतैः पूर्वस्यां दिशि संभूतैः सस्यानां निष्पत्तिः संपद्भवति एवमाग्नेयाशासंभूतैरनलदिगुत्थैरग्निकोपो वह्निप्रकोपः। याम्यैः दक्षिणादिगुत्थैः सस्यं क्षीयते क्षयं याति। नैरृतैर्नैरृतदिगुत्थैरर्धं सस्यं क्षीयते। अर्धं च निष्पत्तिं याति॥ पश्चाज्जातैः पश्चिमायां दिशि उत्पन्नैः शोभना वृष्टिर्भवति वायव्यास्थैर्मारुतदिगुत्थैर्वातवृष्टिर्वातयुक्ता वृष्टिर्भवति। सा च क्वचित्क्वचिच्च न सर्वत्र। सौम्यकाष्ठासमुत्थैरुत्तरदिक्संभूतैः पुष्टा परिपूर्णा वृष्टिर्भवति। स्थाणुदिगैशानी तत्संप्रवृद्धैस्तदुत्पन्नैः पुष्टमभ्रं सस्यं भवति। एवमनेनैव प्रकारेण यथा मेघाः शुभाशुभफलप्रदा उक्तास्तथैव वायुर्मारुतः फलानि धत्ते ददाति॥ एतदुक्तं भवति ॥ ॥ यथा पूर्वोद्भूतैः सस्यनिष्पत्तिरभ्रैरेवं पूर्वोद्भूतेन वायुनापि सस्यनिष्पत्तिर्भवतीत्यादि योज्यम् ॥ अन्येषामप्युत्पातानामतिदेशार्थमाह ॥

श्रा =

क्षीय =

उल्कानिपातास्तडिताशनिश्चदिग्दाहनिर्घातमहीप्रकंपाः नादामृगाणांसपतत्रिणांचआप्याययथैवांबुधरास्तथैव ॥ उल्कानिपातास्तडितः
विद्युत्प्रपाताः आसांलक्षणानिपुरस्तादाचार्यएववक्ष्यतिदिग्दाहोदिशांदाहः निर्घातोनभः शब्दः महीकंपोभूमिकंपः मृगाणामरण्यप्राणिनांस
पतत्रिणांपक्षिसंहितानांनादाः शब्दाः यथायेनप्रकारेणांबुधरास्तथातेनप्रकारेणआप्यायकी तद्याः दृष्टीकृतेः सस्यनिष्पत्तिरद्भिरितिद्यावे
न ॥ अथयेपूर्वंचतुष्टयदिक्षुकुंभाः स्थापितास्तैः शुभाशुभज्ञानमाह ॥ नामाङ्कितैस्तैरुदगादिकुंभैः प्रदक्षिणंश्रावणमासपूर्वैः
पूर्णैः समासैः सलिलस्यदातास्रुतैरवृष्टिः परिकल्प्यमूनैः ॥ तैः कुंभैरुदगादिस्थैरुदगादिकुंभैः उत्तराद्यासुदिक्षुप्रदक्षिणंप्रादक्षिण्येन
व्यवस्थितैस्तैश्चश्रावणमासपूर्वैः श्रावणादिमासचतुष्टयपरिकल्पितैः एतदुक्तंभवतिउदक्स्थः कुंभः श्रावणमासः परिकल्प्यः प्राग्भाद्र
पदः दक्षिणस्थः आश्वयुजः पश्चिमस्थः कार्तिकः परिकल्प्यइतितैः पूर्णैःसमासैः सलिलस्यदाताभवतितेषां चतुर्णामिध्याद्यः कुंभः प
रिपूर्णः सयस्मिन्मासे परिकल्पितः समासः सलिलस्यजलस्यदाताभवतितस्मिन्मासेदेवोवर्षतीत्यर्थः एतदुक्तंभवति उदक्स्थेकुंभेपरि
पूर्णे श्रावणेवृष्टिर्वक्तव्याः प्राक्कुंभेभाद्रपदेदक्षिणेआश्वयुजेपश्चिमेकार्तिकइतिसर्वेषुपरिपूर्णेषु चतुर्ष्वपिमासेषुवृष्टिर्वक्तव्या द्वयोर्मास
द्वयेपितैरवकुंभैः परिस्रुतैर्वृष्टिरभूतैरवृष्टिरवर्षणम् ऊनैः स्वबुद्ध्यापरिकल्पनीयम् अर्धस्रुतैर्मध्यमावृष्टिरनंतरेनुपातात्काद्यम् ॥ तथाचग
र्गः ॥ सौम्येतुश्रावणंविद्यात्पूर्वेभाद्रपदंवदेत् दक्षिणेआश्वयुजंज्ञेयंपश्चिमेकार्तिकंविदुः । सर्वेकुंभाः सुपूर्णाः स्युर्नभग्नाः कांतिसंयुताः चत्वारोवा
र्षिकान्मासान्सर्वान्वर्षतिवासवः सर्वस्रुतैरवृष्टिः स्यादर्धैर्मध्यमवर्षणम् ऊनैस्तथाविधावृष्टिर्वक्तव्याजलमानतः ॥ ॥ अथदथ्याह ॥ २ ॥
अथैषुचकुंभेष्टपनामचिह्नैर्देशांकितैश्चाथपरैस्तथैव भग्नैः स्रुतैर्नीलजलैः सुपूर्णैः भाव्यानिवाच्यानियथानुरूपम् ॥ अथैरपरैरपि
कुंभैर्नृपनामचिह्नैर्नृपानांराज्ञांचनाम्नासंज्ञयाचिह्नितैरुपलक्षितैस्तथातेनैवप्रकारेणापरैरन्यैर्देशांकितैर्देशनाम्नाचिह्नितैरेतदुक्तंभव
तितत्रचकुंभेनृपदेशचातुर्वर्ण्यचिह्नितांशुभाशुभज्ञानार्थंस्थाप्याः तेषुचभग्नैःस्रुतैःन्यूनजलैः सुपूर्णैर्यथानुरूपम् यथासादृश्यंभा

यानिशुभाशुभानिवाच्यानिवक्तव्यानि। एतदुक्तंभवति। तेःकुंभैःपरिपूर्णैरतिशुभंभग्नैर्नाशः स्रुतैस्तत्पद्रवऊनजलैर्मध्यमंफलम्‌ तथाचकाश्यपः अ
न्यदेशांकिताःकुंभाभिन्नंतेचस्रवंतिच। बंधहीनावितोयाश्चतेभियोज्याष्टपेणवै ॥ अथरोहिण्याश्चसंस्थानेविशेषेणशुभाशुभफलमाह ॥
हरणोनिकटंगोथवाशशीदक्षिणेपथियथातथास्थितः रोहिणींयदिभुनक्तिसर्वथाकष्टमेवजगतोविनिर्दिशेत्‌ ॥ शशीचंद्रोवयायेनतेनप्रकारे
णहरणोविप्रकृष्टःस्थोनिकटकःसमीपस्थोवादक्षिणेपथिदक्षिणस्यांदिशिस्थितंयदिरोहिणींराजापत्यंभुनक्तिसंयोगंयातितदाजगतोजनप
दस्यकष्टमशुभंदुर्भिक्षंजंमरकादिकंविनिर्दिशेत्‌ ॥ अथदध्याह ॥ स्पृशन्नुदग्यातियथाशशांकस्तदाशुवृष्टिर्बहुलोपसर्गाः असंस्पृशद्यो
गउदक्समेतःकरोतिवृष्टिंविपुलांशिवंच ॥ रोहिण्याःस्पृशन्नेवदक्षिणेनस्पर्शंनंकृत्वायद्युदग्युत्तरेणशशांकोयातिगच्छतितथाबहुलो
पसर्गप्रस्तोपद्रवाबहुभिर्दोषैर्युक्तास्तुवृष्टिःशोभनावृष्टिर्भवतिलोकानामुपद्रवाभवंतियथाकालोदिताचवृष्टिर्भवितीत्यर्थः अथवारोहि
ण्यायोगःअसंस्पृशन्नादावुदक्समेतउत्तरेणगतस्तदाशुवृष्टिंशोभनांवृष्टिंविपुलांविस्तीर्णांकरोतिशिवंश्रेयश्चभवति ॥ अथरोहिण्याः
शकटमध्यगतेचंद्रेफलमाह ॥ रोहिणीशकटमध्यसंस्थितेचंद्रमस्यशरणीकृताजनाः क्वापियांतिशिशुवाचिताशनाःसूर्यतप्तपिठरांबु
पायिनः ॥ शकटभेदलक्षणंगार्गिणउक्तं॥ तथाचब्रह्मसिद्धांते। विक्षेपांसह्तितयादधिकोवृषभस्यसप्तदशभागेयस्ययम्यस्यचाप्योनिनतिस
कटंसरोहिण्याइति॥ चंद्रमसिरोहिण्याःशाकटमध्यसंस्थितेजनालोकाअशरणीकृतानिःशरणीभूताःक्वापियांतिउत्तापिगच्छंतिकेचित्प्रजा
इतिपठंतिअपियांतिकीदृशाःशिशुवाचिताशनाःशिशवोबालास्तेषामशनंभोजनंयाचमानाःप्रार्थ्यमानाःतथासूर्येणादित्येनपिठिरेभांड
विशेषेतप्तंपरितापितंयदंबुपानीयंतत्पायिनस्तत्पानशीलाःअनेनजलाभावउक्तःबहुतारकत्वाद्रोहिण्याःशकटःसमूहः ॥ ॥ अथ
रोहिण्याःपश्चिमदिक्स्थेचंद्रमसिफलमाह ॥ उदितंयदिशीतदीधितिंप्रथमंपृष्ठतएतिरोहिणी। शुभमेवतदास्मरातुराःप्रमदाःकाम
वशेनसंस्थिताः ॥ शीतदीधितिंचंद्रंप्रथममादौयद्युदितंतस्यचपृष्ठतःपश्चाद्रोहिणीएत्यागच्छतिसमुदेतितदाशुभमेवशोभनंलोकेप्रमदाः

१०४

स्त्रियः स्मरातुराः कामार्त्ताः कामवशेन संस्थिताः कामुकानां वशवर्तिन्यो भवंति ॥ अथ रोहिण्याः पूर्वस्यां दिशि स्थिते चंद्रे फलमाह २॥
अनुगच्छति पृष्ठतः शशी यदि कामी वनितामिव प्रियाम् मकरध्वजबाणखेदिताः प्रमदानां वशगास्तदा नराः ॥ रोहिण्याः शशी चंद्रो यदि पृ
ष्ठतः पश्चादनुगच्छत्युदेति। प्रियां वनितां वल्लभां स्त्रियं कामी कामुको यथा अनुगच्छति तथा प्रमदानां स्त्रीणां तस्मिन् वर्षे नराः पुरुषाः मकरध्व
जबाणखेदिताः कामशरपीडिताः संतो वशगा भवंति ॥ अथ रोहिण्याः शेषासु दिक्षु स्थिते चंद्रे फलमाह ॥ ॥ आग्नेय्यां दिशि
चंद्रमा यदि भवेत्तत्रोपसर्गमहान् नैरृत्यां समुपद्रुतानि निधनं सस्यानि यांतीतिभिः प्राजेश्यानिलदिक्स्थिते हिमकरे सस्यस्य मध्यमश्चयो याते
स्थाणुदिशं गुणाः सुबहवः सस्यार्घवृष्ट्यादयः ॥ प्रजेशस्य ब्रह्मणो दैवं प्राजेशी रोहिणी तस्या आग्नेय्यां पूर्वदक्षिणस्यां दिशि यदि
चंद्रमाः शशी भवेत्स्यात्तदा तत्र तस्मिन् वर्षे महानतीवोपसर्गा उपद्रवा भवंति तदा नैरृत्यां दक्षिणपश्चिमायां दिशि स्थिते चंद्रमसि सस्यानि ई
तिभिरतिवृष्ट्यादिभिरुपद्रवैः समुपद्रुतान्युपतप्तानि निधनं नाशं यांति प्राप्नुवंति हिमकरे चंद्रे अनिलदिक्स्थिते वायव्यां पश्चिमोत्तरस्यां दिशि
स्थिते समाश्रिते सस्यस्य धान्यादेः मध्यमश्चयो मध्यमं संघातनं भवति। तथा स्थाणुदिशमैशानीमुत्तरपूर्वामाशां याते प्राप्ते चंद्रे सुबहवः सु
प्रभूता गुणा भवंति के ते सस्यार्घवृष्ट्यादयः सस्यानि धान्यार्घवृष्टिश्च ताः सस्यार्घवृष्टयः आदिग्रहणाद्योगक्षेमनीरोगता गृहीतव्याः ॥ ॥
तथा च समाससंहितायाम् ॥ उदगपि च रोहिणीकायाः पूर्वोत्तरो वा स्थितः प्राच्यां वा यदि भवति तदा वसुधा भवति विपुलाः अन्यत्र जनाः उप
३४ सर्गानलदिक्स्थे याम्याशासंस्थिते शकटके किं कष्टं स्तेनैर्नैरृत्ये अनमानैः क्षयो भवति क्रिमिशुकशलभादिभयं नैरृत्यां नातिवृष्टिरपरेण वा
यव्याशासंस्थे मध्यं सस्यं कुमुदनाथे ॥ अथ योगतारोपतापच्छेदने च फलमाह ॥ ताडयेद्यदि च रोगतारकामाहृणोति वपु
षा वदापि वा। ताडने भयमुपैति दारुणं छादने तु पवधो गवाह्वतः ॥ योगतारकं प्रधानतारकं ॥ तथा चोक्तम् स्वताराणां मध्ये तु या तारा
दीप्तिमत्तरा। योगतारेति सा प्रोक्ता नक्षत्राणां पुरातनैः ॥ तां च योगतारकां यदि ताडयेद्विध्यात् श्रृंगैकदेशेन स्पृशतीत्यर्थः अथ वा वपुषा शरीरेण छन्या

१०४

ह्लादयति। तथाताडनेदारुणां तीव्रं भयं भीतिमुपैतिकथयंतितथाच्छादनेऽंगनाहृतः स्त्रीहृतोऽत्रपत्यवाज्ञोवधोमरणमुपैति ॥ अथयदपिशुभाशुभज्ञान
माह ॥ गोप्रवेशसमयेऽग्रतोवृषोभवतिहृष्टःपशुरेववापुरः भूरिवारिशवलेलुमध्यमंनलुसितेंबुपरिकल्पनाउरैः ॥ गोप्रवेशसमयेगवामरण्यादा
गतानांप्रवेशकालेपश्चिमसंध्यायांवत्प्रतः पुरतोवृषभोबलीवर्दोभवति। पुरोऽग्रेअथवापुरोऽग्रतः हृष्टोसितः पशुःछागादिकोभवतितदातदैवभू
रिवारिबहुजलंभवतिशवलेलुमध्यमम्। शवलः हृष्टः श्वेतः पशुस्तस्ययदाद्वौवर्णौसमभवेतां तदामध्यमंफलम्। तस्यैवपशोरधिकेभूरिवारिशो
ल्के अधिकेऽनंनलुसितोश्वेतवर्णोनाकिंचिदंबुभवति। अपरैर्वर्णैरंबुपरिकल्पनास्वबुद्ध्याकार्या। शुक्लावर्जमन्यैर्वर्णैःकिंचित्किंचिद्भवतीत्यर्थः ॥
तथाचगर्गः ॥ प्राक्प्रवेशेतुपूर्वस्य पुरतोवृषभोयदा। प्रविशेत्कृष्णवर्णोवापशुर्जलबहुप्रदः कृष्णानुगोऽनुभिद्धाय हेमारोथायवोच्यते। गोर्याम
ध्यवेलायांमध्यमंतस्यसंपदः अनावृष्टिकरीश्वेतावातायकपिलास्मृता। पाटलासस्यनाशायरोगायक्षारुणास्मृता। एकदोशीयशवलाचित्रंचित्रां
बुवर्षति। पांडुरामध्यमांगीवाश्रीश्चापाद्यविवर्धिनी। कपिलापश्चिमंवर्षंशोणाल्पंप्रवर्षति॥ तथाचपराशरः॥ अथोस्तमयवेलायांकुञ्जद्वारमभि
गच्छानिमित्तान्युपलक्षयेत्तत्रगोगजाश्वरथप्रथमप्रवेशेपुरविजयोवानरखरोष्ट्रनकुलमार्जारप्रवेशेविद्रवोनेत्रांगहीनप्रवेशेत्वशनिभयमिति॥
अथदर्शनेचंद्रमसःफलमाह ॥ दृश्यतेनयदिरोहिणीयुतः चंद्रमानभसितोयदावृते। रुग्भयंमहदुपस्थितंतदाभूश्चभूरिजलसंप्लुतास्तुसंयु
ता ॥ यदिनभस्याकाशेतोयदावृतेमेघच्छन्ने चंद्रमारोहिणीयुतोनदृश्यतेतदातस्मिन्वर्षेलोकेमहदतीवरुग्भयंरोगभयमुपस्थितंप्राप्तंवदेत्
भूश्चभूमिर्भूरिजलसस्यसंयुताबहुभिस्तोयैःसस्यैश्चयुक्ताभवतीति ॥ ॥ ॥ इतिश्रीभट्टोत्पलविरचितायांसंहिताविवृतौरोहिणी
योगोनामाध्यायःचतुर्विंशः ॥ ॥ ॥ अथस्वातियोगाध्यायोव्याख्यायते ॥ ॥ ॥ तत्रादावेवरोहिणीयोगोक्तस्यफलस्याति
देशंकालनिर्देशंचाह ॥ ॥ यद्रोहिणीयोगफलंतदेवस्वातावाषाढ्यासहिते चंद्रेयद्योगफलंस्यात्तत्तदेवस्वातिसहितेचंद्रेआषाढासहिते
उत्तराषाढ्यासहितेफलंनिखिलंनिःशेषंविचिंत्यम्। विचारणीयं। एतदुक्तंभवति। मेघानांवायोश्चोत्पातानांचयत्फलंरोहिणीयोगेउक्तंतत्सर्वं।

स्वात्याषाढस्थे चंद्रेऽपि ज्ञातव्यं। तथाह्न रोगोनिकटगोथवाशशीत्यादि यथासंभवं समागमफलं यदुक्तं तत्सर्वमत्रैव वेदितव्यम्। तथागोत्रवेशास्तम
येग्रतोदृषद्रुत्यादिकं सर्वमपि वेदितव्यम्॥ तथाच पराशरः॥ सर्व एते योगा स्वात्याषाढे भवंति तान्दैवज्ञः प्रयतः शुचिरवधारयेत्। स्वातिसंयुक्ते चं
द्रमसि बनत्रितिथैः स्तनैर्विघ्न आलेरं भेदैर्नभसो वक्रा दनंस्तु भिन्नाद्रुमायुतहृत्सर्ववातजाद्रु भविद्गति। उल्कानिर्घातिकंपोपघाते श्च तादि पर्ययः योऽस्मि
विशेषस्तमरुप्रवद्य इति अस्मिन्स्वातियोगे रोहिणीयोगे योऽन्तमरुप्रवक्ष्ये कपायिष्य इति॥ अथात त्रराञ्जोदिवसे च दृष्टे शुभाशुभल
क्षणमाह॥ स्वातौ निशांशे प्रथमे हि दृष्टे सस्यानि सर्वाण्युपयांति वृद्धिम्। भागे द्वितीये तिलमुद्गमाषा ग्रीष्मं तृतीयेऽस्ति न शारदानि॥ दृष्टेऽह्नि भागे
प्रथमेऽस्तु वृष्टिः नो द्वितीये तु सकीटजाद्यः वृष्टिस्तु मध्या परभागदृष्टे वृष्टिर्निवृत्ते ह्यनिशं प्रदृष्टे॥ स्वातौ स्वातियोगे प्रथमे निशांशे आद्ये [illegible] भा
गे दृष्टे सर्वाणि निःशेषाणि सस्यानि वृद्धिमुपयांति गच्छंति द्वितीये भागे च त्रिभागे दृष्टे तिला मुद्गमाषा वृद्धिमुपयांति। तृतीये त्रिभागे दृष्टे ग्री
ष्ममस्ति ग्रीष्मधान्यानि भवंति न शारदानि शरत्सस्यानि न भवंति। अह्नि दिवसे प्रथमे आद्ये त्रिभागे दृष्टे तु वृष्टिः शोभन वृष्टिर्भवति। द्वितीये दिन
त्रिभागे दृष्टे तद्वत् वृष्टिर्भवति। किंतु सकीटसर्पाः कीटैः कृमिभिः सर्पैर्भुजगैश्च सहिता वृष्टिर्भवति। अपरभागे तृतीये दिनत्रिभागे दृष्टे वृष्टिर्मध्यमा
भवति। नातिबह्वी नात्यल्पा ह्यनिशं प्रदृष्टे समयमहोरात्रं प्रदृष्टे निवृत्ता निवृद्धि रहिता निर्दोषा वृष्टिर्भवति। सर्वत्र कालोचितं वर्षतीत्यर्थः॥
तथाच गर्गः॥ स्वातियोगे यदा युक्ते पूर्वरात्रे प्रवर्षति। ग्रीष्मशारदसंपन्नां तां समामभिनिर्दिशेत्। रात्रिद्विभागमाश्रित्य स्वातियोगेऽभिवर्षति। संपदो मु
द्गमाषाणां तिलानां चोपधारयेत्। त्रिभागशेषे शर्वर्यां स्वातियोगेऽभिवर्षति। ग्रीष्मे संपद्यते सस्यं शारदं तु विनश्यति। अहस्तु प्रथमे भागे वर्षं क्षेमसुभिक्षये।
द्वितीये शोभना वृष्टिर्बहुसस्यसरीसृपाः अहस्तृतीय भागे तु मध्यमां कुरुते समाम्। अहोरात्रं यदा वर्षेत्स्वातियोगे पुरंदरः तदा लघलोमासान्सर्वान्निर्व
तिवासव इति॥ ॥ अथापांवत्सनिकटस्थे चंद्रमसि शुभाशुभमाह॥ सममुत्तरेणतारा चित्रायां कीर्त्यतेऽपांवत्सः तस्यासन्ने चंद्रे
स्वातौ योगः शिवो भवति॥ चित्रायाः सममुत्तरेण समंकृत्वा उत्तरेण तिर्यग्या तारास्ति नाम्ना अपांवत्स इति कीर्त्यते कथ्यते। तस्यापांवत्सस्यासन्ने निक

टस्थे चंद्रे स्वातेर्योगः चंद्रसंयोगः शिवः श्रेयस्करो भवति ॥ अथ स्वातियोगस्य कालयोगमाह ॥ सप्तम्यां स्वातियोगे यदि पतति हिमं मा
घमासांधकारे। वायुर्वा चंडवेगः सजलजलधरो वापि गर्जत्यजस्रम्। विद्युन्मालाकुलं वा यदि भवति नभो नष्टचंद्रार्कतारं विज्ञाये प्राष्टडेषा मुदितजन
पदा सर्वसस्यैरुपेता ॥ माघमासस्यांधकारे कृष्णपक्षे सप्तम्यां तिथौ स्वातिनक्षत्रयुक्ते चंद्रे हिमं तुहिनं यदि पतति वायुर्मारुतो वा चंडवेगः प्रच
ण्डो महास्वनो वहति सजलो जलेन पानीयेन सहितो जलधरो मेघो जस्रमनवरतं वापि गर्जति शब्दं करोति। अथवा नभ आकाशं विद्युन्मालाभि
नी राकुलं सौदामनीनां पंक्तिभिर्व्याप्तम्। नष्टचंद्रार्कतारम्। नष्टा अदर्शनं गताश्चंद्रतारकार्काः सोमतारकसूर्या यत्र मेघच्छन्नमित्यर्थः तदेषा प्रहृष्टेव
र्षा मुदितजनपदा प्रहृष्टलोका सर्वैर्निःशेषैः सस्यैरुपेता संयुक्ता विज्ञेया विज्ञातव्या ॥ ॥ अन्यदपि शुभाशुभलक्षणमाह ॥ तथैव फा
ल्गुने चैत्रे वैशाखस्यासितेऽपि वा। स्वातियोगं विजानीयादाषाढस्य विशेषतः ॥ यथा सप्तम्यां स्वातियोगे यदि पतति हिममित्याद्युक्तम्। तथै
व फाल्गुनमासि स्वातौ भवति चैत्रवैशाखमासस्यासिते कृष्णपक्षेऽपि स्वातियोगं विजानीयाद्विद्यात् विचारयेत् विशेषत आषाढस्य यः स्वाति
योगस्तं विचारयेदित्यनार्षोऽयं श्लोकः ॥ ॥ ॥ इति भट्टोत्पलविरचितायां संहिताविवृतौ स्वातियोगो नामाध्यायः पंचविंशः ॥ ॥
अथाषाढीयोगाध्यायो व्याख्यायते ॥ ॥ तत्र तावद्रोहिणीयोगफलं यदुक्तं तत्सर्वमुत्तराषाढायुक्ते चंद्रमसि विज्ञातव्यम्। तथाषाढपौर्णमा
स्यां विचारयेत् ॥ तथा च पराशरः ॥ अतोऽनंतरमाषाढायुक्ते शशिन्यादनविसर्गान्तभागेषु निमित्तानि प्रावृष्यांतमध्येषु फलवंति तत्र सुरभि
रनुकूलः स्पर्शवान्मारुतः पूर्वः पूर्वोत्तरो तिवर्षमंत्यं करो नैरृतो मेघवाय्व्य वारुणो वा पथ्याशा मन्यस्य करा विपर्यये विपरीतेषु वैडूर्यरजतम
धुकनप्रभामंध्यान्निथा उक्तु प्रादुर्भविष्णु प्रावृड् दृष्टये प्राच्यप्रश्नाद्भागेषु आषाढानां योगः शशिनो वर्षास्तु तत्कालमेव वर्षाया वैश्वदेवा
दुत्तरतः शशी वर्षकरो न दक्षिणतः निर्घातोल्काशनिसूचलनदंडान्यग्रहोपतापे सस्यवधो भवति चात्र तोदकं सातं कं साग्रे सविद्युत्स्तनयित्नुमत्
प्रवातं च निवातं च प्रशस्तं तदहः स्मृतमिति ॥ ॥ अथाषाढयोगे यत्कर्तव्यं तदाह ॥ ॥ आषाढ्यां समतुलिताधिवासितानामन्येद्युर्यदधिक

तामुपैतिबीजम् तद्वृद्धिर्भवतिनजायतेयद्दूनं मंत्रोस्मिन्भवतितुलाभिमंत्रणाय ॥ आषाढस्येयंपौर्णमासीआषाढीउत्तराषाढयायुक्तेत्यर्थः॥
तथाचगर्गः॥ वायव्यवैश्वदेवाभ्यांप्राजापत्यस्यचैवहि। एषामभ्यधिकंचापिरोहिणीनामुपास्यतद्वृति॥ तस्यामाषाढ्यांसर्वबीजानांसमतुलितानांधिवा
सितानाम् समंकृत्वाऊनातिरिक्तवर्जयानिबीजानिधान्यादीनितुलितानितुलयापरिछिन्नानितेषांतथाम् तानामधिवासितानाम् अधिवासमक्ष
त्रतंमंत्रेणाभिमंत्र्यरात्रिमेकामुषितानिततोन्येद्युरस्मिन्नहनिद्वितीयदिवसेयद्बीजंतुलितमधिकतामुपैत्याधिक्यंगच्छति। तद्वृद्धिस्तस्यधा
न्यादेस्तस्मिन्वर्षेवृद्धिर्भवतियद्दूनंभवतितन्नजायतेनोत्पद्यते मंत्रोस्मिन्भवतितुलाभिमंत्रणाय अस्मिंस्तुलाकर्मणितुलाभिमंत्रणायमन्त्रो
भवतियेनतुलाअभिमंत्रणीयेत्यर्थः॥ तथाचसमाससंहितायाम्॥ तुलाधिवासितानामन्येद्युर्यदधिकंभवतिबीजम् आषाढपौर्णमास्यां
तद्वृद्धिरत्रमंत्रोयम्॥ ॥ अथतमेवमंत्रमार्षमाह ॥ स्तोतव्यामंत्रयोगेनसत्यादेवीसरस्वती। दर्शयिष्यसियत्सत्यंसत्येसत्यव्रतासिहि ॥
येनसत्येनचंद्रार्कौग्रहाज्योतिर्गणास्तथा। उत्तिष्ठंतीहपूर्वेणपश्चादस्तंव्रजंतिच॥ यत्सत्यंसर्ववेदेषुयत्सत्यंब्रह्मवादिषु। यत्सत्यंत्रिषुलोकेषु
तत्सत्यमिहदृश्यताम्। ब्रह्मणोदुहितासित्वमादित्येतिप्रकीर्तिता। काश्यपीगोत्रतश्चैवनामतोविश्रुतातुला॥ स्तोतव्येति। सातुलाअनेनमं
त्रयोगेनसह स्तोतव्यास्तवनीयासत्यासत्यरूपासरस्वतीदेवी, सत्येसत्यरूपेसत्यंपरमार्थंतद्दर्शयिष्यसित्वं यतस्त्वंसत्यव्रतासत्यमेवयस्याः व्रतं
चंद्रार्कौशशिरवीग्रहाश्चान्येभौमादयस्तथाज्योतिर्गणाः ज्योतिषांताराणांगणाः समूहाः येनसत्येनपूर्वस्यांदिशिपूर्वेणोत्तिष्ठंति उदयंयांतिइह
स्मिंल्लोकेतथापश्चात्पश्चिमायांदिश्यस्तंव्रजंतिअस्तमयंयांतितथासर्वेषुवेदेषुयत्सत्यंयच्चब्रह्मवादिषुसत्यंपरंब्रह्मयेवदंतित्रिषुलोके
षुभूर्भुवः स्वराख्येषुयत्सत्यंतत्सत्यमिहास्मिंस्तुलाकर्मणिदृश्यताम्। त्वंब्रह्मणःकमलजस्यदुहितातनयाअसिभवसितथाआदित्याः
अदितेरपत्यंइत्येवंप्रकाराः प्रकीर्तिताकथितागोत्रतःकाश्यपीकश्यपगोत्रानामतः संज्ञयातुलाइतिचविश्रुताख्याता ॥ ॥ अथतुला
यालक्षणज्ञानमाह ॥ क्षौमंचतुःसूत्रकसन्निबद्धं षडंगुलंशिक्यकवस्त्रमस्याः सूत्रप्रमाणांचदशांगुलानिषडेवकक्ष्योभयशिक्यमध्ये ॥ ॥

अस्यास्तु लावाः शक्यकवस्त्रं क्षौमं कार्यम् यत्रास्थितानि द्रव्याणि परिच्छिद्यन्ते तत्शिक्यवस्त्रम् तत्स्थलः सूत्रकनिबद्धम् चतुर्भिः सूत्रैस्तंतुभिः सन्निबद्धं
संलग्नं कार्यम् तच्च शिक्यकवस्त्रं षडंगुलं षडंगुलप्रमाणं यैः सूत्रैस्तद्बध्यते। तेषां प्रमाणं दशांगुलानि उभयशक्यमध्ये शिक्यद्वयस्यान्तः कक्ष्यासूत्रं ष
डंगुलं कार्यम् कक्ष्याशब्देन यत्तुलासूत्रमुच्यते। कथं तत्र द्रव्याणि परिच्छेद्यानीत्याह ॥ ॥ याम्ये शिक्ये कांचनं सन्निवेश्यं शेषद्रव्याण्युत्तरे तु निवेश्य।
तोयैः काम्यैः स्यंदिभिः सारसैश्च वृष्टिर्हीना मध्यमा चोत्तमा च ॥ दन्तैर्नागा गोहयाद्याश्च लोम्ना हेम्ना भूमासिक्थकेन द्विजाद्याः तद्वद्देशा वर्षमासा दिशश्च
श्च शेषद्रव्याण्यात्मरूपस्थितानि ॥ याम्ये दक्षिणे शिक्ये कांचनं सुवर्णं सन्निवेश्यं स्थापनीयम् शेषाणि सर्वद्रव्याणि तथा बहूनि पानीयादीन्युत्तरे शि
क्ये सन्निवेश्यानि। एतदुक्तं भवति। सुवर्णं यदा परिच्छिद्यते तदा दक्षिणे निवेशयेत् अन्यानि सर्वाण्युत्तरे इति। तोयैर्जलैः काम्यैः कूपसंभवैः वृष्टिमद्भिः
हीना वृष्टिर्भवति। स्यंदिभिर्नादेयैर्जलैर्वृष्टिमद्भिर्मध्यमा वृष्टिर्भवति इति वस्तीनात्यल्पा तथा सारसैः सरः संभवैर्वृष्टिमद्भिर्जलैरुत्तमा प्रधाना वृष्टि
र्भवति। सर्वेषां वृष्टावनतिमत्ती वृष्टिः सर्वेषां समानां वृष्टिरिति। केचिद्वृष्टिर्हीना मध्यमा चोत्तमा चेति पठन्ति। सरस्यानां वृष्टिर्भवति। न चैतच्छोभनम्॥
दंतैर्नागा इति। नागाः करिणो दंतैर्हस्तिदंतैः परिच्छेद्याः गोहयाद्याश्च लोम्ना। गावः हयाः अश्वाः आदिग्रहणात् खरकरभ छागमेषाः एते सर्वे एव लो
म्ना परिच्छेद्याः हेम्ना सुवर्णेन नृपा राजानः परिच्छेद्याः सिक्थकेन मधूच्छिष्टेन द्विजाद्या ब्राह्मणा श्चत्वारो वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्राः देशाम
ध्यदेशप्रभृतयः वर्षाण्यप्रेक्षाणि यथेष्टानि मासा वर्षान्तःस्थाः दिशश्च पूर्वाद्याः शुभाशुभज्ञानार्थं तद्वत्सिक्थकेनैव परिच्छेद्याः शेषाण्यनुक्तानि
यानि द्रव्याणि तान्यात्मरूपस्थितानि स्वयमेव परिच्छेद्यानि धान्यादीनीत्यर्थः ॥ अथ तुलावालक्षणमाह ॥ हैमी प्रधाना रजतेन
मध्या तयोरलाभे खदिरेण कार्या। विद्धः पुमान्येन शरेण सा वा तुला प्रमाणेन भवेद्वितस्तिः ॥ हैमी सुवर्णतुला प्रधानोत्तमा। रजतेन रूप्येण या
क्रियते सा मध्यमा न शुभा नाप्यशुभा। तयोः सुवर्णरूप्ययोरलाभे अभावे सति खदिरेण कार्या। खदिरकाष्ठमयी कर्तव्या। अथवा येन शरेण पुरुषः पुमान्
पुरुषः कश्चिद्विद्धो भिन्नः सा वा तुला कार्या तस्माच्छरादित्यर्थः साच तुला प्रमाणेन वितस्तिर्द्वादशांगुला भवतीति ॥ ॥ अथ तुलितानां

शुभाशुभज्ञानमाह ॥ हीनस्यनाशोभ्यधिकस्यवृद्धिस्तुल्येनतुल्यंतुलितंतुलायाम् एतत्तुलाशोकरहस्यमुक्तं त्वाजेशयोगेपिनरोविदध्यात् ॥
तुलायांतुलितस्यपरिच्छिन्नस्यद्रव्यस्यहीनस्यनाशः ह्रासोवाच्योवक्तव्यः अत्यधिकस्यवृद्धिः तुल्येनसमेनतुल्यंसमम् नहानिर्नचवृद्धिः तथाचगर्गः ॥
येषांत्रयाणामतेसारंतेभवंतिचतांसमम् येषांलघीयतेसारंतेषांनाशंविनिर्दिशेत् समानितुसमानिस्युस्तुलयातुलितानितु ॥ तथाचपराशरः ॥
सारसंभक्तिस्तस्यानांराज्ञांचविजयोधिके। नादेयेमध्यमासंपत्क्षीयस्यचलोदके। यस्यादिशिभवेन्मान्यानस्थानंशुचिगंधिमान् तस्यांदिशिविजानीयाद्रा
ज्ञांशिवमनामयमिति॥ एतत्तुलाशोकंतुलाभांडागाररहस्यंपरमंगुह्यमुक्तंकथितं। नरोमनुष्यः आजेशयोगेपिकेवलमाषाढयोगेतुलाकोशंविद
ध्यात्कारयेद्यावत् आजेशयोगेरोहिणीयोगेपिकारयेत्॥ अस्मिन्योगत्रयेपिपापग्रहाद्यवस्थितानशुभदाः अधिमासकेसतियोगेपिकारयेत्॥ ॥
स्वातावाषाढाद्वयरोहिणीषुपापग्रहायोगगतानशस्ताः आस्तांतुयोगद्वयमप्युपोष्यायदाधिमासोद्विगुणीकरोति ॥ स्वातोस्वातिसंयुक्तेचंद्रे
आषाढास्त्तराषाढासुयुक्तेचाथरोहिणीसंयुक्तेचंद्रेएतेषुत्रिषुयोगेषुपापग्रहाभौमसौरराहुकेतवोयोगगतास्तत्रस्थितानशस्तानशुभदाः
तथाचगर्गः॥ योगैःपापैकपक्तैःप्रजानामशुभंवदेत् दुर्भिक्षावृष्टिमरकात्सोम्यैसौभिक्षमादिशेत्॥ तथाचपराशरः॥ शुक्रबुधवृहस्पतिसंयो
गैःशुक्रधान्यतिलमुद्गविनाशः सौरस्यमध्यदेशाभावोभौमस्यशस्त्रकोपकेतुर्भयंदुर्भिक्षप्रादुर्भावोग्रहः रोहिणीमध्यागमनमिंदोःसुभिक्ष
क्षेमवृष्टिकरम्। यदायस्मिन्कालेएतेषांयोगानामधिमासोद्विगुणीकरोतिद्वितीयाधिमासोषाढाख्योभवति। तदातस्मिन्कालेयोगद्वयंरोहिणीषा
ढाख्यमुपोष्यमुक्त्वाआस्यम् एतदुक्तंभवति। यदाद्वावाषाढौभवतः तदुपोष्यमासद्वयोपयोगद्वयंत्याज्यम् द्वितीयस्मिन्योगेमलत्वपत्वादनाद
रोनकार्यमित्यतउक्तंयोगद्वयमपीतियदाधिमासोद्विगुणीकरोतिद्वावधिमासकेनसहभवतइत्यर्थः स्वातियोगस्यसामान्यविहितत्वाद्योगद्व
यमित्युक्तम् अन्यथायोगत्रयंभवति। तथात्रयोगत्रयमध्याद्रोहिणीयोगस्यविशेषमाह ॥ ॥ त्रयोपियोगाःसदृशाःफलेनयदातदावाच्य
मसंशयेन। विपर्ययेयत्रिहरोहिणीजंफलंतदेवात्यधिकंनिगद्यम् ॥ त्रयोपिस्वात्याषाढरोहिणीयोगाःयदाफलेनसदृशास्तुल्याभवंति।

तदाशुभं फलमशुभं वा असंशयेन संदेहं विनाथवाच्यं वक्तव्यम् त्रिभिरेव शुभैः शुभं अशुभैरशुभमिति फलानां वैसदृशं विपर्ययः फलविपर्य
येच्चादृशेभिन्नफलेसति यत्तुरोहिणीजं शुभं फलमशुभं वा तदेव निगद्यं वक्तव्यं। प्रधानत्वाद्योगजद्वयं बलं न बाधतइति ॥ ॥ अथाषाढ्युदि
ह्नावातफलमाह ॥ निष्पत्तिरग्निकोपो वृष्टिर्मंदाथमध्यमाश्रेष्ठा। बहुजलपवनापुष्टा शुभा च पूर्वादिभिः पवनैः ॥ पूर्वाद्यास्तु दिक्षु दृष्टरूप
वनैर्वातैः क्रमेणैतानि फलानि तत्र पूर्वस्यां दिशि यदि वातो वहति तदा निष्पत्तिः सस्यानां भवति। सस्यानि सर्वाणि निष्पद्यंते अग्निकोणे ग्निभयं आ
ग्नेय्याम् वृष्टिर्मंदा अल्पा दक्षिणस्यां मध्यमा वृष्टिर्नैरृत्याम् श्रेष्ठा प्रधाना वृष्टिः पश्चिमायां। बहुजलपवना प्रभूतोदका प्रभूतवाता वायव्याम् पुष्टा
परिपूर्णा अतिशोभनोत्तरस्याम् शुभा अतिश्रेयस्करी ऐशान्यां वृष्टिरिति रोहिणीयोगवद्ध्रुवैव दिक्षु यत्ते फलानीत्युक्तं वा पुनः करणं निष्पत्तिर
ग्निकोपइत्यादिकं शिष्यभ्रांतिनिरासाय कृतमिति ॥ ॥ ॥ इति भट्टोत्पलविरचितायां संहिताविवृतौ आषाढीयोगाध्यायः षड्विंशः ॥ ॥
अतः परं केचिद्वातचक्रं पठंति तच्च वराहमिहिरकृतं न भवति ॥ यतो निष्पत्तिरग्निकोपो वृष्टिर्मंदाथमध्यमाश्रेष्ठा। बहुजलपवनापुष्टा शुभा
च पूर्वादिभिः [illegible] पवनैः अनेन पौनरुक्त्यं भवति बहुष्वादर्शेषु च दृश्यते। अतोस्माभिः सरसा व्याख्या क्रियते ॥ ॥ शिष्यहितार्थं तत्राद्यैवै
शान्यां दिशि स्थितवातलक्षणमाह ॥ ॥ आषाढपौर्णमास्यां तु यद्यैशानो निलो भवेत् अस्तंगच्छति तीक्ष्णांशौ॥ अर्के अस्तंगच्छति यद्यैशा
नाऐशान्यां दिश्यनिलो वातो भवेद्वहति तदा सस्यानां धान्यादीनां संपत्तिरुत्तमा प्रधाना भवति ॥ अथ पूर्वस्यामाह ॥ पूर्वः पूर्वसमुद्रवीचिशि
खरप्रस्फालनाघूर्णितश्चंद्रार्कांशुसटाकलापकलितो वायुर्यदाकाशतः नैकांतस्थितनीलमेघपटलाशारद्यसंवर्धितावासंतोत्कटसस्यमं
डितनला सर्वा मही शोभते ॥ तस्यामेवाषाढपौर्णमास्यां पूर्वो वायुः पूर्वस्यां दिशि यदा यस्मिन्काले आकाशतः नभसो भवतीत्यर्थः कीदृशो
वायुः पूर्वसमुद्रस्य प्रागुदधेर्ये वीचय ऊर्मयस्तेषां ये शिखराग्राणि तेषां प्रस्फालनं चलनं तेना घूर्णितो भ्रमितः तथा चंद्रार्कयोः सूर्यशशिनोः
ये अंशवः रश्मयस्त एव सटाः स्कंदावलंबिनः केशा दुवते षांयः कलापो विस्तारस्तेन कलितो मिश्रितः। तदा मही कीदृशी भवति नैकांतः स्थित

२४ :सातथाभूतासर्वानिः शोभान्तिः शोभतेविराजते ॥ अथाग्नेयमाह
यदावक्रोवायुः वहतिगगनेखंडितततुः ...

१०८ तिनैकांतमत्यर्थमेवसर्वत्रयेस्थितानीलवर्णानांमेघानांपटलाः समूहाः तैः शोभितातथा। शारदानांभावः शारद्यं। शारदैः सस्यैः धान्यादिभिः संवर्धि
तास्तुष्टियुक्ताभवति तथावासंतैर्वसंतसंभवैः कुटकैरतिसमृद्धैः सस्यैर्मंडितोभूषितानलः पृष्ठं यस्याः सात्यस्मिन्योगेभवतिपतंगेप्रसवतिति
थानित्योद्दीप्ताज्वलनशिखरालिंगिततलास्त्वगात्रोष्मोत्क्रासैर्वमतिवसुधानस्मनिकरम् ॥ ॥ यदायस्मिन्कालेवायुः पवनोवहत्याग्नेय्यां
दिशिवहतिगगनेआकाशे। कीदृशः अखंडिततनुः अखंडितातनुर्यस्य अवक्रितगतिरित्यर्थः ल्लवति प्रभवत्यस्मिन्नाषाढयोगेकदाभवति
पतंगेसूर्येप्रवसत्यस्तमेतिसतितदातस्मिन्वर्षेवसुधाभूर्नित्यंदीप्तासर्वकालमुज्ज्वलिताज्वलनशिखरालिंगिततलाज्वलनस्याग्नेर्येशिख
राज्वालायाशिखैरालिंगिताः परिष्वक्तास्तलोयस्याः तथाभूतास्त्वगात्रोष्मोत्क्रासैः स्वगात्रादात्मीयदेहाद्य ऊष्मास एवोत्क्रासस्तैस्तथाभूतैर्विकु
प्रकाशैःस्वगात्रोष्मोत्क्रासैर्भस्मनिकरं भस्मसमूहं वमत्युद्गिरति ॥ ॥ अथदक्षिणस्यामाह ॥ ॥ तालीपत्रलतावनानततरुभिः शाखा
मृगान्नर्तयन्योगेस्मिन्ल्लवतिध्वनिः सप्रकंपोवायुर्यदादक्षिणः तद्योगसमुत्थितस्तकगजवत्ताल्यांकुशैर्घट्टिताः कीनाशद्रुवमंदवारिकाणिका
मुंचंतिमेघास्तदा ॥ अस्मिन्योगेआषाढाख्येयदायस्मिन्कालेदक्षिणेयाम्याशास्थोवायुः पवनः ल्लवतिवहति। किंकुर्वन् तालीकदलि
शेषस्तस्यपत्राणिपर्णानितथालतावितानोलतानांविस्तारः तरवोवृक्षाः एतैश्चालितैः शाखामृगावानरान् नर्तयन्वहतिवातवेगात्तालादयः
चलंतितच्चालनात्तान्नर्तयन्निवतथातद्वत्तेनैव प्रकारेणयोगपौर्णिमास्यांसूर्यास्तमयेसमुत्थितोध्वनिः शब्दः सप्रकंपोतिदक्षः ल्लवतियानि
प्रभवतिवातदातस्मिन्कालेमेघाअंबुदागजवत्ताल्यांकुशैर्घट्टितायथागजइभस्तालेनाहत्यांकुशेनचघट्टितस्तद्वद्घट्टितेद्युपतेतद्वत्तद्वद्घट्टिताः की
नाशाकदर्याइवमंदस्याल्पस्यवारिणोजलस्यकणिकाबिंदवएवमुंचंतित्यजंतिनप्रभूतंजलमिति ॥ अथनैरृत्यामाह २ ॥ १०८
स्वद्वैलालवलीलवंगनिचयाद्याघूर्णयन्सागरंभानोरस्तमयेल्लवत्यविरतोवायुर्यदानैरृतः क्षाद्वत्तसात्तमानुपास्थिराकल्पाप्रास्ता
रमारूढमन्नाप्रेतवद्भूरिवोग्रचपलाभूमिस्तदालक्ष्यते ॥ तस्यामाषाढपौर्णिमास्यांभानोः सूर्यस्यास्तमयेअस्तमयकालेनैरृतोवायुः

108

दक्षिणपश्चिमाशायाः अविरतः संततः स्रवतिवहतिकिंकुर्वन् स्फुरन्नेलालवलीलवंगनिचयान्व्याघूर्णयन् स्फुरन्नेलाः प्रसिद्धाः लवलीप्र
सिद्धैलालवंगानिप्रसिद्धानि एतेषांनिचयाः समूहास्तान्व्याघूर्णयन् चालयन् क्षारसागरसमुद्रसमीपेतदातस्मिन्वर्षेभूमिरवनिरेवंविधाल्लक्ष्य
तेदृश्यते। कीदृशीकाः दुष्टसत्त्वाहतमानुषास्थिशकलसंस्तारकदाकादुर्भुक्षात्तृष्णापिपासाभ्यामाहताव्यापादितायेमानुषाजनाः तेषांमृतानां
अस्थिशकलैरस्थिखंडैश्चयः प्रास्तारोविस्तारः सएवभारोतिबहुत्वात्सएवमुक्ताकदावरणंवस्त्रंयस्याः अतएवप्रेतवधूः प्रेतस्त्रीवाग्रव
पलातीव्राचापन्थ्युक्ताचमन्ताप्रमत्ताइवातीवजनमर्दकत्वात् ॥ अथपश्चिमायामाह ॥ यदारेणूत्पातैःप्रविचलसटाटोपचपलः
प्रवातः पश्चाच्चेद्दिनकरकरापातसमये। तदासत्योपेताः प्रवरनिकरावद्धसमराक्षितिस्थानास्थानेष्वविरतवसामांसरुधिरा ॥ यदायस्मिन्
कालेदिनकरकरापातसमयेदिनकरस्यादित्यस्यकरायेरश्मयस्तेषामापातोविनाशस्तत्समयेसूर्यास्तमयकालइत्यर्थः तस्मिन्कालेपश्चा
च्चेत्पश्चिमायांदिशियदाप्रवातः चंडोनिलोवहति। कीदृशैः रेणूत्पातैः धूलिसमुत्क्षेपणैः प्रविचलः प्रकर्षेणचलमानोयःसटाटोपः सटाक्षेपः
तेनचलः चंचलः तदातस्मिन्वर्षेक्षितिर्भूः कीदृशीभवतिसत्योपेतासस्यैर्बहुभिः संयुक्तातथाप्रवराणांप्रजनानांयेनिकराः समूहाः तैराव
द्धारचिताः समराः संग्रामायस्याः तथास्थानस्थानेषुप्रदेशप्रदेशेषुअविरतवसामांसरुधिराः अविरतंसंततंक्षात्वावसामांसरुधिरैर्मेदैः प
टलशोणितैर्युक्तेतिअतिबहुयोजनाः संग्रामेवध्यंतइत्यर्थः ॥ ॥ अथवायव्यामाह ॥ ॥ आषाढीपर्वकालेयदिकिरणपतेरस्तका
लोपपत्तौवायव्योद्दृष्टवेगः पवनघनवपुः पन्नगावानुकारीजानीयाद्धारिधाराप्रमुदितमुदितामुक्तमंडूककंठंसत्योद्भासेकचित्सस्यसुखव
हुलतयाभाग्यसेनामिवोर्वीम् ॥ आषाढीपौर्णमासीसेकपर्वतस्यकालस्तस्मिन्यदिचेत्किरणपतेः सूर्यस्यास्तकालोपपत्तौअस्त
समयेप्राप्तौवायव्योवातोद्दृष्टवेगः चंडशब्दोयदिवहतिकीदृशः पवनघनवपुः पवनश्चासौघनवपुर्घनः संततोवपुः शरीरंयस्यतथापन्नग

स्सर्पाः तेषामवनिखंडान्यनुकरोति रेणुसमायोगत्वात्संततत्वाच्चेत्यर्थः केषांचित्पन्नगादानुकारी पन्नगाः सर्पाः तानतिभद्रूपतिगरुडस्तद
नुकारी अतिवेगसमायुक्तत्वाद्गरुडवेगइवसवायुर्लक्ष्यते तदातस्मिन्वर्षे उर्वीं भूमिं कीदृशीं जानीयाद्विध्यात् वारिधाराप्रमुदितमुदितामुक्तमंडू
ककंगमिति वारिणो जलस्य या धारास्ताभिः प्रकर्षेणातिशयेन या मुदं हर्षमिता प्राप्ता तया मुदितान्हृष्टा मत्ता ये मंडूकास्तेषामामुक्तादतिरा
द्वात्कंगत्र्गलाघस्याम् तथा सस्यानामुद्गमोत्पत्तिः स एकं चिह्नं ललाटे यस्याम् शाखानां बाल्ततया सामग्र्याज्ञानानामतिसुखितत्वात्
भाग्यसेनां भाग्यचमूमिव ॥ ॥ अथोत्तरस्यामाह ॥ ॥ मेरुग्रस्तमरीचिमंडलतले ग्रीष्मावसाने रवौ वात्यामोदिकदम्बगंधिसुर
भिर्वायुर्यदा चोत्तरः विद्युद्भ्रांतिसमस्तकांतिकलनान्मत्तास्तदातोयदा उन्मत्ताद्दूवनष्टचंद्रकिरणां गां पूरयंत्यंबुभिः ॥ ग्रीष्मावसाने आ
षाढपौर्णमास्यां रवावादित्ये मेरुग्रस्तमरीचिमंडलतले मेरुणा पर्वतेन ग्रस्तमुपसंहृतम् मरीचिमंडलतलं रश्मिसमूहरूपं वर्तते यस्य
रवेस्तथाभूते काले यदा वायुरनिल उत्तरेण उत्तरस्थः सौम्याशास्थो वाति वहति। कीदृशः आमोदिनोऽतिसुगंधाः ये कादंबास्तेषामेव कदं
बानां पुष्पविशेषाणां योगं धत्ते न सुरभिः सुखमितः तदा तस्मिन्वर्षे तोयदा मेघा गां भूमिमंबुभिर्जलैः पूरयंति। कीदृशाः मेघाः विद्युद्भ्रां
तिसमस्तकांतिकलनान्मत्ताः विद्युत्तडित्तस्याः कांतिः परिभ्रमणं तया समस्ता सकला या कांतिः प्रभा तस्याः कलनमाकलनं ज्ञानं येषां तस्मा
न्मत्ताः सोद्यमाः तथा उन्मत्ताद्वातिनादाश्चातिदृष्टिश्च कीदृशां गां नष्टचंद्रकिरणां नष्टा अदर्शनं गताः चंद्रकिरणाः शशिरश्मयो यस्यां
तथाभूतेति ॥ ॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ वातचक्रं नामाध्यायः सप्तविंशः ॥ ॥ ॥ ॥

अथ भद्रपदायोगमाह ॥ ॥ वृत्तामाषाढ्यां कृष्णचतुर्थ्यामजैकपादृक्षे। यदि वर्षति पर्जन्यः प्रावृट् शुभा न चेन्न ततः ॥ आषाढ
पौर्णमास्यां वृत्तायामतीतायां पुरतः कृष्णचतुर्थ्यां तिथावजैकपादृक्षे पूर्वभद्रपदानक्षत्रे यदि पर्जन्यो मेघो वर्षति तदा प्रावृट् वर्षा शस्ता शुभ

द्रपदाः न चेद्यदि न वर्षति तदा न शुभेति ॥ अन्यदप्याह ॥ नष्टचंद्रार्ककिरणं नष्टताराम् न चेन्नभः नतां भाद्रपदां मन्ये यत्र देवो न वर्षति ॥ यस्यां भा
द्रपदायां नभ आकाशं नष्टचंद्रार्ककिरणं भवति न। नष्टा अदर्शनं गताः चंद्रार्कयोः शशिसूर्ययोः किरणा यत्र तत्तथाभूतम् मेघच्छन्नत्वात् तथा
नष्टतारां। नष्टा अदर्शनं गतास्तारा नक्षत्राणि च यस्यां भाद्रपदायां देवो न वर्षति न तां भाद्रपदामिति मन्ये जानीमहे इति ॥ अनोर्थोयं श्लोकः ॥
अथ सद्योवर्षणलक्षणाध्यायो व्याख्यायते ॥ ॥ तत्रादावेव वर्षपृच्छकायां वर्षज्ञाने प्रश्नमाह ॥ ॥ वर्षप्रश्ने सलिलनिलयं राशिमाश्रि
त्य चंद्रे लग्नं यातो भवति यदि वा केंद्रगः शुक्लपक्षे। सौम्यैर्दृष्टः प्रचुरमुदकं पापदृष्टोल्पमंभः प्रावृट्काले सृजति न चिराच्चंद्रवद्भार्गवोपि ॥ ॥
वर्षप्रश्ने वृष्टिपृच्छायां चंद्रः शशी सलिलनिलयं जलाशयं राशिमाश्रित्य कर्कटमकरमीनानामन्यतमं संश्रित्य लग्नं तात्कालिकं पृच्छालग्नं
यातः प्राप्तस्तत्र व्यवस्थितः एको योगो भवति यदि वा केंद्रगः शुक्लपक्षे प्रश्नकाले न लग्नगश्चंद्रमा जलराशिस्थो यद्यन्यस्मिन् केंद्रे चतुर्थसप्तमद
शमानामन्यतमे भवति किं सर्वदा नहि शुक्लपक्षे तेनैतदुक्तं भवति कृष्णपक्षे वर्षपृच्छायां यदि जलराशिव्यवस्थितः चंद्रमा लग्ने भवति शुक्लेपु
नर्जलराश्यांश्रित एव लग्नवर्जमन्यकेंद्रगतो भवति तदा द्वितीयो योगः अन्यस्मिन् योगद्वये प्रावृट्काले वर्षासमये न चिरात् शीघ्रमेवांभः पानी
यं सृजति ददाति ॥ ॥ अत्रैव जलस्याल्पत्वं प्रभूतत्वमाह ॥ ॥ सौम्यैर्दृष्टः प्रचुरमुदकमिति यथादर्शितयोगस्थः शशी सौम्यैः शुभयैः
बुधजीवशुक्राणामन्यतमेन दृष्टो विलक्षितो भवति तदा प्रचुरं प्रभूतमुदकं जलं सृजति पापैरादित्यभौमसौराणामन्यतमेन दृष्टमल्पं स्तोकमं
भः चंद्रवद्भार्गवोपि भार्गवः शुक्रः चंद्रवज्ज्ञेयः एतदुक्तं भवति ॥ तथा च ॥ शुक्लपक्षे केंद्रगस्तत्र च योगद्वयेपि सौम्यैर्दृष्टः प्रचुरमुदकं पापदृ
ष्टोल्पमंभो मिश्रदृष्टो मध्यमं जलं सृजति न चात्र यदुक्तम् ॥ लग्नं यातो भवति यदि वा केंद्रगः शुक्लपक्षे। दिवाकेंद्रगः शुक्लपक्षे इति।
तत्किमनेन लग्नग्रहणेन केवलं लग्नं परित्यज्यैतमेव यस्मात्संज्ञाध्यायेभिहितं कंटककेंद्रचतुष्टयसंज्ञा लग्नमलग्नचतुर्थखभानाम् तस्मा
ल्लग्नग्रहणमत्रातिरिच्यत इति अत्रोच्यते न भवति यदि वा केंद्रगः शुक्लपक्षे इति यदुक्तं तदनेनैव विकल्पेनाचार्येण कृष्णपक्षेपि वर्षप्रश्न

११०

परिज्ञानंसविकल्पकमभिहितमेवशुक्लपक्षेलग्नादन्यतमेकेंद्रेवाजलराशिकोपिद्यवस्थितः चंद्रमाः सौम्यैर्यदिदृश्यतेतदासुप्रभूतपानीयंसुवतिपा
पदृष्टेल्पंमिश्रदृष्टेमध्यमंकृष्णपक्षेपुनर्लग्नएवकेंद्रोयदिभवतितत्रस्थः सौम्यैर्दृश्यतेतदा प्रचुरपानीयंसुवतिपापदृष्टेल्पंमिश्रदृष्टेमध्यमंअन्य
केंद्रेष्ववस्थितेशशिनिसौम्ययुदृष्टेपिपानीयंनास्त्येवकुतएतन्निश्चीयतेननुविकल्पादेवमवगतंभवतियदिवाकेंद्रगः शुक्लपक्षेतोयदिवाव
गम्यतेलग्नकेंद्रमुक्त्वाकृष्णपक्षेन्यकेंद्रचिंतानास्त्येवतस्मान्नलग्नग्रहणमत्रातिरिच्यतइति॥ तथाचसमाससंहितायाम्॥ वर्षप्रश्नेप्राप्तेपि
जलराशौकंटकेत्राशीबलवान् भृगुजोवाष्टगुदृष्टेबकुजलक्षत्वल्पदः पापैः॥ अत्रसामान्येनोक्तम्॥ अथान्यत्प्रश्नज्ञानमाह॥
आर्द्रद्रव्यंस्पृशतियदिवावारितत्संज्ञकंवातोयासन्नोभवतियदिवातोयकार्योन्मुखोवाप्रष्टावाच्यः सलिलमचिरादस्तिनिः संशयेनपृच्छाका
लेसलिलमितिवाश्रूयतेयत्रशब्दः॥ अथवाप्रष्टावर्षप्रश्नपृच्छकआर्द्रद्रव्यंसरसंयत्किंचिद्वस्तुविशेषंस्पृशतियदिवावारिजलंस्पृशतितत्सं
ज्ञकंवावारिसंज्ञकंयत्स्पृशतियथाक्षीरपयशङ्खवाच्यावातत्संज्ञंअक्षामुक्ताः अंबुपालकमित्येवमादिअथवाप्रष्टातोयामंत्रोजलसमीप
वर्तीयदिभवति। अथवातोयकार्येजलकार्येतदुन्मुखोगंतुंप्रवृत्तोभवतितदा प्रष्टाएवंवाच्योवक्तव्योयथासलिलंजलमचिरात्शीघ्रमेव
निः संशयेननिर्वर्तकल्पेनास्तिविद्यते॥ अथपृच्छाकालेवाअन्यसमयेसलिलमितिशब्दोवाश्रूयतेयत्रतत्रजलंनिः संशयेनास्तीतिवक्तव्यम्॥ ॥
तथाचसमाससंहितायां॥ आर्द्रद्रव्यंसलिलजंजलसंज्ञाश्रवणादर्शनाद्यथावा॥ ॥ अथोन्यद्वर्षज्ञानमाह॥ उदयशिखरिसंस्थो
दुर्निरीक्ष्योतिदीप्त्याद्रुतकनकनिकाशः स्निग्धवैडूर्यकांतिः तदहनिकुरुतेंभस्तोयकालेविवस्वान्प्रतपतियदिचोच्चैः खंगतोतीवतीक्ष्णम्। ११०
विवस्वानादित्यउदयशिखरिसंस्थः उदयपर्वतमूर्ध्निस्थितः अतिदीप्त्याअतिकांत्यादुर्निरीक्ष्योनिरीक्षितुमशक्यः द्रुतकनकनिकाशः द्रुत
स्यगलितस्यकनकस्यसुवर्णस्यनिकाशस्तत्सदृशः स्निग्धवैडूर्यकांतिः तथास्निग्धस्यवैडूर्यस्यनिर्मलस्यमणेः सदृशकांतेः एवंविधोविवस्वान्
अहनितस्मिन्नेवदिनेअंभस्तोयंकुरुतेतोयकालेवर्षासमयेतोयकालग्रहणमन्यकालेष्वदातार्थम् यदिचोच्चैः खमाकाशंगतोमध्याह्नस्थ

इत्यर्थः घ्नतपत्यतितीव्रांतपतितदापितस्मिन्नहयंभः कुरुतेवर्षणंकरोतीत्यर्थः ॥ ॥ अथहर्षज्ञानमाह ॥ विरसमुदकंगोनेत्राभंवियद्दि
मलादिशोलवणाविकृतिंकाकांडाभंयदाचभवेन्नभः पवनविगमः पोप्लूयंतेझषाः स्थलगामिनोरसनमसकृन्मंडूकानांजलागमहेतवः ॥ इमेस
र्वेजलागमहेतवः पानीयागमकारणानि उदकंजलंविरसंस्वादुरहितंतथागोनेत्राभंगोनयनसदृशंवियदाकाशं। दिशाआशाविमलानिर्मलाः लवणा
स्यसैंधवस्यविकृतिर्विकारआर्द्रताप्रस्वेदः नभआकाशंचयदाकाकांडाभंवायसांडकांतितुल्यंभवेत्स्यात् श्वेतनीलमित्यर्थः पवनविगमोवायोर्नि
रोधः झषामत्स्याः स्थलगामिनशीलाः पोप्लूयंतेअत्यर्थंप्लवतेमंडूकानांअसकृत्पुनःपुनः रसनंशब्दः ॥ ॥ अथहर्षणज्ञानमाह ॥ मार्जारा
भृशमवनिंनखैर्लिखंतोलोहानांमलनिचयःसविस्रगंधः रथ्यानांशिशुनिचिताश्चसेतुबंधाः संप्राप्तंजलमचिरान्निवेदयंति ॥ मार्जाराबिडाला
भृशमत्यर्थमवनिंभूमिंनखैःकरजैर्लिखंतोविलिखंतः तथालोहानामायसभांडानांकांस्यानांवामलनिचयेमलसमूहः सविस्रगंधेनसहविस्रगं
धोनामगंधोवर्त्ततेकेचित्मत्स्यसदृशगंधइतीकंति। एवंमलनिचयोविस्रगंधसहितस्तथारथ्यायांपथिशिशुरचिताबालविरचिताः सेतुबंधायामे
वनिवेदयंतिकथयंति ॥ ॥ अथहर्षज्ञानमाह ॥ ॥ यदिस्थिताष्टरूपटलेषुउत्क्रोशारुवंतिवायदिविततंवियन्मुखाः दिवातडिद्यदिनपिनाकि
दिग्भवातदाक्ष्माभवतिसमैववारिणा ॥ यदायस्मिन्कालेउत्क्रोशाः श्वानोष्टस्यपटलेषुस्थिताः यदिवाविततंसंततंछावावियन्मुखमाका
शंनिरीक्ष्यतोरुवंतिशब्दंकुर्वंति। यदिचदिवादिवसेविद्युत्तडित्पिनाकिदिग्भवाईशानदिगुत्थाभवतितदाक्ष्माभूर्वारिणाजलेनैवसमानिम्नोन्नता
लक्ष्याभवंति अतिवृष्टिर्भवतीत्यर्थः ॥ अथहर्षज्ञानमाह ॥ शुककपोतविलोचनसन्निभोमधुनिभश्चयदाहिमदीधितिः प्रतिशशीच
यदादिविराजतेपततिवारितदापिचिरान्नच ॥ हिमदीधितिः चंद्रः यदायस्मिन्कालेशुककपोतविलोचनसन्निभः शुककपोतौप्रसिद्धौ
पक्षिणौतद्विलोचनसन्निभः तन्नेत्रसदृशाभः लोहिताकांतिरित्यर्थः मधुनिभश्चमाक्षिकसदृशवर्णोवापीताभइत्यर्थः तथाप्रतिशशीद्वितीयचंद्रो
यदाचदिविनभसिराजतेदृश्यतेतदातस्मिन्कालेनचिरेणशीघ्रमेववारिपानीयंपततिवर्षतीत्यर्थः ॥ अथहर्षज्ञानमाह ॥ स्तनितंनिशिविद्यु

तोदिवारुधिराभायदिदंडवत्स्थिताः पवनः स्फुरतः शशीतलो यदिसलिलस्यतदागमोभवेत् ॥ यदिनिशिराचौस्तनितंमेघशब्दोभवतितथावि
घ्नतोदिवादिवसेकीदृशोविघ्नतः रुधिरनिभाश्चतिलोहिताः ताः चदंडवदूर्ध्वाधःस्थित्यास्थिताः तथापवनोवायुः स्फुरतः पूर्वस्यांदिशिशीतलो
वहतितदासलिलस्यजलस्यागमोवृष्टिपातोभवेत्स्यात् ॥ ॥ अन्यद्वर्षज्ञानमाह ॥ ॥ वल्लीनांगगनतलोन्मुखाः प्रवालाः स्नायंतेयदि
जलपांसुभिर्विहंगाः सेवंतेयदिसततरीसृपास्तृणग्राएपासन्नोभवतितदाजलस्यपातः ॥ वल्ल्याः प्रसिद्धाः तासांप्रवालाश्चाभिनवपत्राणिगग
नतलोन्मुखाऊर्ध्वगामिनः यदिचविहंगाःपक्षिणोजलपांसुभिर्जलेनोदकेनपांसुनावाधूल्यास्नायंतेस्नानंकुर्वंतितदाजलस्यपानीयस्यपातः
आसन्नोनिकटोभवतिशीघ्रमेववर्षतीत्यर्थः ॥ ॥ अन्यद्वर्षज्ञानमाह ॥ ॥ मयूरशुकचाषचातकसमानवर्णायदाजपाकुसुमपंक
जघ्नतिमुषश्च संध्याघनाः जलोर्मिनक्रककच्छपवराहमीनोपमाः प्रभूतपुटसंचयानलुचिरेणयच्छंत्यपः ॥ एवंविधाः संध्याकालेघनामेघा
नलुचिरेणाचिरकालेनशीघ्रमेवापोजलंयच्छंतिददति। कीदृशाः यदायस्मिकालेमयूरशुकचाषचातकाः सर्वएवपक्षिविशेषाः एतेषांसमान
वर्णास्तुल्यवर्णाश्चातिनीलकाइत्यर्थः तथाजपाकुसुमपंकजघ्नतिमुषः जपाकुसुमंपुष्पविशेषोतिलोहितः पंकजंपद्मं। पंकेकर्ममेजाय
तेइतिअनयोर्द्युतिंकांतिम् येमुष्णंत्यपहरंतिअतिलोहितत्वात्तथाविधः तथाजलोर्मिनक्रकावर्तः नागः पर्वतः नक्रोजलप्राणीकच्छपः कूर्मः
वराहः सूकरः मीनोमत्स्यः एषांसदृशाकृतयः तथाप्रभूतपुटसंचयः प्रभूतोबहुप्रकारः पुटसंचयोयेषाम् तपःसुपरिस्थितेइत्यर्थः॥ ॥
अथान्यद्वर्षज्ञानमाह ॥ ॥ पर्यंतेषुसुधाशशांकधवलामध्येंजनालित्विषः स्निग्धानेकपुटाः क्षरज्जलकणाः सोपानविच्छेदनः माहेंद्रीप्रभ
वाः प्रयांत्यपरतः प्राच्यांकुपाशाभवायेतेवारिमुचस्त्यजंतिनचिरादंभः प्रभूतंभुवि ॥ एवंविधायेवारिमुचोमेघास्तेनचिराच्छीघ्रमेवभुविप्रभू
मांबुभोजलंप्रभूतंसुबहुत्यजंतिविसृजंति। कीदृशाः पर्यंतेषुसमंततः सुधामकोलः शशांकः चंद्रः तद्वदुज्ज्वलाः शुक्लाः तथामध्येमध्यभागेंज
जनालित्विषः अंजनंप्रसरेकज्जलं। अलिर्भ्रमरः तद्वत्त्विद्कांतिर्येषांतेतथाप्रताः तथास्निग्धानिर्मलाअनेकपुटावकुभिः पुटैरुपलक्षिताः उपर्युपरि

स्थिताइत्यर्थः द्वारंतस्त्यजंतोजलकणाजलबिंदवोयेषांतेसोपानवद्विछेदोयेषांतेसोपानपदपंक्तिन्यायेनस्थिताइत्यर्थः तथामाहेंद्रीप्रभवाः पूर्वस्यांदि
शिउत्पन्नाअपरतःपश्चिमायांदिशिव्रजंतिगच्छंतिअंबुपोवरुणस्तस्याशावारुणीदिक्पश्चिमेत्यर्थः तद्भवास्तत्संभूताः आशापश्चिमांवापूर्वांवादिशंयां
ति ॥ ॥ अथवर्षज्ञानमाह ॥ ॥ शक्रचापपरिघप्रतिसूर्यारोहितोथतडितः परिवेषाः उद्गमास्तसमयेयदिभानोरादिशेत्प्रचुरमंबुतदाशु ॥
भानोरादित्यस्योद्गमास्तसमयेउदयकालेस्तमयकालेवायद्येतेदृश्यंतेतदाशुशीघ्रमेवप्रचुरंप्रभूतमंबुजलमादिशेद्वदेत् केतेशक्रचापपरिघ
प्रतिसूर्याः शक्रचापमिंद्रधनुःपरिघः सूर्योमुद्यास्तसमयेस्तिर्यक्स्थितामेघलेखातस्यलक्षणंवक्ष्यतिपरिघइतिमेघलेखाप्रतिसूर्योद्वितीयोर्कः
रोहितः तस्यलक्षणंवक्ष्यति। सुरचापखंडमृजुयद्रोहितमिति। अथशब्दः स्वार्थे। अथतडितोविद्युतः परिवेषाः सूर्यशशिनोः तस्यलक्षणंव
क्ष्यतिमूर्छितारवीन्द्वोः किरणाइतिएतेसर्वएव ॥ ॥ अथवर्षज्ञानमाह ॥ ॥ यदितित्तिरिपत्रनिभंगगनमुदिताः प्रवदंतिचपक्षिगणाः
उदयास्तसमयेसवितुर्द्युनिशंविसृजंतिघनानचिरेणजलम् ॥ यदिगगनमाकाशंतित्तिरिपत्रनिभंतित्तिरिः परीक्षितस्यपत्रंपक्षस्तन्निभं
इतितंत्वप्राप्ततत्वाद्विचित्रमित्यर्थः तथापक्षिगणाविहगसमूहामुदिताहृष्टाः प्रवदंतिशब्दंकुर्वंते। नतुसवितुः सूर्यस्योदयकालेस्तमयकाले
तेचयदासंध्यंद्युनिशमुदयेदिवसेअस्तेचरात्रौघनामेघानचिरेणशीघ्रमेवजलमुत्सृजंतिविसृजंतिवर्षंतीत्यर्थः उदयकालेदिवावृष्टिरस्तमय
कालेरात्राविति॥ अनार्षोयंश्लोकः॥ ॥ अथवर्षलक्षणमाह ॥ यद्यमोघकिरणाःसहस्रगोरस्तभूधरकराइवोच्छ्रिताः भूसमंचरमते
यदांबुदस्तन्महद्भवतिवृष्टिलक्षणम् ॥ सहस्रंगवांरश्मीनांयस्यसहस्रगुः तस्यसहस्रगोरादित्यस्ययद्यमोघाकिरणाः अमोघाख्यारश्मयः
तेषांलक्षणंवक्ष्यति। शुक्लाः करादिनकृतइतिएवंविधाअमोघकिरणाअस्तभूधरकराइवोच्छ्रिताः अस्तमयपर्वतस्योच्छ्रिताऊर्ध्वीकृताःकराः
हस्ताइवलक्ष्यंते। उदयास्तमययोः चैवंविधादृश्यंते। यतोवक्ष्यत्याचार्यः उदयेस्तेवाभानोर्येदीर्घारश्मयस्तेमोघास्ते। तथाअंबुदोमेघोभूस
मंक्षितिमुच्चंरमतेश्लिष्यतेयत्तत्तस्मान्महद्वृष्टिलक्षणंभवत्यतिवृष्टिचिह्नंभवतीत्यर्थः॥ तथाचसमाससंहितायाम्॥ इष्टाकालेशांतावरुणे

दिक्स्थाविहंगावादर्पणालोहकलंकोलवणोल्कोदोतितीक्ष्णाकिरणोर्कः पोन्नूयंतेमत्स्यादिर्ध्येशान्यांतडिच्चदिवाउल्काणिपुढवदनागावास्तापोभ
तांपवननाशः अंजनपुंजश्यामागिरयोवाष्पाधृतावदियदाजलपांसुस्नानंविहगानांमेथुनंद्विजिह्वानांदृष्टदारोहणमथकंपिपीलकांडोपसंक्रांतिः
चक्रवाकभुककपोतकलविंकपिलोचनेर्कद्वोःस्निग्धःपारिवेशोवाविपदमलंवाल्कनिमित्तम् मधुसदृशःशीतांशुःप्रतिचंद्रःशीतमारुतः
पूर्वःऊर्ध्वांऊराश्चवल्म्यः सद्योवर्षायकीर्त्यंतेस्निग्धासममितिरेखायत्राभ्रदंदानिकल्पितान्येवयद्धंत्यपोमयूखायदिवोदोर्वा। रवेःदीप्ताइति ॥ ॥
अत्रयानिसद्योवर्षचिह्नानिउक्तानितेषुबलवत्सुमहद्दृष्टिंमध्येषुमध्यमामल्पेष्वत्यल्पांवदेत्॥ तथाचपराशरः॥ बलवत्सुमहद्वर्षमल्पे
स्वल्पांबुशीकरम् मध्येषुमध्यमंब्रूयान्निमित्तेष्वनिमित्तवत्॥ उल्कानिर्घातभूकंपपांसुवर्षाणिकेतव। अपसव्यग्रहाश्चैवनित्यंवर्षास्तुवर्षदइति ॥ ॥
अथद्वर्षलक्षणमाह ॥ प्रावृषिशीतकरोभृगुपुत्रात्सप्तमराशिगतःशुभदृष्टः सूर्यसुतान्नवपंचमगोवासप्तमगश्चजलागमनाय ॥ ॥
प्रावृट्स्वग्रहणमन्यकीलयकदासार्थम् प्रावृषिवर्षाकालेशीतकरःचंद्रोभृगुपुत्रात्शुक्रात्सप्तमराशिगतःसप्तमराशौव्यवस्थितःतत्रचशुभदृष्टः
सौम्यग्रहावलोकितस्तदाजलागमनायवर्षागमनायभवतीति अथवासूर्यसुतात्सौरात्सएवचंद्रोनवमगःपंचमगोवासप्तमगश्चयदिभवति
सचशुभदृष्टस्तदाजलागमनायवर्षागमनायभवतीति ॥ ॥ अथद्वर्षलक्षणमाह ॥ प्रायोग्रहाणामुदयास्तकालेसमागमेमंडलसंक्रमे
वा। पक्षक्षयेतीक्ष्णाकरायनांतेदृष्टिर्गतेर्केनियमेनचांद्रम् ॥ ग्रहाणामुदयकालेसूर्यमंडलान्निर्गमेतत्रैवास्तकालेस्तमयेएवमुदयास्तम
यावत्तार्कविप्रकर्षजौज्ञेयौतथासमागमेसमागमःचंद्रेणसहितानांग्रहाणांमंडलसंक्रमेवामंडलानिभरणीपूर्वमंडलमित्यादिमहूमंडला
निशुक्रचारोक्तानितेषांसंगमंप्रवेशेपक्षक्षयः अमावास्यांपौर्णमास्यांतःतस्मिंस्तीक्ष्णाकरस्यादित्यस्यअयनांतेदक्षिणोत्तरयोरयनयोरंतेपद
तौककटमकरसंक्रांतावित्यर्थः एतेषुसर्वेषुप्रायोबाहुल्येनदृष्टिर्भवतितथाअर्केसूर्येआर्द्रांगतेचांद्रंनक्षत्रंप्राप्तेनियमेननिश्चयेनदृष्टिर्भवति॥
अथान्यद्वर्षज्ञानमाह ॥ ॥ समागमेभवतिजलंज्ञशुक्रयोर्ज्ञजीवयोर्गुरुसिततयोश्चसंगमे। यमारयोःपवनहुताशजंभयंह्यदृष्टयोरसहितयो

११२

स्वसञ्ज्ञैः ॥ ज्ञो बुधः शुक्रो भार्गवः तयोर्ज्ञशुक्रयोः समागमे संयोगे जलं पानीयं भवति वर्षतीत्यर्थः तथा ज्ञजीवयोः बुधबृहस्पत्योः संगमे संयोगे
जलं पतति यमारयोः सौरांगारकयोः पवनहुताशजं भयं भवति। पवनो वायुः हुताशनोऽग्निः तज्जं भयं भवति। किं सर्वदा नेत्याह। अदृष्टयोरसंहित
योश्च सञ्ज्ञैरिति सञ्ज्ञा बुधबृहस्पतिशुक्राः एतेषामन्यतमेनादृष्टेरनवलोकितयोरसंहितयोरसंयुक्तयोः पवनहुताशजं भयं भवति युक्तादृष्टयो
र्नेति ॥ अथ यद्वर्षज्ञानमाह ॥ अग्रतः पृष्ठतो वापि ग्रहाः सूर्यावलम्बिनः यदा तदा प्रकुर्वन्ति महीमेकार्णवामिति ॥ सूर्यावलम्बिनो ग्र
हाः सूर्यमवलम्बनशीलाः अस्तमनाभिलाषिण इत्यर्थः अग्रतः पृष्ठतो वा भवन्ति। अग्रतः पुरस्तात् पृष्ठतः पश्चात् यतो मंदग्रहा अग्रेतोऽस्तमयं यान्ति
शीघ्रग्रहाः पृष्ठतः सूर्यस्य प्राक् पश्चाद्वा यद्यस्तमयं कुर्वन्ति यदा यस्मिन्काले तदा तस्मिन्काले महीं भूमिमेकार्णवां सर्वजलमयीं कुर्वन्तीत्यर्थः
बहुवचननिर्देशादन्यादयोऽपि ग्रहा ज्ञेया इति ॥ ॥ इति भट्टोत्पलविरचितायां संहिताविवृतौ सद्योवर्षलक्षणं नामाध्यायः सप्तविंशः ॥ ॥
अथ कुसुमलताध्यायो व्याख्यायते ॥ ॥ तत्रादावेव तत्प्रयोजनप्रदर्शनार्थमाह ॥ ॥ फलकुसुमसंप्रवृद्धिं वनस्पतीनां विलोक्य विज्ञेयम् ।
सुलभत्वं द्रव्याणां निष्पत्तिश्चापि सस्यानाम् ॥ वनस्पतीनां वृक्षाणां फलकुसुमसंप्रवृद्धिं फलानां कुसुमानां च पुष्पाणां सम्यक् प्रवृद्धिं विलो
क्य दृष्ट्वा द्रव्याणां सर्वेषां सुलभत्वं सामर्घ्यं विज्ञेयम् विज्ञातव्यम् तथा सस्यानामपि निष्पत्तिः संपत् ज्ञेयेति ॥ ॥ अथ केन कस्य वृद्धिर्ज्ञेयेत्येत
दाह ॥ सालेन कलमशालीन्रक्ताशोकेन रक्तशालिश्च। पाण्डूकः क्षीरिकया नीलाशोकेन सूकरिकः ॥ सालो वृक्षविशेषस्तस्य फलकुसुम
संप्रवृद्धिं दृष्ट्वा कलमशाल्या निष्पत्तिः सुलभत्वं च ज्ञेयम् एवं सर्वत्र तस्मात् सकमलशाली विज्ञातव्या। रक्ताशोकेन रक्तशालिः पाण्डूकः शालि
विशेषः स च क्षीरिकया दुग्धिकया ज्ञेयः सूकरिकः शालिविशेषः स च नीलाशोकेन ज्ञेयः ॥ अथान्यत् ॥ न्यग्रोधेन तु यवकस्तिंदुकवृ
द्ध्या च षष्टिको भवति। अश्वत्थेन ज्ञेया या निष्पत्तिः सर्वसस्यानाम् ॥ यावकः शालिविशेषः स च न्यग्रोधेन विज्ञेयः षष्टिकः शालिविशेषः स च
तिंदुकवृद्ध्या भवति अश्वत्थेन सर्वसस्यानां निष्पत्तिर्ज्ञेया ज्ञातव्या ॥ अथान्यत् ॥ जंबूभिस्तिलमाषाः शिरीषवृद्ध्या च कंगुनिष्पत्तिः गोधूमाश्च मधूकै

११२ यवबृद्धिः सप्तपर्णेन॥ ॥ जंबूष्टदा विशेषस्तैर्जंबूभिस्तिलमाषा ज्ञातव्याः शिरीषोष्टदास्त हृद्याकं कुनिष्पत्तिः कंगुः प्रियंगुः मधूकोष्टदा विशेषस्तैर्मधूकैर्गोधू
माज्ञेयाः सप्तपर्णोष्टदास्तेन यवबृद्धिर्भवति॥ अथान्यत्॥ अतिमुक्तककुंदाभ्यां कर्पासं सर्षपांश्च वदेदशनैः बदरीभिश्च कुलुत्थांश्चिरबिल्वेनादिशेन्मु
थान्॥ अतिमुक्तकोष्टदा विशेषः कुंदश्च यच्च कुंदपुष्पाणि भवंति ताभ्यामतिमुक्तककुंदाभ्यां कर्पासं वदेद्ब्रूयात् अशनोष्टदास्तैः सर्षपांश्च वदेद्ब्रूयात्
बदरीभिश्च कुलुत्थान्वदेत् चिरबिल्वेन करंजेन मुथानादिशेत् ब्रूयात्॥ अन्यदप्याह॥ अतसीवेतसपुष्पैः पलाशकुसुमैश्च कोद्रवा ज्ञेयाः
तिलेन शंखमौक्तिकरजतान्यथ चेत् कुंदेन शराः॥ वेतसोष्टदास्तत्पुष्पैरतसी ज्ञेयाः ज्ञातव्या। पलाशकुसुमैः पलाशष्टदा पुष्पैः कोद्रवा ज्ञेया ज्ञात
व्याः तिलकोष्टदा विशेषस्तेन शंखमौक्तिकरजतानि शंखः प्रसिद्धः मौक्तिकं मुक्ताफलानि। रजतं रूप्यं। एतानि विज्ञेयानि। अथानंतरमिंगुदेनष्टदा
विशेषेण शरा ज्ञेयाः॥ ॥ अथान्यत्॥ करिणश्च हस्तिकर्णै रादेश्या वाजिनोऽश्वकर्णेन। गावश्च पटलादिरजाविकं भवति॥ हस्तिकर्णैः क
रिणो गजाः आदेश्या वक्तव्याः वाजिनोऽश्वास्ते वा अश्वकर्णेन एतौ द्वावपि तु प्रसिद्धौ पटलाष्टदा जातिस्ताभिर्गावः अजाश्छाग अविर्मेषः तदजाविकं कद
लीभिरंभाभिर्भवति॥ अथान्यत्॥ चम्पककुसुमैः कनकं विद्रुमसंपच्च बंधुजीवेन। कुरवकष्टदाश्च वज्रं मणि कुरवकवैडूर्यम्॥ वज्रं म
णिविशेषस्तत्कुरवकष्टदान्नंदिकावर्तैर्वैडूर्यम्॥ अथान्यत्॥ विद्याच्च सिंधुवारेण मौक्तिकं कारकाः कुसुंभेन रक्तोत्पलेन राजा मंत्री नीलोत्प
लेनोक्तः॥ सिंधुवारोष्टदा तेन मौक्तिके विद्याज्जानीयात् कारुकाः शिल्पिनः कुसुंभेन महाराज नेनरा जा नृपो रक्तोत्पलेनोक्तः नीलोत्पलेन मंत्री सचि
वः॥ अथान्यत्॥ श्रेष्ठी सुवर्णपुष्पाः पद्मैर्विप्राः पुरोहिताः कुमुदैः सौगंधिकेन बलपतिरर्केण हिरण्यपरिवृद्धिः॥ सुवर्णपुष्पाः श्रेष्ठी ज्ञेयाः
पद्मैः कमलैर्विप्रा ब्राह्मणाः कुमुदैः कैरवैः पुरोहिताश्चाचार्याः बलपतिः सेनापतिः सौगंधिकेन हिरण्यसुवर्णस्य परिवृद्धिरर्केण॥ अथान्यत्॥ ११२
आम्रैः क्षेमं भल्लातकैर्भयं पीलुभिस्तथारोग्यम् खदिरशमीभ्यां दुर्भिक्षमर्जुनैः शोभनं वृष्टिः॥ आम्रैः चूतैः क्षेमं विद्यात् भल्लातकैर्भयम्भीतिम्
पीलुभिस्तथा आरोग्यमरोगित्वम् खदिरशमीभ्यां प्रवृद्धाभ्यां दुर्भिक्षं भवति अर्जुनैः शोभना वृष्टिः सुवृष्टिर्भवतीत्यर्थः॥ ॥ अन्यदप्याह॥ पिचु

उदयमध्यास्तमयकाले दृष्टो वल्लोकितः शस्त्रभयातंककरो भवति। शस्त्रभयमातंकमुपद्रवं च करोति। उल्काद्यः सितरक्तपीतवर्णाः क्रमाद्विप्रादीन्
ब्राह्मणक्षत्रियविट्शूद्रान्निरंकुशं घातयंति। यस्यां दिशि अभिमुखः संमुखः सदंडः तां दिशमाशां निहंति अर्कसन्निकृष्टो भागस्तस्य मूलमन्यो मुखमिति ॥
अथान्यल्लक्षणमाह ॥ ॥ दधिसदृशाभ्रो नीलो भानुवृकादीवमध्यगोऽभ्रतरुः पीतकुरिताश्च घना घनमूला भूरिवृष्टिकराः ॥ अभ्रतरुर्मेघवृक्षः दधि
सदृशाभ्रः दधिसदृशमभ्रं यस्य श्वेताभ्र इत्यर्थः तथा नीलो नीलवर्णो भानुवृकादी सूर्यमाच्छादयति तद्वील्लः सचावमध्यगः आकाशमध्यगस्थः तथा घना मेघाः
पीतकुरिताः पीतेन पीतवर्णेन रंजिताः कुरिता रंजिताः ते च घनमूलाः घनानि संततानि मूलानि येषां एते सर्व एव भूरिवृष्टिकराः प्रभूतां वृष्टिं कुर्वंति ॥
अथाभ्रवृक्षेणैव विपर्यासेः शुभाशुभमाह ॥ अनुलोमगेऽभ्रवृक्षे शमं गते यायिनो नृपस्य वधः बालतरुः अतिह्रस्विः युवराजामात्ययोर्मृत्युः ॥
अभ्रवृक्षे मेघतरौ यायिनो जिगमिषोर्नृपस्य राज्ञः अनुलोमगे तत्पश्चाद्गच्छमाने शमं गते कस्मान्नष्टे तस्यैव यायिनो वधो मरणं भवति। तस्मिन्नेवाभ्रतरौ बा
लतरुः अतिह्रस्विः बालवृक्षस्तादृशे शमं गते युवराजामात्ययोर्मृत्युर्मरणं भवति। अर्धराज्यभाग्युवराजः अमात्यो मंत्री ॥ अथ पुनरपि संध्यालक्षण
माह ॥ कुवलयवैडूर्यांबुजकिंजल्काभा प्रभंजनोन्मुक्ता। संध्या करोति वृष्टिं रविकिरणोद्भासिता सद्यः ॥ एवंविधा संध्या तस्मिन्नेवाह्नि सद्यः
वृष्टिं करोति। कीदृशी कुवलयं नीलोत्पलं वैडूर्यो मणिर्नीलपीतः अंबुजकिंजल्कः पद्मकेसरं एषां सदृशी आभा कांतिर्यस्याः तथा प्रभंजनोन्मुक्ता प्रभं
जनेन वातेनोन्मुक्ता रहिता तथा रविकिरणोद्भासिता प्रकाशीकृतेति ॥ अन्यल्लक्षणमाह ॥ अशुभाकृतिघनगंधर्वनगरनीहारधूमपांसुयु
ता। नावृष्टिकरोत्यवयर्तुमत्यंतौ शस्त्रकोपकरी ॥ अशुभा अनिष्टा आकृतिर्येषां घनानां मेघानां गर्दभोलूककबंधध्वांक्षमार्जाराकृतय इत्यर्थः तथा
गंधर्वनगरं खपुरम् नीहारधूमपांसवः प्रसिद्धाः एतैर्युक्ता या संध्या सा नावृष्टिवर्षाकाले अवयर्तु वृष्टिं करोति। वर्षावर्जिते अन्यस्मिन्नृतौ शस्त्रको
पकारी शस्त्रप्रकोपं करोति ॥ ॥ अथ षड्स्वृतुषु संध्यालक्षणमाह ॥ ॥ शिशिरादिषु वर्णाः शोणपीतसितचित्रपद्मरुधिरनिभाः। प्रकृतिभ
वाः संध्यायां स्वर्तौ शस्ता विकृतिरन्या ॥ शिशिरादिषु षड्स्वृतुषु शोणादयो वर्णाः संध्यायां प्रकृतिभवाः सहजाः स्वांतात्मीयर्तौ शस्ताः शुभा भवंति।

116

तद्यथा। शिशिरे शोणा लोहितवर्णा संध्या शस्ता शुभा वसंते पीता ग्रीष्मे सिता श्वेतवर्णा वर्षासु चित्रा नानावर्णा शरदि पद्मवर्णा रक्ता गौरा हेमंते रुधिरनिभा सं
ध्या शस्ता शुभा वसंते पीता ग्रीष्मे सिता श्वेतवर्णा वर्षासु अतिलोहिता एते स्वर्त्तवात्मीयवर्णैः शस्ताः अन्या विकृतिर्विकारः शिशिरादिषु ये वर्णाः क्रमेणोक्ताः तए
व यदा विपर्ययेण भवंति। तदा विकृतिर्विकारोऽशुभः इत्यर्थः॥ तथा च गर्गः॥ वसंते मधुवर्णाभा अथवा रुधिरसंभवा। ग्रीष्मे श्वेता रजोध्वस्ता पांसुवर्णा विरा
ज्यते। नीललोहितशुक्लाभा संध्या वर्षासु कर्णिका। मांजिष्ठवर्णा शरदि पीयूषाभा च गद्यते। हेमंते बभ्रुवर्णा च पिंगला चापि पिंजिता। शिशिरे शोणवर्णा च संध्या
क्षेमसुखप्रदा। स्निग्धा प्रसन्ना विमला सुप्रभा नाकुला पि वा। संध्या यथर्तुवर्णाभा शांता द्विजहृष्टगा शुभा॥ अथान्यल्लक्षणमाह॥ आयुधभृन्नररूपं
छिन्नाभ्रं परभयायरविगामि। सितपुरे कर्काक्रांते पुरलाभो भेदनेन नाशः॥ छिन्नाभ्रं मेघखंडं आयुधभृन्नररूपं आयुधं पुरुषमिव उत्तरविगामि अर्कसमीपव
र्त्ति यदि भवति तदा परभयाय भवति। परेषां शत्रूणां संबंधि भयमुत्पद्यते सितखपुरे शुक्लवर्णे गंधर्वनगरे अर्काक्रांते अर्कः सूर्यः आक्रांतो येन तत्कादितइ
त्यर्थः तस्मिन्पुरलाभः येन पुरं नगरमाक्रांतरुद्धं तस्य लाभो भवति भेदनेन नाशः अर्केण यदा मध्यात्खपुरं भिद्यते। तदा पुरस्य नाशः परैः लुंठनं भवति॥
अन्यदप्याह॥ सितासितांतघनावरणं रवेर्भवति दृष्टिकरं यदि सव्यतः यदि च वीरणगुल्मनिभैर्घनैर्दिवसभर्तुरुदीप्तदिगुद्भवैः॥ सिताः शुक्लाः
ते च सितांताः सितशुक्लांतो येषां ते सितैः सितांतैः घनैः मेघैः रवेः आदित्यस्य गच्छतः दक्षिणत आवरणमाच्छादनं यदि भवति तदा दृष्टिकरं भवति यदि
च दिवसभर्तुरादित्यस्य घनैर्मेघैः वीरणगुल्मनिभैः वीरणः तृणविशेषस्तस्य गुल्मः स्तम्बः तत्सदृशैः रदीप्तदिगुद्भवैः शांतदिक्संभूतैः सव्यतो दक्षिणेन
आवरणं भवति तद् दृष्टिकरम्॥ अथ परिघवशेन शुभाशुभमाह॥ नृपविपत्तिकरः परिघः सितः क्षतजतुल्यवपुः बलकोपकृत् कनक
रूपधरो बलवृद्धिदः सवितुरुद्गमकालसमुत्थितः॥ सवितुरादित्यस्य परिघस्तिर्यक्स्थितो मेघो रेखेत्यर्थः उद्गमकाले उदयसमये समुत्थितः उत्पन्नः
सितः शुक्लो यदि दृश्यते। तदा नृपस्य राज्ञः विपत्तिकरो नृपसुदः क्षतजतुल्यवपुः रक्तसवर्णो बलस्य सेनायाः कोपकृत् भंगदः बलस्वामिनो वा क्षयति। कन
करूपधरः सुवर्णसदृशो बलस्य वृद्धिदो भवति॥ अथ परिधिवशेन शुभाशुभमाह॥ उदयपार्श्वगतो परिधी रवेः त्रिचतुरस्तोयकरो वपुषान्वितो॥

अथसमस्तककुप्परिवारिणः परिधयोऽस्तिकारणेपिनवारिणः ॥ रवेरादित्यस्यपरिधीत्रिनिस्त्रिर्वावुदयपार्श्वगतौपार्श्वद्वयस्थौतौचवज्रघातकारी
रेणान्वितोस्सूर्यसंयुक्तौयतस्तयोः सूर्यएवशरीरंतथाऽस्तौत्रचुरतोयकरौबकुजनन्दौ॥ अथपरिधयःसमस्तककुप्परिवारिणःसकलदिग्व्यापि
नोभवंतितदावारिणः जलस्यकारणेपिनास्तिवर्षतीत्यर्थः ॥ अथसंध्याघनानांलक्षणमाह ॥ ध्वजातपत्रपर्वतद्विपाश्वरूपधारिणः
जयायसंध्ययोर्घनारणावरक्तसन्निभाः ॥ पलालधूमसंचयस्थितोपमाबलाहकाः बलान्यदृढमूर्त्तयोविवर्धयंतिभूभृतां। विलंबिनो
द्रुमोपलाःखराकृणप्रकाशिनः घनाःशिवायसंध्ययोःपुरोपमाःशुभावहाः ॥ एवंविधाघनानांमेघाःसंध्ययोर्दृष्टाज्जयायनृपाणांजनानां
वाभवंति। कीदृशाध्वजातपत्रेति। ध्वजाःप्रसिद्धाविविधपटंनिर्मितंचिह्नंआतपत्रंछत्रं पर्वतःशैलःद्विपोहस्तीअश्वास्तुरगाएतेषांसदृश
रूपधारिणस्तदाकृतयइत्यर्थः तथारक्तसन्निभाःअतिलोहिताःरणायसंग्रामायभवंति। पलालधूमेति। एवंविधाबलाहकामेघाअदृढमू
र्त्तयःस्निग्धशरीराःभूभृतांराज्ञांबलानिसैन्यानिविवर्धयंतिवृद्धिंनयंति। कीदृशाः पलालधूमसंचयस्थितोपमाः पलालस्यधूमःपलालधूमः
तस्यसंचयःसमूहःपलालधूमस्थितइवतदुपमास्तत्सदृशाः विलंबिनइति। एवंविधाघनाःमेघाःसंध्ययोःशिवायश्रेयसेभवंति। कीदृशाः
विलंबिनःलंबमानाःद्रुमोपमावृक्षाकृतयःखराकृणप्रकाशिनःखराअतीवयामावकरणातालोहितातयातिप्रकाशिनोदीप्तिजनकाःतथा
पुरोपमाःपुराकाराःशुभावहाःशुभमावहंति ॥ ॥ अथविशेषलक्षणमाह ॥ दीप्तविहंगशिवामृगघुष्टादंडरजःपरिघादियुताश्च। प्र
त्यहमर्कविकारयुतावादेशनरेशसुभिक्षवधाय ॥ एवंविधासंध्यादेशस्यजानपदस्यनरेशस्यराज्ञःसुभिक्षस्यचवधायनाशायभवति
कीदृशीदीप्तैःसूर्याभिमुखैःविहगैःपक्षिभिःतथाशिवाभिर्दीप्ताभिःदीप्तैश्चमृगैरारण्यप्राणिभिर्घुष्टाकृतशब्दातथादंडेनरजसापरिघेनच
युक्तासंयुक्ताआदिग्रहणात्सुरचापगंधर्वनगरनीहाराज्ञेयाः प्रत्यहंप्रतिदिनमर्कविकारयुतावासविकारार्कसंयुक्तात्वरूपाच्यावविकृ
ता॥ तथाचपराशरः॥ अथसंध्यास्तुद्वियोजनांतरेदेशेसद्यःफलमादिशेत् रश्मिसंयुक्तावालसन्तराज्ञनिवातेनिर्मलस्निग्धायांरणं

तप्तगद्विजायांप्रसन्नायामनुपरुतायांसंध्यायांयोगक्षेमंविद्यात्विपर्ययंविपरीतायांवस्तुदृष्टिंतस्यामेवपरिमंडलायांरक्तायांहरितायांशस्त्र
कोपमांजिष्ठायामग्निंपीतायांचतुष्पाद्रोगंश्यावायांचौरतोभयंनीलपीतायामीतिंगवांहरितवर्णायांप्रथमामात्यस्यशस्त्रेणवधमाम्रकोरक
वर्णायांवर्षंनीलरक्तायामवग्रहस्तथाधाक्षसागौरायात् पशुजातंविद्यात् वातं। कपिलायामस्तमितमात्रेसूर्येवातिमात्रंप्रकाशास्या त्र
प्रभासानाचामृतमस्यांवर्षंविद्यात् अत्युपसितस्तद्रूपायामेवराज्ञःसेनापतेर्वावधःस्यात् महावर्षंकृष्णवर्णायांनीलायांचतस्यामेवमध्यमा
यांक्षमामन्त्रतोवर्षंदृष्टतावग्रहस्तथापीतमांजिष्ठाग्निजीविनांवधायस्निग्धास्तगौरीयोगक्षेमायभवतिचात्र॥ प्रतिसूर्यःशक्रधनुर्दंड
कःपरिवेशणाम् तथैरावतमंदाश्चस्निग्धायेचार्करश्मयः विद्युतोभूरिकाश्चवर्णायेचप्रदक्षिणाः संध्यास्तुयदिदृश्यंते सद्योवर्षणलक्ष
णामिति॥ तथाचकाश्यपः॥ दिनरात्र्यंतरंसंध्यास्तूर्यस्यार्धंप्रदृश्यते। यावंतंतावदारभ्यशुभावाथशुभापिवा। नभोमलंशुभदिशःप्रशांत
णासमप्रभाः मारुतोवातिसुरभिःसुखदोष्णःसुशीतलः एवंसंध्याशुभाज्ञेयाविपरीताशुभामृता। रूक्षाचसविकारार्काक्रव्यादस्वरनादिता।
स्निग्धादंडपरीवेषासुरचापविभूषिता। क्षिप्रंवर्षप्रदासंध्याज्ञेयारोग्यविवृद्धिदा॥ अथैतासांसंध्यालक्षणोक्तानांफलानांफलकालनि
यमार्थमाह॥ ॥ प्राचीतत्क्षणमेवनक्तमपरासंध्याच्यहाद्वाफलंसप्ताहात्परिवेशरेणुपरिघाःकुर्वंतिसद्योनचेत् तद्वत्सूर्यकरेंद्र
कार्मुकतडित्प्रत्यर्कमेघानिलास्तस्मिन्नेवदिनेमृगेमेघ्याविहगाःसप्ताहपाकास्मृताः॥ प्राचीपूर्वासंध्याशुभमशुभंवाफलंतत्क्षणात्त
स्यामेववेलायांनकरोतिनक्तंसम परात्रपरापश्चिमाद्वितीयासंध्याशुभमशुभंवाफलंनक्तंरात्रौकरोतिच्यहाद्वाफलमितिसंध्याफल
मुक्तकालेयदिनदृश्यतेतदाच्यहात्सप्ताहिनत्रयेणभवतिसप्ताहाद्वातिपरिवेशाःसूर्यचंद्रयोरेणुःधूलिःपरिघाःतिर्यक्स्थिताःसूर्यस्योदये ११७
स्तमयेवामेघरेखाएतेदृष्टाःसद्यस्तस्मिन्नेवाहनिफलंकुर्वंति। चेत्कृत्स्नोपग्रहार्थे। यदिसद्योनकुर्वंतितदासप्ताहाद्दिनसप्तकेनशुभमशुभंवाफलं
कुर्वंतितद्वदिति॥ सूर्यकराःसूर्यरश्मयःअमोघादिकाःइंद्रकार्मुकमिंद्रधनुःतडित्विद्युत्प्रत्यर्कःप्रतिसूर्यःमेघाःप्रसिद्धाःअनिलोवाताः

एतेसर्वेएवतद्वत्सद्यःशुभमशुभंवाफलंकुर्वंतियदिसद्योनकुर्वंतितदाष्टमेदिने। अथशब्दोविकल्पे। सप्ताहपाकाष्टमगाः ष्टमाश्चरात्र्यशानिनः सप्ताहपाकः
सप्ताहमध्येपाकंफलंशुभमशुभंवाकुर्वंतीति ॥ अन्येप्याह ॥ एवंदीप्त्यायोजनंभातिसंध्याविद्युज्ज्ञासाःषट् प्रकाशीकरोति। पंचाब्दानांगर्जि
तंयातिशब्दोनास्तीयंताकेचिदुल्कानिपाते ॥ संध्यादीप्त्याकांत्याएवंचयोजनंभातिप्रकाशयति। साचतावन्मात्रेएवफलदायोजनफलप्रदेत्यर्थः
तथाविद्युज्ज्ञासातडिद्दीप्त्याषड्योजनानिप्रकाशीकरोतिषण्णांयोजनानांसाफलदेत्यर्थः अब्दानांमेघानांगर्जितंशब्दः पंचयोजनानियातिगच्छ
तियोजनपंचकेफलदइत्यर्थः नास्तीयतेतिकेचिद्देवलादयएवमाहुः यथोल्कानिपातेइयत्तापरिछित्तिर्नास्तिसर्वत्रसाफलदेत्यर्थः॥ तथाचदे
वलः॥ संध्यात्रियोजनंभातिविद्युज्ज्ञासाषडेवहि। मेघशब्दस्तुपंचानांयोजनानांफलप्रदः। उल्कासर्वत्रफलदाशुभावाप्यशुभापिवेति ॥
अथान्येषामप्याह ॥ ॥ प्रत्यर्कसंज्ञपरिधिस्तत्स्यत्रियोजनाभः परिघस्यपंच। षट् पंचदृश्यंपरिवेशचक्रंदशामरेशस्यधनुर्विभाति ॥
प्रत्यर्कसंज्ञेयः सूर्यः प्रतिसूर्यः तस्यपरिधिस्त्रियोजनाभः त्रयाणांयोजनानांतस्याभाकांतिः दृश्यतेयोजनत्रयेफलदाइत्यर्थः परिघ
स्यपंचपंचसुयोजनेषुपरिघोदृश्यतेतावत्स्वेवफलदः परिवेशचक्रंपरिवेषमंडलंषट्पंचदृश्यंषट्सुपंचसुवायोजनेषुदृश्यतेतावन्मात्रए
वफलप्रदम् अमरेशस्येंद्रधनुरिंद्रचापंदशयोजनानिविभातिप्रकटीकरोति। दशानांयोजनानांबलमिदंइत्यर्थः॥ ॥ ॥ ॥ ॥
इतिभट्टोत्पलविरचितायांसंहिताविवृतौसंध्यालक्षणंनामएकोनत्रिंशोध्यायः ॥ ॥ अथदिग्दाहलक्षणंव्याख्यायते ॥ ॥
तत्रादावेववर्णभेदनंतस्यैवफलमाह ॥ ॥ दाहोदिशांराजभयायपीतोदेशस्यनाशायहुताशवर्णः यश्चारुणःस्यादपसव्यवायुःसस्यस्य
नाशंचकरोतिदृष्टः ॥ ॥ दिशांदाहोदिग्दाहः पीतः पीतवर्णः राजभयायनृपतीनांभयोभवति। यथाहुताशवर्णोग्निसमप्रभोदेशस्यजन
पदस्यनाशायक्षयायभवति। यश्चारुणोलोहितवर्णःस्यात्प्राग्भवेत् सचापसव्यवायुः अपसव्योवामोवायुर्यस्यसदृष्टोवलोकितः सस्यस्यनाशं
क्षयंकरोति ॥ अथान्यदप्याह ॥ योऽतीवदीप्त्याकुरुतेप्रकाशंछायामपिव्यंजयतेर्कवद्यः राज्ञोमहद्वेदयतेभयंसशस्त्रप्रकोपंक्षतजानुरूपः ॥

योदिग्दाहोतीवदीप्त्याग्निकान्त्या प्रकाशं कुरुते तद्योतं जनयति। तिथ्ययोरर्कवदादित्यवद्या यामपि सं जयते दृश्यमानायेभावास्तदीयां क्रिया
मुत्पादयतीत्यर्थः सचराज्ञो नृपस्य मरणं भयं वेदयते आख्याति। रुतजानुरूपो रक्तवर्णः अतिलोहितइत्यर्थः सशस्त्रप्रकोपं करोति ॥ ॥
अथ सर्वासु दिक्षु फलमाह ॥ प्राक् क्षत्रियाणां सनरेश्वराणां प्राग्दक्षिणे शिल्पिकुमारपीडा। याम्ये सहोग्रैः पुरुषैस्तु वैश्या दूता पुन
र्भूप्रमदाश्च कोणे ॥ पश्चात्तु शूद्राः कृषिजीविनश्च चौरास्तुरङ्गैः सह वायुदिक्स्थाः पीडां व्रजन्त्युत्तरतश्च विप्राः पाषण्डिनो वाणिजकाश्च
साध्यम् ॥ प्राक् पूर्वस्यां दिशि दिग्दाहो दृष्टः क्षत्रियाणां क्षत्रियजातीनां सनरेश्वराणां नरेश्वरा राजानस्तैः सहितानां पीडां करोति। तथा
प्राग्दक्षिणे आग्नेय्यां दिशि शिल्पिनां लोहकारस्वर्णकारादीनां कुमाराणां च पीडां करोति। याम्ये दक्षिणे वैश्याः वैश्यजातयः उग्रैः क्रूरैः पु
रुषैः सह पीडां व्रजन्ति प्राप्नुवन्ति। दूता गमागमिकाः पुनर्भूः प्रमदाश्च पुनर्भूः स्त्रियः कोणे नैरृत्यां दिशि पीडां व्रजन्ति। अक्षतयोनित्वात्
या पुनर्दत्ता सा पुनर्भूः तथा च पुनर्भूः सोच्यते। भूयो वा क्षतत्वात् यथाविधि पश्चात्तु शूद्रा इति। शूद्राः शूद्रजातयः कृषिजीविनः कार्षि
काः पश्चात्पश्चिमायां दिशि पीडां व्रजन्ति। वायुदिक्स्थो वायव्यां दिशि स्थितो दिग्दाहः चौरैः तुरङ्गैः अश्वैः सह पीडां व्रजन्ति। उत्तरत उत्त
रस्यां दिशि विप्रा ब्राह्मणाः पीडां व्रजन्ति। पाषण्डिनो वेदबाह्या वाणिजकाश्च कश्रेणीनां भयमादिशेत्। आग्नेय्यां तु कुमाराणां वैश्यानां दक्षिणे त
था। नैरृत्यां चत्वरोहं तिम्शूद्राः पश्चिमतस्तथा। वायव्यां चौरभयं विप्राणामुत्तरतस्तथा। पाषण्डिवाणिजां पीडामैशान्यां दिग्दीप्यतेति ॥
अथ शुभलक्षणमाह ॥ नभः प्रसन्नं विमलानि भानि प्रदक्षिणं वाति सदागतिश्च। दिशां च दाहः कनकावदातो हिताय लोकस्य सपार्थिवस्य ॥
नभ आकाशं प्रसन्नं निर्मलं। तथा भानि नक्षत्राणि विमलानि स्निग्धानि सदागतिर्वायुश्च प्रदक्षिणं वाति यादक्षिणेनवहति। दिशां च दाहो दिग्दाहः
कनकावदातः कनकवत्सुवर्णवदवदातो निर्मलस्तथाभूतः सपार्थिवस्य सनृपस्य लोकस्य जनपदस्य हिताय श्रेयसे भवति ॥ ॥ ॥
इति श्रीमद्भट्टोत्पलविरचितायां संहिताविवृतौ दिग्दाहलक्षणं नाम त्रिंशोऽध्यायः ॥ ॥ अथ भूकम्पलक्षणाध्यायो व्याख्यायते ॥ ॥

अथसस्यजातकंव्याख्यायते ॥ ॥ तत्रादावेवागमप्रदर्शनार्थमाह ॥ ॥ वृश्चिकवृषप्रवेशेभानोर्यैर्बादरायणेनोक्ताः ग्रीष्मशरत्सस्या
नांसदसद्योगाः कृताः तदिमे ॥ भानोरादित्यस्यवृश्चिकप्रवेशेवृषप्रवेशेचयथाक्रमंग्रीष्मशरत्सस्यानांवृश्चिकप्रवेशेग्रीष्मसस्यानांयवादी
नांवृषप्रवेशेशरत्सस्यानांधान्यादीनांबादरायणेनाचार्येणसदसद्योगाशुभाशुभायेयोगाउक्ताः कथिताः तदिमेसर्वेमयात्रकृताइति। एतदुक्तंभ
वति। यत्रदिनेरवेर्वृश्चिकसंक्रमणंभवतितत्रवृश्चिकमेवलग्नंपरिकल्प्यवक्ष्यमाणविधिनाग्रीष्मसस्यानांजन्मविचारणीयं। एवंवृषसंक्रम
णवेलायांवृषमेवलग्नंपरिकल्प्यशरत्सस्यानांजन्मविचारणीयम् इति ॥ ॥ तत्रादावेयोगप्रदर्शनार्थमाह ॥ भानोरलिप्रवेशेकेंद्रैस्तस्मा
च्छुभग्रहाक्रांतैः बलवद्भिः सौम्यैर्वानिरीक्षितेग्रैष्मिकविवृद्धिः ॥ भानोरादित्यस्यालिप्रवेशेवृश्चिकप्रवेशसमयेअयंविचारः केंद्रैः तस्मात्
शुभग्रहाक्रांतैः शुभग्रहाबुधगुरुसिताः अत्रावधित्वेनवृश्चिकप्रवेशावस्थितिः सवितुर्निर्दिष्टाः एवंतस्मादित्यकेंद्रैः शुभग्रहाक्रांतैः सौम्यग्रह
युतैः एतदुक्तंभवति। यदासूर्यस्यवृश्चिकप्रवेशेकेंद्रस्थानानिशुभग्रहाक्रांतानिभवंतितदाग्रैष्मिकसस्यविवृद्धिर्भवति। सुष्टुवृद्धिः सुवृद्धिः
बलवद्भिः सौम्यैर्वानिरीक्षिते। अथवाभानोः केंद्रस्थानानिशुभग्रहाक्रांतानिनभवंतिबलवद्भिः सौम्यैः केंद्रवर्तमन्यत्रावस्थितैः भानौनिरीक्षि
तेदृष्टेग्रैष्मिकविवृद्धिर्भवति। अत्रकेंद्रनिर्देशादनंतरमेवैनत्यशब्दोनिर्दिष्टः तत्केंद्रगतैरपियैर्दृश्यतएवकस्मादाचार्येणदर्शननिर्देशेनैवकेवले
ननिर्देशः क्रियते। यदादित्यकेंद्रावस्थितस्यग्रहस्यकथंदर्शनमित्यभ्युपगम्यस्यापिब्रूमः यद्येवंतदात्वेवंनिर्दिष्टुंयुक्तं। यथाकालविद्भिः सौम्यैः
दृष्टभानोयुक्तइतिवा। यस्मादाचार्यः सुष्टुसमासोक्तिप्रियः पठेकारोस्यबलवद्भिः सौम्यैर्वानिरीक्षितेइत्यस्माद्विकाराद्वाविदमवगम्यते। यथासौम्यैः
बलिभिरबलिभिर्वाकेंद्रस्थानानियुक्तानिभवंति। तदाग्रैष्मिकसस्यस्यवृद्धिर्भवति। यदातुपुनः त्रिकोणरिपुलाभगाः सौम्याबलिनः पश्यंति।
तदाग्रैष्मिकसस्यस्यविवृद्धिर्भवति। मध्यदिनेर्याप्यताबलहीनैस्तमनागपिसस्यानांवृद्धिर्भवति॥ तथाचबादरायणः॥ वृश्चिकसंस्थेसूर्येसौम्यैः
बलिभिर्निरीक्षितेवृद्धिदम् तैरेवकेंद्रगैर्वाग्रीष्मसस्यस्यनिर्दिशेन्महतीम्॥ ॥ अथयोगांतरमाह ॥ अष्टमराशिगतेर्केगुरुशशिनोः कुंभ

१३२ सिंहसंस्थितयोः सिंहघटसंस्थयोर्वा निष्पत्तिर्ग्रीष्मसस्यस्य ॥ अर्करवावष्टमराशिगते वृश्चिकस्थे इत्यर्थः गुरुशशिनोः जीवचंद्रयोर्यथाक्रमं कुंभ
सिंहसंस्थितयोः गुरुः कुंभे शशी सिंहे अथवा सिंह घटस्थितयोः गुरुः सिंहे राशी घटे कुंभे तथापि ग्रीष्मसस्यस्य निष्पत्तिर्वक्तव्येति ॥ ॥ अथ
द्योगांतरमाह ॥ अर्कात्सिते द्वितीये बुधे यद्वा युगपदेव वास्थितयोः व्ययगतयोरपि तद्वन्निष्पत्तिरतीव गुरुदृष्ट्या ॥ अर्कादिवेरलिस्थितात्
सिते शुक्रे द्वितीये द्वितीय उपस्थे बुधे अथवा द्वितीये अथवा तयोरेव बुधसितयोः द्वयोरेव युगपद्द्वयोरेव द्वितीयस्थयोः व्ययगतयोरपि तद्वत्तेनैव
प्रकारेण व्ययगतयोरादित्याद्द्वादशस्थाने स्थितयोः ——— सस्यानां धान्यानां निष्पत्तिर्भवति अतीव गुरुदृष्ट्या गुरुर्बृहस्पतिः
यदादित्यं पश्यति तदा अतीव सस्यानां निष्पत्तिर्भवति तथा च बादरायणः ॥ सूर्याद्बुधे द्वितीये शुक्रे वा युगपदेव तयोः रिःफगतयोरप्येवं निष्पत्तिः
गुरुदृशातीव ॥ ॥ अथ योगांतरमाह ॥ शुभमध्येऽलिनि सूर्याद्गुरुशशिनोः सप्तमे परा संपत् अन्त्यादिस्थे सवितरि गुरौ द्वितीये च निष्पत्तिः ॥
अलिनि वृश्चिके शुभमध्यस्थिते वृश्चिकात्सूर्ययुक्ताद्बुधशुक्रयोरेको द्वितीयस्थाने भवति अन्यो द्वादशे वा शुभमध्यगतो भवति तथाभूतात्सूर्या
दित्यात् गुरुशशिनोः बृहस्पतिचंद्रयोः सप्तमस्थाने स्थितयोः परा प्रकृष्टा संपत्सस्यानां भवति अन्त्यादिस्थ इति अलिनि आदौ तिष्ठत्यन्त्यादिस्थः
सवितर्यादित्ये अन्त्यादिस्थे वृश्चिकप्रारंभव्यवस्थिते गुरौ जीवे च द्वितीये अर्धनिष्पत्तिः सस्यानां भवत्यर्धनिष्पद्यत इत्यर्थः ॥ अथ योगांत
रमाह ॥ लाभहिबुकार्थयुक्तेरेकादशचतुर्थद्वितीयस्थैः तत्रैतज्जातम् ॥ एकादशे शुक्रे चतुर्थद्वितीये बुधे सस्यस्य परा प्रकृष्टा संपद्भव
ति अस्मिन्नेव योगे कर्मणि दशमस्थाने स्थिते जीवे गुरौ न केवलं सस्यस्य परा संपद्भवति यावद्गवां चाप्यश्रेष्ठा संपद्भवति क्षीरबाहुल्यमित्यर्थः ॥ २
अथ योगांतरमाह ॥ कुंभे गुरुर्गवि शशी सूर्योऽलिमुखे कुजार्कजौ मकरे निष्पत्तिरस्ति महती पश्चात्परचक्ररोगभयम् ॥ रवौ वृश्चिक
प्रवेशे कुंभे गुरुः जीवः स्थितो भवति गवि वृषे शशी चंद्रः सूर्योऽलिमुखे वृश्चिकप्रारंभे कुजार्कजौ भौमसौरौ मकरे एवंविधे योगे सस्यानां महती
निष्पत्तिरस्ति विद्यते किंतु पश्चादनंतरं परचक्रकृतं भयं रोगभयं च भवति ॥ ॥ अथ योगांतरमाह ॥ ॥ मध्ये पापग्रहयोः सूर्यः सस्यं

132

१३२

विनाशयत्यलिगः। पापः सप्तमराशौ जातंजातंविनाशयति ॥ सूर्योरविरलिगो वृश्चिकस्थः पापग्रहयोः शनिश्चरांगारकयोर्मध्येस्थितः एको
द्वितीयेद्वितीयोः द्वादशेयद्यर्कात्तद्भवतीत्यर्थः तदासस्यंविनाशयति। तथावृश्चिकात्सप्तमराशौस्थितः पापः सौरोभौमोवातयोरन्यतमस्तदासस्यंशा
तगुणमुत्पन्नमपिविनाशयति॥ तथाचबाधरायणः॥ क्रूरांतस्थः सूर्योवृश्चिकसंस्थोविनाशयतिसस्यम्। जातंजातंपापः सप्तमसंस्थापिविनाशयति॥ २
अत्रयोगांतरमाह ॥ अर्थस्थानेक्रूरः सौम्यैरनिरीक्षितः प्रथमजातानाम् सस्यंनिहंतिपश्चाद्युप्तंनिष्पादयेद्यत्नतम् ॥ वृश्चिकादर्थस्थानेद्वि
तीयेक्रूरः पापग्रहोभौमसौरयोरन्यतमः स्थितः सचसौम्यैरनिरीक्षितोबुधजीवशुक्राणामन्यतमेननिरीक्षितोनदृष्टः प्रथमजातंपूर्वोत्पन्नंसस्यंनि
हंतिनाशयतितथापश्चाज्जनीयसमुप्तंतद्यत्नतःसमस्तंनिष्पादयेत्संभवतीत्यर्थः॥ अत्रयोगांतरमाह ॥ जामित्रकेंद्रसंस्थौक्रूरौसूर्यस्यवृ
श्चिकस्थस्य॥ क्रूरौपापग्रहौभौमसौरौजामित्रकेंद्रसंस्थौएकोजामित्रेसप्तमस्थानेद्वितीयोन्यस्मिन्केंद्रेलग्नचतुर्थदशमानामन्यतमेस्थितः
तथाविधौभौमसौरौसस्यस्यविपत्तिंनाशंकुरुतः विदधतः तावेवक्रूरौतत्रस्थौसौम्यैः शुभग्रहैः दृष्टावलोकितौनसर्वत्रसर्वस्मिन्देशेविपत्तिंकुरुते
क्वचित्क्वचिदित्यर्थः। नन्वत्रकेंद्रग्रहणेसप्तमस्थानेगृहीतोभवतितत्किमर्थंजामित्रग्रहणमित्युच्यते। जामित्रग्रहणेनैतत्प्रतिपादयतियद्येको
वश्यमर्थंजामित्रेअन्योयस्मिंस्तस्मिन्केंद्रेभवतीतितदायोगएषः॥ तथाचबाधरायणः॥ सूर्यात्सप्तमसंस्थः पापोन्यः केंद्रगश्चग्रहानिकरौ। सौ
म्यैग्रहसंदृष्टौनतथासर्वत्रनिर्दिष्टौ ॥ अत्रयोगांतरमाह ॥ वृश्चिकसंस्थादर्कात्सप्तमषष्ठोपगोयदाक्रूरौ। भवतितदानिष्पत्तिः स
स्यानामर्घपरिहानिः ॥ अर्कादादित्याद्वृश्चिकसंस्थात्क्रूरौपापौभौमसौरौयदासप्तमषष्ठोपगौएकः सप्तमेपरः षष्ठेभवतितदासस्यानांनि
ष्पत्तिर्भवति। किंत्वर्घस्यपरिहानिः स्वल्पताबहुमूल्यंनाल्पंलभ्यतइत्यर्थः॥ अथशारदसस्यानामतिदेशार्थमाह ॥ विधिनानेनैवावि
वृषप्रवेशेशरत्समुत्थानाम्। विज्ञेयः सस्यानांनाशयविनाशयवातज्ञैः ॥ अनेनैवनिर्दिष्टेनविधिनावृश्चिकप्रवेशोक्तेनरविरादित्यो
वृषप्रवेशेवृषसंक्रमणेकालेशरत्समुत्थानांशरत्समुद्भूतानांसस्यानांनाशायाभावायशिवायनिष्पत्तयेवातज्ञैः पंडितैः सस्यजातकज्ञैः वि

ज्ञेयो ज्ञातव्यः ॥ तथा च बादरायणः ॥ य एव योगाः कथिताः वृश्चिकस्थे दिवाकरे। वृषेपि ते शारदानां चिंतनीया यथार्थत इति ॥ अधुना रविचारव
शेन ग्रैष्मिकसस्यस्य सामर्घ्यमहार्घतां चाह ॥ ॥ त्रिषु मेषादिषु सूर्यः सौम्ययुक्तो वीक्षितो वा विचरन् ग्रैष्मिकधान्यं कुरुते समर्घमभयोपयोग्यं च ॥
सूर्यः आदित्यः त्रिषु मेषादिषु राशिषु मेषवृषमिथुनेषु सौम्यैः शुभग्रहैः बुधगुरुशुक्रैर्युतः संयुक्तो वीक्षितो वा लोकितो वा विचरंस्तिष्ठन् ग्रैष्मि
कं ग्रीष्मसंभवं धान्यं समर्घत्वं अल्पमूल्यं कुरुते। अभयोपयोग्यं च महार्घता भयोपयोग्यं समर्घता अभयोपयोग्यं। अथवा। उभयोपयोग्यमिह
लोके परलोके चोपयुज्यते। इहलोके बंधुवर्गस्य धर्मार्थं परलोके इति ॥ ॥ अथैवं शारदसस्यस्याप्याह ॥ कार्मुकमृगघटसंस्थः शा
रदसस्यस्य तद्वदेव रविः संग्रहकाले ज्ञेयो विपर्ययः क्रूरदृष्टयोगात् ॥ रविरादित्यः कार्मुकमृगघटसंस्थः कार्मुकं धन्वी मृगो मकरः घटः
कुंभ एतेषु स्थितः शारदसस्यस्य तद्वदेव ज्ञेयः। यथा त्रिषु मेषादिषु सूर्यः सौम्ययुतो वीक्षितोपि वा विचरन् ग्रैष्मिकधान्यं कुरुते समर्घमभयोप
योग्यं चैवं कार्मुकमृगघटसंस्थः सूर्यः सौम्ययुक्तो वीक्षितोपि वा विचरन् शारदधान्यं कुरुते समर्घमभयोपयोग्यं चेति॥ संग्रहकाले ग्रहण
समये क्रूरदृष्टयोगाद्विपर्ययो ज्ञेयः क्रूरग्रहदृष्टत्वाद्योगात्संयोगाच्च विपर्ययो विपरीतो ज्ञेयः क्रूरौ भौमसौरी एतदुक्तं भवति। यदा मेषादिषु
त्रिषु कार्मुकादिषु त्रिषु वा सूर्यः पापयुतः पापवीक्षितोपि वा विचरति। तदा विपर्ययो महार्घता भयोपयोग्यत्वं च भवति। एतत्संग्रहकाले
विपरीतः शोभनः विपरीतयोगस्थे सूर्ये विक्रयः कार्य इति ॥ ॥ ॥ इति भट्टोत्पलविरचितायां संहिताविवृतौ सस्यजातकं ना
माष्टात्रिंशोध्यायः ॥ ॥ ॥ अथ द्रव्यनिश्चयो व्याख्यायते ॥ ॥ तत्रादावेवागमप्रदर्शनार्थमाह ॥ ॥ ये येषां द्रव्या
णामधिपतयः राशयः समुद्दिष्टाः। मुनिभिः शुभाशुभार्थं तानागमतः प्रवक्ष्यामि ॥ येषां द्रव्याणां ये राशयो मेषादयो धिपतयः मु
निभिः काश्यपादिभिः समुद्दिष्टाः कथिताः किमर्थं शुभाशुभार्थं सामर्घ्यमहार्घसामर्घ्यज्ञापनार्थं तान् राशीनागमतः आगमात् प्रवक्ष्यामि कथ
यिष्यामीति ॥ तत्र मेषस्य कानि द्रव्याण्येतदाह ॥ वस्त्राविककुतपानां मसूरगोधूमरालकयवानाम् स्थलसंभवौषधीनां कनक

स्यचकीर्त्तितोमेषः ॥ वस्त्राणंपभराण्णाविकाः प्रसिद्धाएवऊर्णानामिदमाविकंतत्संभूतमित्यर्थः कृतपंछागलोमानंतदुत्थंवस्त्रंगोधूमाः
प्रसिद्धाः राल्लकोहृद्रुनिर्यासः यवाः प्रसिद्धाः एतेषांसर्वेषांतथास्थलसंभवौषधीनांस्थलेजलरहितायांभूमौयाऔषधयःसंभवंतितासांतथा
कनकस्यचमेषोराशिरधिपतिःकीर्त्तितउक्तः तथाचकाश्यपः। मेषेस्तुवर्णास्थलजागोधूमाजाविकास्तथा। ग्रहवर्गाईसंयोगेशोभनेसफ
लंभवेत् ॥ ॥ अथवृषमिथुनयोराह ॥ गविवस्त्रकुसुमगोधूमशाल्लियवमहिषसुरभितनयाःस्युः मिथुनेपिधान्यशारदवल्लीशाल्लूक
कार्पासाः ॥ ॥ वस्त्राणंपभराणिकुसुमानिपुष्पाणिगोधूमाःशाल्लयःषष्टिकादयः यवाः महिषः सुरभितनयाः वलीवर्दाः एतेगविवृषेस्युर्भवे
युः। मिथुनेपीति। धान्यानिप्रसिद्धानिशारदंशरत्समुत्पन्नंयत्किंचिद्वल्लीद्राक्षावल्ल्यादिःशाल्लूकंकुमुदकंदम् कार्पासाप्रसिद्धाएतेसर्वएवमिथु
ने॥ तथाचकाश्यपः॥ वृषेमहिषगोवस्त्रशालयःपुष्पसंभवान् मिथुनेधान्यशाल्लूकवल्ल्यःकार्पासशारदम् ॥ अथकर्कटसिंहयोराह ॥
कर्किणिकोद्रवकदलीधूर्वाफलकंदपत्रगोच्चानि। सिंहेतुषधान्यसरसाःसिंहादीनांत्वचःसगुडाः ॥ कोद्रवाः प्रसिद्धाः कदलीरंभाधूर्वाशाद्वलम्
फलानिसर्वाणिजातीफलप्रभृतीनिकंदंप्रसिद्धंमूलंबीजंयस्यतत्कंदं। पत्रंसुगंधपत्रम् गोच्चंपालीवतं। नालिकेरंवा एतानिसर्वाणिकर्किणिक
र्कटेतुषधान्यानिप्रसिद्धानिशालयःसरसामधुराम्ललवणतिक्तकटुककाषायःषड्। सिंहादीनांप्राणिनांसिंहद्वीपिमार्जाराणांत्वचःचर्माणि
विचित्ररूपाणिएतेसगुडाःगुडेनसहिताःसर्वएवसिंहे॥ तथाचकाश्यपः॥ कर्कटेफलधूर्वाश्चकोद्रवंकदलीतथा। सिंहेधान्यंसर्वरसाःसिं
हादीनांत्वचोगुडः ॥ ॥ अथकन्यातुलयोराह ॥ षष्टीतसीकलायाकुलत्थगोधूममुद्गनिष्पावाः सप्तमराशौमाषायवगोधूमाःससर्षपा
श्चैव ॥ अतसीप्रसिद्धाःकलायाः सस्यं कुलत्थाः गोधूमाःमुद्गाः एतेसर्वएवप्रसिद्धाः अनुतानियानिपुनर्जायंतेतेनिष्पावाः निष्पावाश्च
शालयःइतिकेचित् शिंबिधान्यमितिकेचित् एतेषष्ठेकन्यायांमाषाः यवाः गोधूमाः एतेकिंभूताः ससर्षपाः सर्षपासहिताएतेसप्तराशौतु
लायाम्॥ तथाचकाश्यपः॥ कन्यायांमुद्गनीवारकुलत्थान्सकलायवान् तुलेतुयवगोधूममाषाःसिद्धार्थकाःतथा ॥ ॥ अथवृश्चि

कधनुषोराह ॥ अष्टमराशाविद्रुमसैक्यंलोहान्यजाविकंचापि। नवमेतुरगलवणांबरास्त्रतिलधान्यमूलानि ॥ द्रुमाः प्रसिद्धाः सैक्यंसैक्यो
त्थवल्लीफलादिलोहमायसंकांस्यंवाएतानितथा। अजः छागः अविः प्रसिद्धः तज्जातमाविकम् एतत्सर्वमष्टमराशौद्रष्टव्यं वृश्चिकेनवमेत्विति। तुरगाः
अश्वाः लवणंसैन्धवम् अंबराणिवस्त्राणि। अस्त्राण्यायुधानि। धनुःशरादीनि। तिलः धान्यं। मूलानिप्रसिद्धानिएतानिनवमेधनुषि॥ तथाच
काश्यपः॥ अलिनीद्रुमसंसैक्यमाजंलोहंसकांस्यकम् धान्यंधनुषिवस्त्राणिलवणास्त्रतथा ॥ अथमकरकुंभयोराह ॥ ॥
मकरेतरुगुल्माद्यंसैक्येक्षुसुवर्णकृष्णलोहानि। कुंभेसलिलजलकुसुमरत्नचित्राणिरूपाणि ॥ तरवोवृक्षाः गुल्माः प्रसिद्धाः अकांडवि
टपमित्यर्थः आदिग्रहणाल्लतावल्ल्यः सैक्यंसैक्योत्थम् इक्षुः प्रसिद्धः सुवर्णकांचनम् कृष्णलोहमायसम् एतानिसर्वाणिमकरेसलिलजं
यत्किंचिज्जलसंभूतम् फलानिप्रसिद्धानिकुसुमानिरत्नानिचित्राणिनानाकाराणियेषांरूपाणिएतानिकुंभे॥ तथाचकाश्यपः॥ मकरेस
स्यमीसंचसुवर्णंगुड धातुजम् कुंभेकुसुमचित्राणिरूप्यंचजलजोद्भवाः॥ ॥ अथमीनआह ॥ मीनेकपालसंभवरत्नान्यंबुद्भ
वानिवज्राणि। स्नेहाश्चनैकरूपाव्याख्यातामत्स्यजातंच ॥ कपालसंभवानिरत्नानिमुक्ताफलानिअंबुद्भवानिशुक्तिसंभवानिवज्रंही
रकम् अनेकरूपाबहुविधाः स्नेहास्तैलादयः मत्स्यजातंचमत्स्योद्भूतमुक्तादिकमपिएतेसर्वएवमीनेव्याख्याताउक्ताः॥ तथाचकाश्यपः॥
पद्ममुक्ताफलादीनांद्रव्याणांमीनईश्वरः ॥ अथैतेषांद्रव्याणांशुभाशुभज्ञानार्थमाह ॥ राशेश्चतुर्दशार्थायसप्तनवपंचमेस्थितो
जीवः द्व्येकादशपंचाष्टमेषुशशिजश्चवृद्धिकरः ॥ षट्सप्तमगोहानिंवृद्धिंशुक्रः करोतिशेषेषु। उपचयसंस्थाः क्रूराः शुभदाः शेषेषुहा
निकराः ॥ राशेश्चतुर्दशेति। यस्यकस्यचेद्राशेः चतुः चतुर्थस्थानं। दशदशमं। अर्थस्थानंद्वितीयं। आयुरेकादशंसप्तमः नवमः पंचमः ए
तेषांस्थानानामन्यतमस्थानस्थोजीवोबृहस्पतिस्तत्प्रोक्तद्रव्याणांवृद्धिकरः द्वितीयः एकादशः दशमः पंचमः अष्टमः एतेषांस्थानानाम
न्यतममन्यतमस्थानेस्थितः शशिजोबुधः वृद्धिकरः षट्सप्तमगइतिशुक्रोभार्गवः षट्सप्तमस्थानगतोहानिंक्षयंकरोति। शेषेष्वन्यस्था

१३४

नेषु प्रथमद्वितीयतृतीयचतुर्थपंचमाष्टमनवमदशमैकादशद्वादशेषु स्थितो वृद्धिं करोति। क्रूराश्चादित्यांगारकशनैश्चराः उपचयसंस्थास्त्रिष
डेकादशदशमगताः शुभदा वृद्धिकराः शेषेष्वन्यस्थानेषु प्रथमद्वितीयचतुर्थपंचमसप्तमाष्टमनवमद्वादशेषु हानिकराः॥ तथा च काश्यपः॥ चतुःसप्त
द्विपंचस्थो नवदिग्युग्मगो गुरुः यस्य राशेस्तदुक्तानां द्रव्याणां वृद्धिदः स्मृतः शुक्रः षट्सप्तमस्थो वा हानिकृद्वृद्धिदोऽन्यगः द्व्येकादशदशार्थाष्टसंस्थितः
शशिजः शुभः पापश्चोपचयस्थाश्च वृद्धिं कुर्वंति नान्यथा ॥ अत्रैव विशेषमाह ॥ राशेर्यस्य क्रूराः पापा रविभौमसौराः पीडास्थानेष्वनु
पचयेष्ववस्थितास्ते च बलिनो वीर्यवंतः। मित्रस्वक्षेत्रेऽथ स्वनवांशके स्थिताः शुभेक्षिताः तत्रोक्तद्रव्याणां तस्य राशेः यानि प्रोक्तानि द्रव्याणि
तेषां कथितद्रव्याणां महार्घता बहुमूल्यत्वं च दुष्प्रापत्वं भवति॥ तथा च काश्यपः॥ राशेरनिष्टस्थानेषु पापाश्च सबलाः स्थिताः तद्द्रव्याणां ना
शकरा दुर्लभास्ते भवंतीति ॥ अन्यदप्याह ॥ इष्टस्थाने सौम्या बलिनो भवंति येषां राशीनाम् तद्द्रव्याणां वृद्धिः सामर्घ्यं वल्लभत्वं च ॥
येषां राशीनां सौम्याः शुभग्रहाः बुधगुरुशुक्रा इष्टस्थानस्थाः इष्टस्थानानि यथा जीवस्य लाभादिषु स्थितः बुधस्य द्व्यादिषु स्थितः शुक्रः षट्सप्त
मरहितेषु एतेषु स्थानेषु बलिनो येषां राशीनां भवंति तद्द्रव्याणां तस्य राशेर्यानि द्रव्याणि तेषां सामर्घ्यं समर्घता वल्लभत्वं च भवति। तथा च काश्य
पः॥ इष्टस्थाने स्थिताः सौम्या बलिनो येषु राशिषु। भवंति तद्भवानां च द्रव्याणां शुभदाः स्मृताः॥ अन्यदप्याह॥ गोचरपीडायामपि राशेर्बलि
भिः शुभग्रहैर्दृष्टः पीडां न करोति तथा क्रूरैरेवं विपर्यासः ॥ जीवादीनां चतुरादीनि स्थानानि यान्युक्तानि तद्व्यतिरेकेष्वन्येषु स्थानेषु यदा स्थि
ता भवंति तदा गोचरपीडा तस्यां सत्यामपि राशिर्यदा शुभग्रहैः बुधजीवशुक्रैः बलिभिः सवीर्यैः दृष्टोऽवलोकितो भवति तदा पीडां न तथा करो
ति। एतदुक्तं भवति। तद्द्रव्याणि नातिसमर्घाणि नातिसमर्घाणि भवंति। क्रूरैः पापग्रहैरादित्यांगारकशनैश्चरैः चरैः बलिभिः गोचरपीडायां
दि राशिर्दृष्टस्तदा विपर्यासो विपरीतो भवति। तत्रोक्तद्रव्याणां महार्घता दुर्लभत्वं च न भवतीति ॥ ॥ ॥ इति भट्टोत्पलविरचितायां
सं हि ता वृ त्तौ द्र व्य नि श्च यो ना म ए क च त्वा रिं शो ऽध्या यः ॥ ॥ ॥ ॥

अथातोर्घकांडाध्यायो व्याख्यायते ॥ ॥ तत्रादावेवअर्घज्ञानदर्शनार्थमाह ॥ ॥ अतिवृष्टमुल्कादंडान्परिवेशग्रहणपरिधिं च वीक्ष्य ।
दृष्ट्वामावस्यायां मुत्पातान्पौर्णमास्यां च ॥ ब्रूयादर्घविशेषान्प्रतिमासं राशिषु क्रमात्सूर्ये । अन्यतिथावुत्पाता ये ते डमरार्तये राज्ञां ॥
अतिवृष्टिरतिवर्षणम् उल्कानस्यां लक्षणमुक्तं शुक्तस्य शिरसि विकीर्णा इति दंडः तस्य च लक्षणमुक्तं रविकिरणाज्जलदमरुतां मूर्ति चैतान्दृष्ट्वा विशाल्लेति ॥
वलोक्य तथा परिवेशस्तस्य लक्षणमुक्तम् ग्रहणं सोमार्कयोः परिधिः प्रतिसूर्यः तस्य लक्षणमुक्तम् तत्सर्वास्तदाद्यान् आदिग्रहणाद्रजोनी
हारदिग्दाहगंधर्वनगराणि स्फीतद्याणि एतानुत्पातानमावास्यां पौर्णमास्यां दृष्ट्वा वलोक्यार्घविशेषान् सूर्ये आदित्ये राशिषु मेषादिषु प्रति
मासं क्रमात्परिपाट्या विचरति ब्रूयाद्वदेत् अन्यस्मिंस्तिथावमावास्यायां पौर्णमास्यां च वर्जयित्वा ये उत्पाता अतिवृष्ट्यादयो भवंति ते राज्ञा
नृपाणां डमरार्तये भवंति डमरं शस्त्रकलहस्तेनार्तिः पीडा भवति । तथा च काश्यपः ॥ उल्कातिवृष्टिः ग्रहणे सूर्यचन्द्रयोः परिवेषणम् प्रतिसू
र्यदिग्दाहोयेन्ये पक्षमासान्तसंज्ञिते । तिथौ निरीक्ष्य चोत्पातान् ब्रूयाल्लोके शुभाशुभम् ॥ सुभिक्षं दुर्भिक्षं कालाद्विशेषोऽत्र विचारतः प्रतिमासं विधानज्ञः
नान्यस्मिन्दिवसे वदेत् अन्यत्र ये भवंत्येते ते सर्वे नृपदोषदाः ॥ ॥ अथ सत्पाते अमावास्या पौर्णमास्यां च मेषवृषस्थे सूर्ये किं कुर्यादित्याह ॥
मेषोपगते सूर्ये श्रीभज धान्यस्य संग्रहं कृत्वा । वनमूलं फलस्य वृषे चतुर्थमासं तत्तयोर्लाभः ॥ सूर्ये रवौ मेषोपगते मेषप्राप्ते अमावास्यापौ
र्णमास्यां चोत्पातानुत्क्रांतं दृष्ट्वा श्रीभजस्य श्रीभ्रांत्पन्नस्य धान्यस्य संग्रहं कृत्वा तयोः मेषवृषयोः चतुर्थे मासि विक्रयाल्लाभो भवति ॥ ॥ संग्रहं समुपनीय ॥
अथ मिथुनस्थे आह ॥ मिथुनस्थे सर्वरसा धान्यानि च शालयः संमुपनीय संग्रहं षष्ठे मासे विपुलं विक्रीता प्राप्नुयाल्लाभम् ॥ मिथुनस्थे
केऽर्के उत्पातान्दृष्ट्वा सर्वरसान्मधुरादीन् धान्यानि च शालयः संग्रहं समुपनीय संग्रहं एषां कृत्वा विक्रीता षष्ठे मासे विपुलं विस्तीर्णं लाभं प्रा १२५
प्नुयाल्लभते ॥ अथ कर्कटस्थे आह ॥ कर्किणि अर्कमधुगंधतैलघृतफाणितानि विनिधाय । द्विगुणा द्वितीयमासे लब्धिस्त्रीनाधिके छेदः ॥
अर्क आदित्ये कर्किणि कर्कटस्थे मधुमाक्षिकं । गंधाः सुगंधद्रव्याणि तैलं घृतमाज्यम् फाणितमिक्षुरसक्वाथः खंडगुडादि एतानि विनिधाय

संस्थाप्य द्वितीयमासे विक्रयाद्द्विगुणा लब्धिर्भवति ॥ अथ सिंहस्थे आह ॥ सिंहे स्वर्णमणिचर्मवर्मशस्त्राणि मौक्तिकं रजतम् पंचममा
से लब्धिर्विक्रेतुरतोऽन्यथा छेदः ॥ सिंहस्थेऽर्के स्वर्णं मणयः चर्माणि वर्म तनुत्राणः शस्त्राण्यायुधानि मौक्तिकं मुक्ताफलानि रजतं रूप्यं एतद्द्वि
धायविक्रेतुः पंचममासे विक्रयाल्लब्धिर्भवति। अतोऽन्यथा ऊनेकाले अधिके वा छेदो भवति ॥ अथ कन्यागते रवावाह ॥ कन्यागते दिनक
रे चामरखरकरभवाजिनां क्रीता। षष्ठे मासे द्विगुणं लाभकमाप्नोति विक्रीणन् ॥ दिनकरे सूर्ये कन्यागते प्राग्युक्तानुत्पाताद्दृष्ट्वा चामरं वालव्य
जनं खरो गर्दभः करभः उष्ट्रः वाजी तुरगः एषां क्रीता षष्ठे मासे विक्रीणन् विक्रीताद्द्विगुणं लाभकमाप्नोति लभते ॥ अथ तुलगते आह ॥
तौलिनि तान्तवभांडं मणिकंपनचाकपीतकुसुमानि। आदद्याद्धान्यानि च वर्षावाद्द्विगुणिता वृद्धिः ॥ तौलिनि तुलगतेऽर्के तान्तवभांडं तान्तुकृतं
यत्किंचित्कर्मकर्पटादि मणयः कंपलं काचः पीतानि पीतवर्णानि कुसुमानि पुष्पाणि एतान्यादध्यात् ग्राहयेत् धान्यानि च तथा। वर्षार्धात्षड्भिर्मा
सैर्द्विगुणिता वृद्धिर्द्विगुणत्वं व्रजंति द्विगुणा लाभो भवतीत्यर्थः ॥ अथ वृश्चिकस्थे आह ॥ वृश्चिकसंस्थे सवितरि फलकर्मकमूलविविधर
त्नानि। वर्षद्वयसंचितानि द्विगुणं लाभं प्रयांति ॥ सवितर्यादित्ये वृश्चिकसंस्थे फलानि कंदकमूलविशेषः मूलान्यन्यानि द्रव्याणाम् विविधानि
नानाकाराणि रत्नान्येतानि वर्षद्वयसंचितानि द्विगुणं लाभं प्रयच्छंति ददाति ॥ अथ धन्विस्थे आह ॥ चापगते संगृह्णीयात्कुंकुमशंखप्रवाल
काचानि। मुक्ताफलानि च ततो वर्षार्धाद्द्विगुणतां यांति ॥ चापगते धन्विस्थेऽर्के संगृह्णीयात् कुंकुमं काश्मीरं। शंखं प्रवालं विद्रुमं। काचं मुक्ताफला
नि च। ततोऽनंतरं क्रमात्परतः वर्षार्धात् षड्भिर्मासैर्द्विगुणतां यांति द्विगुणं लाभं ददाति ॥ अथ मकरकुंभस्थेऽर्के आह ॥ मृगघटसंस्थे स
वितरि संगृह्णीयाल्लोहभांडधान्यानि। स्थित्वा मासं दद्याल्लाभार्थी द्विगुणमाप्नोति ॥ मृगो मकरः घटः कुंभः सवितर्यादित्ये मृगघटसंस्थे
लोहभांडधान्यानि संगृह्णीयात् स्थापयेत् लोहमयानि भांडानि धान्यानि च मासमास्थित्वा मासं संस्थाप्य ततो दद्याद्विक्रयं कुर्यात् लाभार्थी द्वि
गुणं लाभं समाप्नोति लभते ॥ अथ मीनस्थेऽर्के आह ॥ सवितरि झषमुपयाते मूलफलं कर्मभांडरत्नानि। संस्थाप्य वत्सरार्धं लाभकमि

द्धिं समाप्नोति ॥ सवितर्यादित्ये झषं मीनमुपयाते प्राप्ते स्थूलानि कंदं फलविशेषः भांडानि नानाकाराणि रत्नानि मणयः क्रीत्वा वत्सरार्धं मासष
ट्कं संस्थाप्य तं यथाभिलाषितं लाभं कं वृद्धिं समाप्नोति लभते ॥ अत्रैव पुनरपि विशेषमाह ॥ राशौ राशौ यस्मिन् शिशिरमयूखः सहस्रकि
रणो वा। युक्तोऽधिमित्रदृष्टस्तत्रार्घलाभकोद्दिष्टः ॥ यस्मिन् राशौ राशौ मेषादिके शिशिरमयूख चंद्रः सहस्रकिरणो वा सूर्यः अधिमित्रेण
तात्कालिके न दृष्टोऽवलोकितो मित्रयुतश्च भवति। यतः तत्कालं दशाय बंधुसहजस्वांतेषु स्थितो ग्रहो मित्रं भवति न युक्तत्वात् तेन मित्रयु
क्तोऽधिमित्रदृष्टस्तत्र तस्मिन् राशावर्घलाभको दृष्टोऽभिहितो नान्यत्र योगासंभवात् यतो मावास्यां पौर्णमास्यां वा विचार उत्पातदर्शनात्।
अतः शिशिरमयूखः सहस्रकिरणग्रहणं कृतं॥ तथा च काश्यपः ॥ राशौ राशौ स्थितः सूर्यः शशी वा मित्रसंयुतः युधिमित्रेण संदृष्टो यया
लाभप्रदः स्मृतः ॥ ॥ अशुभसहितः संदृष्टो वा हि नस्त्यथ वा रविः प्रतिग्रहगतान् भावान् बुद्ध्वा वदेत् सदसत्फलम् ॥ शिशिरकिरणः चंद्रः सवितृ
सहितः सूर्येण सहावस्थितो मावास्यायां शुभग्रहैः बुधजीवशुक्रैर्युतः संयुतो वीक्षितो यस्मिन् राशौ भवति तत्र सद्योऽर्घस्य सुवृद्धिकरः स्मृतः अ
शुभसहितः संदृष्टो वा हिनस्ति दृष्टम्। अथ वा संपूर्णः पौर्णः पौर्णमास्यां शुभैर्युतो वीक्षितो सद्यः तस्मिन्नेवाहनि अर्घस्य वृद्धिकरः स्मृतः
अथाशुभसहितः पापग्रहाभ्यां भौमसौराभ्यां युक्तः संदृष्टो वा चंद्रो हिनस्ति नाशयति अर्घहानिं करोतीत्यर्थः अथ वा रविरादित्यः शुभैः
युतो वीक्षितस्तत्र यत्र राशौ भवति तत्र सद्योऽर्घस्य प्रवृद्धिकरः स्मृतः अशुभसहितः संदृष्टो वा हिनस्ति एवं प्रतिग्रहगतान् प्रतिराश्याश्रयवशितान् भा
वान् द्रव्याण्युक्तान् बुद्ध्वा ज्ञात्वा सदसत् शुभमशुभं वा फलं वदेत् ब्रूयादिति॥ तथा च काश्यपः ॥ अत्रार्कशशिनो सौम्यैः संयुक्तौ वा निरीक्षितौ।
शुभग्रहस्थानगतौ सद्योऽर्घस्य विवृद्धिदौ॥ विपरीतस्थितावेतौ पापयुक्तौ निरीक्षितौ। अर्घहानिकरौ प्रोक्तौ मिश्रितौ मध्यमौ स्मृताविति ॥

इति श्रीभट्टोत्पलविरचितायां संहिताविवृतौ अर्घकांडं नाम चत्वारिंशोऽध्यायः ॥ ॥ अथ इंद्रध्वजसंपद्व्याख्यायते ॥ ॥
तत्रादावेव तदुत्पत्तिप्रदर्शनार्थमाह ॥ ॥ अप्लाराणमूचुरमराः भगवन् शक्ताः स्मेनासुरान् समरे। प्रतिबोधयितुमतः त्वां शरणप्रशरणांस

अतएवोत्प्रेक्ष्यते। हंसपंक्तिभिरितस्ततः सर्वतः संपतद्भिः हृष्टगंधपवनानुवाहिभिः अद्रिराडिव। अथवा शक्रकार्मुकरुचमिंद्रधनुःकांतिंसमुद्वहन्व्चार
यन् व्रजेत्। मुकुटकुंडलांगदैर्भूषितः मुकुटंमौलिः कुंडलंकर्णाभरणं अंगदाः कटकाः तैःभूषितोलंकृतः कीदृशैः नैकवर्णमणिवज्रभूषितैः नैकवर्ण
बहुवर्णायेमरणयोरत्नानिवज्रंहीरकंतैर्भूषिताअलंकृतायेमुकुटकुंडलांगदाः तैर्भूषितोलंकृतः तथाभूरिरत्नानांबहूनांमणीनांयेकिरणास्तैरभ्यस्तैरनुर
ञ्जितोविकुरितः तदाशक्रकार्मुकरुचंसमुद्वहन्। यतःशक्रकार्मुकस्यकांतिर्नानावर्णाभवति। अथवाशक्रवदिंद्रवत्परिवारेणयुक्तः परिवृतोव्रजेत्। तुरंगमै
रश्वैः खमाकाशमुत्पतद्भिरिवयतइंद्रआकाशेगच्छति। तथादंतिभिः हस्तिभिः धराभूमिंधारयद्भिरिवयतोमत्तदंतिनोभूमिंविदारयंतिनरैर्मनुष्यैर्निर्जि
तारिभिः जितशत्रुभिरमरैर्देवैरिवपरिवृतः अतीवोज्ज्वलवेशधारित्वात्। अतएवोत्प्रेक्ष्यते। शत्रुवदिति ॥ ॥ अथयथाह ॥ सवज्रमुक्ताफलभूषणो
थवासितस्त्रगुरुक्षौमविलेपनांबरः हृतातपत्रोगजपृष्ठमाश्रितोघनोपरीवेंदुतलेभृगोःसुतः ॥ अथवैवंव्रजेत्। सवज्रमुक्ताफलभूषः वज्रंहीरकम्।
सवज्राणिवज्रसहितानिमुक्ताफलंभूषणंयस्यतथासितस्त्रगुरुक्षौमविलेपनांबरः सिताः शुक्लायाः स्रजोमालाः सिताः चोक्षौमाः पट्टविशेषाः सितानि
चविलेपनानिसमालभानिसितान्यंबराणिवस्त्राणिचयस्यसतथाभूतः हृतातपत्रः हृतमातपत्रंछत्रंयस्यगजपृष्ठंहस्तिपृष्ठमाश्रितः अतएवोत्प्रेक्ष्यते।
भृगोःसुतः शुक्रोघनोपरिमेघादुपरिइंदोः चंद्रस्यतलेअधोभागेस्थितइवमेघसंस्थानीयोगजः चंद्रसंस्थानीयंछत्रम् शुक्रसंस्थानीयोराजेति॥
अथसैन्यचेष्टितमाह ॥ संप्रहृष्टनरवाजिकुंजरंनिर्मलप्रहरणांशुभास्करम् निर्विकारमपिपक्षभीषणंयस्यसैन्यमचिरात्सगांजयेत् ॥ ॥
यस्यराज्ञईदृशंसैन्यंसराजाअचिरात्शीघ्रमेवगांभूमिंजयेत् स्वीकरोति। कीदृशं। संप्रहृष्टजनवाजिकुंजरम्। संप्रहृष्टाः प्रमुदितानराः मनुष्याः
वाजिनोश्वाः कुंजरायनोयत्र। यथानिर्मलानांप्रहरणानांखड्गादीनांयेअंशवोरश्मयस्तैर्भास्वरंदेदीप्यमानंनिर्विकारंविकाररहितंनिरुत्पातमित्यर्थः।
अरिपक्षभीषणंशत्रुपक्षभयावहमिति ॥ ॥ ॥ इतिभट्टोत्पलविरचितायांसंहिताविवृतौनीराजनविधिर्नामद्विचत्वारिंशोध्यायः ॥
४२ ॥ अथातःखंजनकलक्षणाध्यायोव्याख्यायते ॥ ॥ तत्रादावेवागमप्रदर्शनार्थमाह ॥ खंजनकनामायंयोविहगस्तस्यदर्शनेप्र

१४७

थमे प्रोक्तानि। यानि यानि मुनिभिः फलानि तानि प्रवक्ष्यामि ॥ अयं खञ्जनकनामा विहगः पक्षी तस्य प्रथमे दर्शने आदौ यस्मिन् दिने दृश्यते। तत्र मुनिभिः
गर्गादिभिः यानि फलानि प्रोक्तानि कथितानि तानि प्रवक्ष्यामि कथयामीति। खंजनकः श्रावणपूर्वकमासचतुष्टयं दृश्यत इति स्थितिः अत उक्तं दर्शने
प्रथम इति। तत्र तावच्चत्वारः खंजनका भवंति। तेषां नामानि फलं चाह ॥ ॥ स्थूलोत्सुन्नतकंठः कृष्णगलो भद्रकारको भद्रः आकंठमुखात्कृष्णः सं
पूर्णः पूरयत्याशाम् ॥ कृष्णो गलेस्य बिंदुः सितकरजांतः सरिक्त इति नाष्टकृत् पीतगोपीत इति क्लेशकरः खंजनो दृष्टः ॥ यः खंजनकः स्थू
लो दृष्टः कायः अत्युन्नतः कंठः उच्चग्रीवः कृष्णगलो सितकंठः स भद्रो नाम विहगो भद्राख्यः पक्षी स च दृष्टो भद्रकारको भद्रं श्रेयः करोति भद्रः संपू
र्णः रिक्तो गोपीत इत्येता अन्वर्थसंज्ञाः आकंठमुखात्कृष्णः मुखादाद्यादारभ्य कंठं गलं यावत्कृष्णो सितवर्णः संपूर्णो नाम स च आशामिच्छां पू
रयति परिपूर्णं करोति कृष्णो गलेस्य बिंदुरिति तथा सितकरजांतः शुक्लाकपोलः स च रिक्तोष्टकृत् रिक्तफलशून्यं सर्वं करोति यः पीतः पीतव
र्णः स च गोपीतनामा खंजनको दृष्टः क्लेशाकरः क्लेशं करोति ॥ तथा च काश्यपः ॥ स्थूलोत्सुन्नतकंठो यो भद्रः कृष्णगलः स्मृतः कृष्णमूर्धा
गलांतं यः स संपूर्ण इति स्मृतः करजांता सितौ यस्य कृष्णो बिंदुर्गले तथा। स रिक्त इति निर्दिष्टः पीतो गोपीतकः स्मृतः ॥ नानारूपेण फलं विहगा
नां विनिर्दिशेत् ॥ ॥ अथ कस्मिन् स्थाने दृष्टः कीदृक्फलं करोतीत्याह ॥ ॥ अथ मधुरसुरभिफलकुसुमतरुषु सलिलाशयेषु पुण्ये
षु। करितुरगभुजगसरप्रासादोद्यानहर्म्येषु ॥ गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे। हस्तितुरंगमशालाछत्रध्वजचामराद्ये
षु ॥ हेमसमीपे सितांबरकमलोत्पलपूजितोपलिप्तेषु। दधिपात्रधान्यकूटेषु च श्रियः खंजनः कुरुते ॥ अथैतेषु स्थानेषु दृष्टः खंज
नकः श्रियं लक्ष्मीं कुरुते विदधाति। केषु कथं मधुरेति। अथ शब्दः प्रकारार्थे। मधुराणि स्वादूनि सुरभीणि सुगंधानि फलानि कुसुमानि पुष्पा
णि येषु ते तरुषु वृक्षेषु तथा पुण्येषु पावनेषु सलिलाशयेषु जलाधारेषु तथा करिणां हस्तिनां तुरगाणामश्वानां भुजगानां सर्पाणां मूर्धसु मस्त
केषु तथा प्रासादेषु देवगृहेषु उद्यानेषु उपवनेषु तथा गोरुपरिगोष्ठे गवां स्थाने सतां साधूनां यत्र समागमः यज्ञो यागः उत्सवो विवाहादिः पार्थि

१४७

वोराज्ञा। द्विजो ब्राह्मणः एषां समीपे सन्निधौ हस्तिशालासु गजशालासु तुरंगमशालासु अश्वशालासु छत्रमातपत्रम् ध्वजः चिह्नविशेषः प्रसिद्धः
चामरं वालव्यजनम् आदिग्रहणाद्भृंगारकुंभतालवृन्तादयः एतेष्वपि तथा हेमसमीपेषु वर्णसन्निधौ सितांबरम् श्वेतवस्त्रम् कमलं पद्मम् उत्पलं
नीलोत्पलं। पूजितेऽर्चिते घोपलिप्तेषु संस्कृतेषु स्थानेषु दधिपूर्णभाजने धान्यकूटे धान्यराशौ एतेष्विति ॥ अन्येऽप्याह ॥ पंके स्वादुर्नित्ति
गोरससंपन्नगोपयोपगते। शाद्वलगे वस्त्राप्ति शकटस्थे देशविभ्रंशः ॥ गृहपटलेऽर्थभ्रंशो बद्धे बंधोऽशुचौ भवति रोगः पृष्ठेऽवजाविकानां प्रियसं
गममावहत्याशु ॥ पंकः कर्दमः तत्रस्थे खंजनके स्वादुर्नीत्तिर्दृष्टभोजनलाभः। तथा गोमयोपगते गोमयनिचयस्थे गोरससंपन्नवित
बाहुल्यं। शाद्वलगे दूर्वास्थे वस्त्राप्तिरंबरलाभः शकटस्थे शाकटाद्रूढे देशस्य विभ्रंशो नाशः गृहपटले गृहाच्छादने अर्थस्य वित्तस्य भ्रंशो नाशः बद्धे
चर्ममये बंधो बंधनम् अशुचावशुद्धे स्थाने रोगो भवति। अजः छागः अविः प्रसिद्धः अजाविकानां पृष्ठे उपरिस्थिते आशु क्षिप्रमेव प्रियसंगम
वल्लभसमायोगमावहति करोति ॥ अन्यदप्याह ॥ महिषोष्ट्रगर्दभास्थिश्मशानगृहकोणशर्करांगस्थः प्राकारभस्मकेशेषु चाशु
भीमरणरुग्भयदः ॥ एतेषु स्थानेषु खंजनको दृष्टः सचाशुभः शालक्षणेन भवति। तदा मरणरुग्भयदः दृष्टमरणं मृत्युं रुग्भयं च ददाति। केषु
स्थानेषु महिषे उष्ट्रे करभे गर्दभे खरे अस्थिश्मशाने पितृवने गृहकोणे वेश्मास्रे शर्करे सूक्ष्मखंडे अष्ठे अट्टालके प्राकारभित्तौ भस्मनि केशेषु एतेषु
स्थानेषु ॥ अन्यदपि लक्षणमाह ॥ पक्षौ धुन्वन्नशुभः शुभः पिबन्वारि निम्नगासंस्थः। सूर्योदये प्रशस्तो नेष्टफलः खंजनोऽस्तसमये ॥
पक्षावंगरुहौ धुन्वन् कंपयन् अशुभो निष्टफलदः निंनगा नदी। तत्रस्थं वारि जलं पिबन् शुभदृष्टफलः केचिद्वारिविहारस्थ इति पठंति वारिवाहे
जलगमनप्रदेशे वारि पिबन् सूर्योदये अभ्युदयकाले खंजनकः प्रशस्तः शुभफलदः सूर्यास्तमये नेष्टफलोऽशुभ इति ॥ अन्यदप्याह ॥
नीराजने निवृत्ते यया दिशा खंजनं नृपो यांतम् पश्येत्तया गतस्य क्षिप्रं अरातिर्वशमुपैति ॥ निवृत्ते परिसमाप्ते नीराजने नृपो राजा यया दिशा आ
शया खंजनं यांतं पश्येदवलोकयेत्तया दिश्यागतस्य राज्ञः अरातिः शत्रुः क्षिप्रमाशु एव वशमुपैति पश्यतां गच्छति विधेयतां प्राप्नोति ॥ ॥

अथ त्वयप्रदर्शनार्थमाह ॥ तस्मिन्निधिर्भवति मैथुनमेति यस्मिन्यस्मिंस्तु च्छर्दयतितत्र तलेस्तिकाचम् अंगारमप्युपदिशंति पुरीषणेस्यान्न कौलुकापनयनाय खेनधरित्रीम् ॥ यस्मिन्स्थाने मैथुनमेति गच्छति। तत्र तस्मिन् भूमिप्रदेशे निधिः निधानं भवति। यस्मिंस्तु च्छर्दयाति वमति तत्र तले काचमस्ति विद्यते। अस्य खंडानकस्य पुरीषणो यत्र पुरीषं दहनं करोति तत्र भूमौ तले अंगारमप्युपदिशंति कथयंति मुनयः काश्यपादयः॥ तथा च काश्यपः॥ मैथुनं कुरुते यत्र तत्रैव निधिमादिशेत्। भुक्तं छर्दयते तत्र तत्र काचो मधो भवेत्। पुरीषं यत्र कुरुते तत्रांगारं विनिर्दिशेत्। तत्कौलुकापनयनाय खनेद्धरित्रीम्। तस्य कौलुकस्य कुरंगनयन प्रतीत्यानिवारणाय च शंकयापरि त्रीं भूमिं खनेत्। येन प्रत्ययं उ ~~त्पे~~ ~~ष~~ द्यत इति ॥ अथ कुभाशुभमाह ॥ हृतविकलविभिन्नरोगितः स्वतनुसमानफलप्रदः खगः धनहृदभिविलीयमानको चबंधसमागमप्रदः ॥ खंजनकाह्नतविकलविभिन्नरोगितः स्वतनुसमानमात्मीयशरीरतुल्यं फलं प्रददाति। तद्यथा। हृतोयदि दृश्यते तदा द्रष्टुर्मरणमेव ददाति। एवं विकलोंगवैकल्यम् विभिन्नशरीरभेदनम् रोगितः संजातरोगो रोगमेव ददाति ॥ अथ शुभखंजनदृष्टे विधानमाह ॥ नृपतिरपि शुभं शुभप्रदेशे खगमवलोक्य महीतले विदध्यात्। सुरभिकुसुमधूपयुक्तमर्घं शुभमभिनंदितमेव मेति दृष्टिम् ॥ नृपती राजा शुभे प्रदेशे शुभं प्रशस्तलक्षणमपि खगं पक्षिणमवलोक्य दृष्ट्वा महीतले भूपृष्ठे सुरभिकुसुमधूपयुक्तमर्घम् सुरभीनि सुगंधानि यानि कुसुमानि पुष्पाणि तथा सुगंधाय धूपाः सैः संयुक्तमर्घं विदध्यात् दापयेत्। एवमनेन प्रकारेण शुभं फलमभिनंदितमस्मानितं दृष्टिमेति दृष्टिं करोति। ॥ ॥ अथाशुभखंजनके दृष्टिविधानमाह ॥ अशुभमपि विलोक्य खंजनं द्विजगुरुसाधुसुराचनिरतः नृपतिरशुभं समाप्नुयान्न यदि सप्तदिनानि मांसभुक् ॥ नृपती राजा अशुभमपि अनिष्टफलं अपि खंजनं विलोक्य दृष्ट्वा यदि द्विजानां ब्राह्मणानां गुरूणामुपदेशकर्तॄणां साधूनां सज्जनानां सुराणां देवानामर्चने पूजने रतः सक्तो भवति तदा नाशुभमनिष्टं फलं समाप्नोयात्प्राप्नोति। यदि सप्तदिनानि सप्ताहं मांसलुग्न भवति मांसं यदि न भुंक्ते नाप्नोति ॥ अथ कालफलप्रदर्शनार्थमाह ॥ आवर्षात्प्रथमदर्शने फलं प्रतिदिनर्द्धदिनशेषात् दिक्स्थानमूर्तिलग्नर्द्धि

गुल्मिंस्पृष्ट्वाङ्गुलितलशोकंशिरोभिद्यमानंराज्ञतोभयम् ॥ अन्यदप्याह ॥ विप्रयोगमुरःस्थित्वगात्रतः कर्पटजातिरनर्थदाभवेत् स्यात्प्रियाप्ति रभिपृष्टस्यकर्पटंपृष्टकतः चरणपादयोर्जितः ॥ उरसिपृष्ठतःस्पृष्टेप्रष्टुः केनचित्तदा विप्रयोगंवदेत् त्वग्गात्रत आत्मीयशरीरात्कर्पटादुत्तिर्वस्त्र त्याग अनर्थदा अनिष्टदाभवेत्स्यात् कर्पटंवस्त्रमभिपृष्टस्य प्राप्यचरणं पादंद्वितीयचरणे योजयतितदापृष्टकतः प्रष्टुः प्रियाप्तिः प्रियलाभःस्यादि वेत् ॥ तथाचपराशरः ॥ उरः स्पृष्ट्वाविप्रयोगंगात्राद्वस्त्रंसमुत्सृजेत् स्याद्धानर्थागमंपादंपादेनैवतुसंस्पृशेत् पटांतमभिपृष्टस्यवाष्टकेप्रिय समागमं विद्यात्जानीयात् ॥ ॥ अन्यदप्याह ॥ पादांगुष्ठेनविलिखेद्भूमिंद्वेत्रोत्थचिंतयाहस्तेन पादौकंडूयेत्तस्यदासीमयाचसा ॥ प्रष्टाद्वेत्रोत्थचिंतयापादांगुष्ठेनभूमिमवनिंविलिखेत्। हस्तेनकरणपादौचरणौकंडूयेत् तदादत्तस्यसाचचिंता। दासीमयादासीकृता॥ तथा चपराशरः॥ अंगुष्ठेनभूमिंविलिखेत्द्वेत्रचिंतांविजानीयात् हस्तेनपादौकंडूयेत्कुर्याद्दासीकृतांसताम् ॥ अन्यदप्याह ॥ तालभूर्जप टदर्शनांशुकंचिंतयेत्कचतुषास्थिभस्मगम् व्याधिराश्रयतिरज्जुजालकंवल्कलंचसमवीक्ष्यबंधनम् ॥ तालपृष्ठकपत्रदर्शनेवाप्रष्टात्र शुकंवस्त्रंविचिंतयेत् कचतुषास्थिभस्मगंव्याधिराश्रयति। कचः केशाः तुषंधान्यत्वक्चर्म। अस्थिप्रसिद्धं। भस्मप्रसिद्धमेव एषामन्यतमउपगते प्रष्टारंव्याधिः पीडाआश्रयत्याहणोति। रज्जुः प्रसिद्धः जालकंयत्रपक्षिणोबध्यतेवल्कलंत्वक् एषामन्यतमेस्थितंतंवासमवेक्ष्यावलोक्यदृष्ट्वा वाप्टकेत् तदाबंधनंवदेत्॥ तथाचपाराशरः॥ तालभूर्जपत्रदर्शनेवस्त्रार्थंकेशास्थिभस्माद्याक्रम्यव्याधिभयंब्रूयात् निगडजालरज्ज्वादि त्यवल्कलाद्यधिष्ठायदर्शनेवाबंधनभयम् ॥ अन्यदप्याह ॥ पिप्पलीमरिचशुंठिवारिदैः रोद्रकुष्ठवसनांबुजीरकैः गंधमांसिशतपुष्पया वदेत्पृष्टकतस्तगरकेनचिंतनम् ॥ स्त्रीपुरुषदोषपीडितसवाधसुतार्थधान्यतनयानाम् द्विचतुःशफक्षितीनांविनाशतःकीर्तितैःदृष्टैः ॥ पिप्पल्यादिदर्शनैःस्वाधिकृतांचिंतांक्रमशोवदेत् तत्रपिप्पलीदर्शनेयास्त्रीदोषसंयुतासदोषदुष्टातात्कृतांचिंतांप्रवदेत् मरिचदर्शनेपुरुषस्यदोषसं युतस्यसपापस्यचिंतांवदेत् शुंठिदर्शनपीडितस्यव्याधितस्यपृष्टतस्यवाचिंताम् वारिदामुस्तातेषांदर्शनेसर्वनाशकृताम् रोद्रदर्शनेअर्थनाशकृतांकुष्ठ

दशनेसुतनाशकृतांपुत्रनाशज्ञाम् वस्त्रनंवस्त्रंतद्दर्शनेअर्थनाशकृताम् अंबुनोवालकस्यदर्शनेधान्यनाशकृताम् जीरकमजाजीतद्दर्शनेतनय
स्यपुत्रस्यतन्नाशकृतांगंधमांस्यादिशफानांद्विपदानांनाशकृताम् शतपुष्पायाः चलुःशफानांद्विपदानांनाशकृत् शतपुष्पायाः चलुःशफा
नांचलुष्पदानांनाशकृताम् तगरकेनक्षितेर्भूमेः नाशकृतांचिंताम् एतैः कीर्तितैरुच्चारितैर्वादृष्टैरवलोकितैर्वाविनाशतोविनाशकृतोः ष्टकाभव
ति॥ तथाचपराशरः॥ पिप्पलीनांदर्शनेप्रदुष्टस्त्रीकृतांचिंताम् परिचम्यपापपुरुषकृतांशृंगवीरस्यमृतचिंताम् अजाज्याः सुतनाशकृताम्
रोध्रस्याधनाशकृताम् मुस्तस्यनाशकृताम् कुष्टस्यसुतनाशकृताम् वस्त्रस्यार्थनाशकृताम् ह्रीवीरस्यधान्यकृताम् तगरस्यभूमिनाशकृताम्
शतपुष्पायाः चलुष्पन्नाशायमांस्यादिपदनाशार्थम् ॥ अथदशाः ॥ न्यग्रोधमधुकतिंदुकजंबूप्लक्षाम्रबदरजातफलैः धनकनक
पुरुषलोहांशुकरुप्योडुंबराणिरपिकरगैः ॥ न्यग्रोधादिजातफलैस्तत्संभवैः फलैः करगैःहस्तस्थैः धनाद्याप्तिर्भवतितत्रन्यग्रोधफलैः
प्रष्टुःहस्तस्थैः धनाप्तिः वित्तलाभोभवेत् मधूकफलैःकनकस्यप्राप्तिः तिंदुकफलैःद्विपदस्यपुरुषस्यप्राप्तिः जंबूफलैःलोहस्यप्लक्षफलैरं
शुकस्यवस्त्रस्यआम्रफलैरुप्यस्यबदरफलैरुडुंबरस्यताम्रस्येति॥ तथाचपराशरः॥ अथन्यग्रोधफलैःहस्तस्थैःप्रष्टेद्धनागममादिशेत्
मधुकोडुंबरैःफलैःकांचनागमंद्विपदागमंतिंदुकैर्वस्त्रागमंप्लक्षजैःरुप्यस्याम्रैःताम्रस्यबधरैःलोहस्यजंबफलैरिति ॥ अथदशाः ॥
धान्यपरिपूर्णपात्रंकुंभःपूर्णःऊर्ध्वंबहुवृद्धिकरौ। गजगोश्वनांपुरीषंयथासंख्यंधनमुहृद्विनाशकरम् ॥ धान्येनपरिपूर्णपात्रंभाजनंकुंभः
पूर्णश्चेतौदृष्टौऊर्ध्वंबहुवृद्धिकरौगजगोश्वनांपुरीषंयथासंख्यंधनयुवतिसुहृद्विनाशकरंभवति। गजस्यहस्तिनःपुरीषंदृष्टंधनस्यैश्वर्यस्य
विनाशकरम्। गोपुरीषंगोमयंयुवतीनांस्त्रीणांविनाशकरंश्वनःपुरीषंसुहृदांमित्राणांविनाशकरमिति॥ तथाचपराशरः॥ धान्यपात्र

पूर्णंचकुंभदर्शनेऊर्ध्वंबहुवृद्धिंजानीयात् हस्तिनांड्याग्मंहस्तिशकृतोंशमैश्वर्यस्यवागोमयस्यस्त्रीव्यभिचारंश्वनःसुहृद्विनाशम् ॥ ॥
अथदशाः ॥ पशुहस्तिमहिषपंकजरजतव्याघ्रैर्लभेतसंदृष्टैः अविधननिवसनमलयजकौशेयाभरणसंघातम् ॥ पश्वादिभिः

प्रकाशसमयेसद्दृष्टैरवलोकितैर्नष्टाद्याभरणानांसंघातंसस्दृं प्राप्नालभेत। तत्रपशुदर्शनेआविकस्यौर्णिकस्यकंबलादेर्लाभः हस्तिनः करिणोदर्शने
धनागमः महिषदर्शनेनिवसस्यक्षौमवस्त्रस्यपंकजस्यपद्मस्यदर्शनेमलयजस्यचंदनस्यरजतस्यराधस्यदर्शनेकौशेयवस्त्रस्ययाचस्यसद्दर्श
नेआभरणागमः॥ तथाचपाराशरः॥ महिषस्यक्षौमवस्त्रागमंमणिगणस्यगवाजिनमौर्णिकानांचाप्रस्याभरणागमंपंकजस्यरत्नवस्त्रचंद
नलाभंरुथस्यकौशेयवस्त्राणाम्॥ अथचदृष्यात्॥ ष्टकाहद्धश्रावकस्तुपरिव्राड्दर्शनेदृष्टभिःविहिता।मित्रकृतार्थभवागणिकाच्छपस्द
तिकार्थाच॥ वृद्धश्रावकः कापालिकः तद्दर्शनेतदालोकनेदृष्टभिःपुंभिः घृतार्थभावाष्टकाविहिताकृतामित्रार्थंद्यूतार्थवाकृतापरिव्राड्द
र्शनेयत्यवलोकनेलिंगिनोवागणिकाच्छपस्दतिकार्थाकृता ष्टकागणिकावेश्याच्छेयोराजास्द तिकाप्रस्रुतास्त्रीतत्कृता॥ अथदृष्यात्॥
शाक्योपाध्यायार्हतनिर्ग्रंथिनिमित्तनिगमकैवर्तैः चौरचमूपतिवणिग्दासीयोधापणस्थवध्यानाम्॥ शाक्यादीनांदर्शनेचौरादीनांष्टका
शाक्यदर्शनेचौरकृतांउपाध्यायदर्शनेचमूपतिसेनापतिकृतांआर्हतदर्शनेवाणिजककृतांनिर्ग्रंथदर्शनेदासीकृतांनैमित्तिकस्यदैवविदोदर्शने
योधकृताम् निगमदर्शनेआपणस्थस्यश्रेष्ठिनःकृताम् कैवर्तस्यधीवरस्यदर्शनेवध्यकृतांचिंतामिति॥ अथचदृष्यात्॥ तापकेशौंडिकेदृष्टे
प्रोषितंपशुपालनम् हृद्गतंष्टककस्यस्याद्धुक्ष्टेत्नौविपन्नता॥ तापसेदृष्टेअवलोकितेष्टकस्यप्रष्टुःहृद्गतंचिन्तस्थंप्रोषितःप्रवासीयःक
श्चित्स्थितस्तंप्रवासिनंचिन्तस्थं शौंडिकेमद्यासक्तेदृष्टेपशुपालनम् चित्तस्थं। उंछवृत्तौशिलोंछवृत्तौदृष्टेविपन्नोर्थश्चिंताम्॥ तथाचपराशरः॥
निर्ग्रंथदर्शनेदासीष्टकांवृद्धश्रावकदर्शनेमित्रद्यूतकृतांवाशाक्यस्यचौरकृतांपरिव्राजकस्यच्छपस्दतिकागणितार्थांवाउपाध्यायस्यचमूप
तिकृतांनैगमस्यश्रेष्ठिकृतांनैमित्तिकस्ययोधार्थेमर्हतोवाणिजकार्थांमुंछवृत्तीनांविपन्नार्थांतापसस्यप्रोषितार्थांशौंडिकस्यपशुपाल
नार्थांकैवर्तस्यवध्यघातकृताम्॥ अथान्यदृष्यात्॥ इष्टकामिष्टमुष्टिभणितेपथ्यत्वार्थःसमादिशत्युक्ते। संयोगकुड्डं मोक्षाल्याभेद्यर्थी
ष्टनाचिंता॥ इष्टकामित्याद्युक्तेयथासंख्यंसंयोगादिकृतांचिंतांज्ञेयाइष्टकामिष्टमुष्टिमितिभणितेउक्तेसंयोगकुड्डंबकृतांचिंतांवदेत्पथ्य

त्वार्थद्रव्युक्तेलाभोज्ञतांलाभार्थंकृतांसमादिशेत्पृक्ते ऐश्वर्यो ज्ञातांचिंतामिति ॥ अथ्यदथाह ॥ निर्दिशेतिगदितंजयाध्वजाप्रत्यवेक्ष्यमम चिंतितंवद। अशुसर्वजनमध्यगंत्वयाद्दृश्यतामितिचबंधुचौरज्ञा ॥ निर्दिशेतिगदितेउक्तेपृच्छकाजयाध्वजयार्थेजाताकृता अध्वजाचप्रत्य वेक्ष्यवेतिविचार्यममचिंतितं ज्ञात्वा वदेत्पृक्ते बंधुकृतासर्वजनमध्यगंप्रेष्ठारमेवंशक्तिं आशुद्विप्रमेवात्वयाद्दृश्यतामिति चौरज्ञानस्करस्य नाचिंता॥ तथाचपराशरः ॥ आदिश्यार्येत्येवं पृच्छेदेश्वर्य चिंतांभरोत्पृक्तो कुटुंबकृतामिच्छामिद्रष्टुमितिसंयोगकृताम् पश्चात्वार्थ द्रुतिलाभकृतां। निर्दिश्येत्यध्वकृताम् जयपृच्छकोपृच्छामितावदाचार्येतिवासम्यआगत्यवेक्ष्यस्वेतिबंधुकृताम् अथकालेनिः श्वसतांतः सकलमावकुजनमध्यगतांद्दृश्यतामितिपृच्छेदितिचौरचिंतांजानीयात् ॥ ॥ अथचौरविज्ञानमाह ॥ ॥ अंतःस्थेंगेस्वजनउदिते बाह्यजेबाह्यएवपादांगुष्ठांगुलिकलनयादासदासीजनःस्यात् जंघेप्रेष्योभवतिभगिनीनाभितोहृत्स्वभार्यापाण्यंगुष्ठांगुलिचयकृतस्पर्श नेपुत्रकन्ये ॥ अंतःस्थे। अभ्यंतरस्थितेंगे। अवयवस्पृष्टे पृच्छायां चौरः स्वजन आत्मीयएवोदितउक्तः बाह्यजेंगेस्पृष्टेबाह्यएवोदितश्चौरः पादांगुष्ठांगुलिकलनयापादांगुष्ठेस्पृष्टेदासः चौरः अंगुलीषुपादास्थास्तेवस्पृष्टासुदासीजनः स्याद्भवेत् जंघास्पर्शनेप्रेष्यः कर्मकरोभवति नाभितोभगिनी। हृदिस्वभार्या। आत्मीयाजाया। पाणिर्हस्तः हस्तांगुष्ठस्पर्शनेपुत्रः अंगुलिचयः स्पर्शनेकन्या आत्मीयातनयाचौरीएवंपृष्ट तत्स्पर्शनेचौरज्ञानम् ॥ अथ्यदथाह ॥ मातरंजठरेमूर्ध्निगुरुंदक्षिणवामकौ। बाहूभ्रातायथतत्पत्नीस्पृष्टेष्वेवंचौरमादिशेत् ॥ जठरेउदरेस्पृष्टेमातरंस्वजननींचौरीम् मूर्ध्निशिरसिस्पृष्टेगुरुम् दक्षिणवामकौबाहूस्पर्शनेयथासंख्यंभ्रातातत्पत्नीदक्षिणबा हुस्पर्शनेभ्रातावामेतत्पत्नीएवमंगस्पर्शनेचौरंतस्करमादिशेत् वदेत् ॥ तथाचपराशरः ॥ बाह्यांगस्पर्शनेबाह्यचौरमंतःस्वकं नंतत्र। पादांगुष्ठेदासमंगुलेषुदासींजंघयोः प्रेष्यंजठरेमातरम् हस्तांगुलिषुदुहितरम् अंगुष्ठेसुतम् नाभ्यांभगिनीम् गुरुंशि रसि। हृदिचभार्याम् दक्षिणबाहौभ्रातरम् वामेभ्रातृभार्याम् ॥ अथापहृतस्यलाभज्ञानार्थमाह ॥ अंतरंगमवसुच्यबाह्यग

176

स्पर्शनंयदिकरोतिपृच्छकः श्लेष्ममूत्रशकृतस्त्यजत्यथोपातयेत्करतलस्थवस्तुचेत् ॥ भृशमवनमितांगपरिमोटनतोऽथवा। धूतरिक्तभां
डमवलोक्यचौरजनम् रुतपतितक्षतास्मृतविनष्टविभग्नगतोन्मुषितमृताद्यनिष्टरवतोनलभतेनरुतम् ॥ एवंविधैःनिमित्तैःप्रष्टाहृतंनलभ
ते। कैरित्याह। अंतरंगमभ्यंतरस्थितमवयवंप्राप्तमुपरित्यज्यबाह्यगावयवस्पर्शनंयदिपृच्छकःकरोति। अथवाश्लेष्ममूत्रशकृतस्त्यजति
तत्कालंपरित्यजति। अथवाकरतलस्थंपाणितलेस्थितंयत्किंचिद्वस्तुपातयेत् अथवाभृशमत्यर्थमवनामितांगेअवनामितावयवांगानां
मेवपरिमोटनंचटचटाशब्दमुत्पादयति। तथातत्कालंजलधूतंलोकगृहीतंरिक्तभांडमवलोक्यदृष्ट्वातथाचौरजनंतस्करजनमवलोक्य। अ
थवा। रुतः पतितः क्षतः अस्मृतः विनष्टः विभग्नः गतः उन्मुषितः मृतः एषामनिष्टरवतः शब्दश्रवणादादिग्रहणात्कष्टदुष्टानिष्टशीर्णशब्दश्र
वणात्प्रष्टाहृतंनलभतइति॥ तथाचपराशरः॥ अभ्यंतरंगंस्पृष्ट्वाबाह्यस्पर्शान्निरीक्षणांवा। श्लेष्मपुरीषनस्यानांकुर्याद्धस्ताद्वाकिंचित्पातये त्
गात्राणिवास्फोटयेत्क्षतरुतपतितमुषितविस्मृतनष्टकष्टदष्टानिष्टभग्नगतजीर्णशब्दप्रादुर्भावोवात्याज्जिता भांडतस्कराणांदर्शनेनष्टस्याला
भंविद्यात् ॥ अथपीडार्त्तानांमरणज्ञानमाह ॥ निगदितमिदंयत्तत्सर्वंतुषास्थिविषादिकैःसहस्मृतिकरंपीडार्त्तानांसमंकदितक्षतैः ॥
अंतरंगमवमुच्यात आरभ्ययदिदंनष्टचिंतायांनिगदितमुक्तंतत्सर्वंतुषास्थिविषादिकैःसहलाकंतथाकदितक्षतैःसह। पीडार्त्तानांरोगि
णांमृतिकरंमरणंकरोति। आदिग्रहणात् छिन्नभिन्नमृतिजयथदथपाटितशब्दैरिति॥ तथाचपराशरः॥ अथरोगाभिघातकर्दिमूत्रपु
रीषोत्सर्गकेशास्थिभस्मतुषविषादीनामशुभानांदर्शनेतथाछिन्नभिन्नव्यापन्नहतमृतावक्षतजयथदथबद्धपाटितदितशब्दश्रवणेवारो
गिणांमरणमादिशेत् ॥ ॥ अथभोजनज्ञानमाह ॥ अवयवमपिस्पृष्ट्वांतस्थेदृष्टंमलदाहरेदतिबहुतदाभुक्तान्नंसस्थितःसुहितो
वदेत् ॥ अंतस्थमभ्यंतरास्थितंदृष्टंस्थिरमवयवंस्पृष्ट्वामलद्वायुराहरेदुज्झिरेत्पृच्छेत् तदापृच्छकोतिबहुअतिप्रभूतमन्नंभुक्त्वासुहितोऽतिर

तः स्थितद्रुतिवदेत् ब्रूयात् ॥ अथ यदथाह ॥ ललाटस्पर्शनाद्भूकदर्शनाच्छालिजौदनम् उरः शब्दात्षष्टिकाथ्यंग्रीवास्पर्शे च यावकम् ॥ ललाटस्प
र्शनात् भ्रूकधान्यानां वा दर्शनात् शालिजौदनं टक्के नभुक्तमिति वदेत् उरः शब्दात्षष्टिकारव्यं धान्य विशेषान्नं ग्रीवास्पर्शे च यावकं । यवान्नम् ॥
अथ यदथाह ॥ कुक्षिकुचजठरजानुस्पर्शे माषाः पयस्तिलयवाः । आस्वादयते चोष्ठौ लिहतेमधुरं रसं ज्ञेयम् ॥ कुक्षिस्पर्शनं माषान्भुक्तान्
कुचौ स्तनौ स्तनस्पर्शे पयः क्षीरौदनम् जठरमुदरं तत्स्पर्शने तिलौदनम् जानुस्पर्शने यवाः यावकम् ओष्ठावास्वादयतो लिहते वा प्रष्टा टक्के तिनदा
ते न मधुरं रसं भुक्तमिति ज्ञेयम् ॥ अथ यदथाह ॥ विष्टंके त्स्फुरयेज्जिह्वामम्लं वक्त्रं विकूणयेत् कटुके तीक्ष्णकषाये थूत्कृते लवणं सैंधवे ।
जिह्वां रसनां विष्टंकेत् स्फोटयेद्वा । यदा तदा तेनाम्लं भुक्तम् वक्त्रं मुखं विकूणयेत् कटुके भुक्ते असौ । टक्कः कषाये भुक्ते थूत्कृते लवणं सैंध
वलवणे भुक्ते शीवेत् ॥ अथ यदथाह ॥ शुष्कान्यागे भुक्ताति क्तं क्वाथाद प्रेक्ष्य वा मांसामिषम् भ्रूगंडोष्टस्पर्शने शाकुनं तद्भु
क्तं तेनेत्युक्तमेतन्निमित्तम् ॥ शेषः परित्यक्ते भुक्ते नीरसं निक्तं तदल्पम् स्तोकं चतुर्थं क्वाथादं मांसाशिनम् आशिनां क्वाथ प्रेक्ष्य
दृष्ट्वा वा तन्मांसामिषं भुक्तम् भ्रूगंडोष्टस्पर्शने शाकुनं मांसं तेन प्रष्टुः तद्भुक्तमित्युक्तमेतत्कथितं निमित्तं तु चिह्नम् ॥ अथ यदथाह ॥
मूर्धागल्लकेशहनुशंखकर्णजंघां च वस्ति च स्पृष्ट्वा गजमाहिषमेषम् करगोधाशाष्टगमाहिषमांसयुतम् ॥ मूर्धादिस्पर्शने यथोक्तमंग
जादिमांसं भुक्तं वक्तव्यम् मूर्धा शिरस्तत्स्पर्शने गजमांसं कौंजरम् गल्लस्पर्शनं माहिषम् केशास्पर्शने मेषमांसमौरभ्रम् हनुस्पर्शने सूकर
मांसम् शंखस्पर्शने गज मांसम् कर्णस्पर्शने शशमांसम् जंघास्पर्शने मृगमांसम् वस्तिस्पर्शने माहिषमांसं युतमेव भुक्तम् ॥ ॥
अथ यदथाह ॥ दृष्टे क्षुते प्यशाकुने गोधामत्स्यामिषं वदेद्भुक्तम् गर्भिण्या गर्भस्य च निपतनमेवं प्रकल्पयेत्प्रश्ने ॥ अशकुने दृष्टे
अवलोकिते क्षुते वा दुर्निमित्ते गोधामिषमत्स्यामिषं वा भुक्तं वदेत् ब्रूयात् एवमेव गर्भपृच्छायामशकुने दुर्निमिते क्षुते दृष्टे वा गर्भिण्यः स्त्रियः

गर्भपतनं अकल्पयेन्निर्दिशेदिति॥ तथाच पराशरः॥ अथस्त्रियं दृष्ट्वा मत्यंतरंगं स्पृष्ट्वोञ्झिरं दृष्ट्वा थेत् भुक्तमन्नं विद्यात् तत्र ललाटस्पर्शने ष्टृ
कान्नं वा शाल्योदनमुरसि संस्पृष्टे षष्टिकोदनं ग्रीवायां जठरे तिलोदनं ऊरौ माषौदनं स्तनयोः क्षीरौदनं जानुनोर्यावकमास्वादयेदोष्ठौ वा परिले
ह्य मधुरं विस्रदो जिह्वां स्फोटयेदम्लं मुखं विकूणयेत्कटुकं ठिको कषायं निष्ठीवेत्तिक्तं शुष्कमल्पं स्नेहाणमुल्लजेदनिलवर्णांक्त्यादानां दर्शने
मांसप्रायं तत्र भृंगं डजिह्वौष्ठसंस्पर्शने शाकुनं ष्वेर्वा राजकर्णयोः पादजंघयोर्मार्गिकं शानामोरभ्रं शशं वा योर्गव्यं वस्तिगलयोः मालिषं स्पृष्ट्वा धृकौ
जरपाटितक्लिन्नभिन्नानां दर्शने गोधामत्स्यमांसमिति॥ ॥ अथ गर्भिण्याः जन्मज्ञानमाह॥ पुंस्त्रीनपुंसकाद्येदृष्टेऽनुमिते पुरः स्थिते स्पृष्टे
तज्जन्म भवति पापान्न पुष्पफलदर्शने च शुभम्॥ गर्भस्थायाः स्त्रियाः किं जनिष्यतीति पृष्टायां पुरुषदृष्टे वलोकितेऽनुमिते वा चिंतिते
पुरोग्रतः स्थिते वा स्पृष्टे वा तस्मिंस्तज्ञाम पुत्रो जन्म भवति। एवं स्त्रियां दृष्टायां अनुमितायां वा पुरतः स्थितायां वा स्पृष्टायां वा स्त्रीजन्म नपुं
सकाद्येदृष्टेऽनुमिते पुरः स्थिते स्पृष्टे वा नपुंसकं जन्म भवति। पानान्नपुष्पफलदर्शने च शुभमिति पानस्यान्नस्य सर्वस्य भोजनादेः
पुष्पाणां कुसुमानां च फलानां दर्शने शुभं जन्म सुखप्रसवो भवतीत्यर्थः॥ अथ यदथाह॥ अंगुष्ठेन भ्रू दरं वांगुलिं वा स्पृष्ट्वा पृष्टके गर्भचिं
तानदास्यात् मध्वाज्याद्यैर्हेमरत्नप्रवालैरग्रस्थैर्वा मातृधात्र्यात्मजेष्व॥ स्त्रीस्वांगुष्ठेन भ्रूयुगमुदरमंगुल्योर्वा स्पृष्ट्वा पृष्टकेत् तदा
गर्भचिंतास्याङ्गवेत् अथवात्र अग्रस्थैः पुरोवस्थितैर्मध्वाज्याद्यैः मधु माक्षिकम् आज्यं घृतम् आदिग्रहणात् पुंनामभिः शोभनफलैः
च तथा हेमरत्नप्रवालैः हेमं सुवर्णम् रत्नानि माणिक्यः प्रवालं विद्रुमम् तथा मातृधात्र्यात्मजेष्व माता जननी धात्री स्तनदायिनी आत्म
जः पुत्र एतैरग्रस्थैः गर्भस्थं पृष्टकामेव जानीयात्॥ तथाच पराशरः॥ अथ स्त्री शुभोजठरमंगुष्ठेन वांगुलिं स्पृष्ट्वा पृष्टकेत् गर्भपृष्टो
जानीयात् तथा फलकायां दृष्टे प्रवालांकुरमधुघृतहेमगर्भपात्राजापत्यकमातृधात्रीपुत्रनिदर्शनशङ्खप्रादुर्भावेशं दृष्टकामेव॥ ॥
अथ यदथाह॥ गर्भयुता जगेकरोगेस्याद्दुष्टनिमित्तवशान्न दुदासः कर्षति तज्जन्म यदि पीगेत्पीडनतः काजे च करोपि॥ ॥

जठरे उदरे करगे हस्तेन स्पृष्टे स्त्री गर्भयुता स्याद्भवेत् तस्मिन्नेव पृच्छासमये दुष्टनिमित्तवशाद्दुष्टनिमित्तदर्शनात् द्रुतं पतितभग्नविनष्टदग्धदीवा
दिदर्शने श्रवणाद्दुन्मत्तदा सो गर्भपतनं भवति। अथवा तज्जठरं पीडोत्पीडनतः पीडामर्दनं कृष्णकर्षतिकंडूयेत्करगे च करोपि हस्ते हस्तेन वा अवलंब्य
पृच्छति तथापि तद्वदामद्वति ॥ अथ गर्भग्रहणकालज्ञानमाह ॥ घ्राणायादक्षिणे द्वारे स्पृष्टे मासोत्तरं वदेत्। वामे द्वौ कर्णे एवं मासाद्वि चतुर्थ
श्रुतिस्तने ॥ अंगुष्ठेनेत्यनुवर्तते घ्राणायाद दक्षिणद्वारे स्रोतसि अंगुष्ठेन स्पृष्टे गर्भग्रहणे मासोत्तरं वदेद्ब्रूयात् मासेन गर्भग्रहणं भविष्यतीवा
मे स्रोतसि स्पृष्टे अद्वौ वर्षद्वयमुत्तरवर्षद्वयं न गर्भग्रहणं भवति एवं वामे कर्णे वर्षद्वये नैव माः शब्देन मासाउद्यते। मासद्वि चतुर्थं श्रुतिस्तनद्
निश्रुतिः कर्णः दक्षिणे कर्णच्छिद्रे स्पृष्टे मासं द्वि घ्नद्विगुणितं मासद्वयेन गर्भग्रहणं भवति वामे वर्षद्वयेन स्तनस्पर्शने माः चतुर्घ्नः चतुर्भिः
मासैः स्तनद्वयस्पर्शनेनेति ॥ अन्यदप्याह ॥ वेणीमूले त्रीन्सुतान्कन्यके द्वे पुत्रान्पंच हस्ते त्रयं च। अंगुष्ठांते पंचकं चानुपूर्व्या पादांगु
ष्ठे पार्ष्णियुग्मे पि कन्याम् ॥ वेणी केशकलपे तन्मूले पृष्टे वा स्पृष्टे त्रीन्सुतान्पुत्रान् द्वे कन्यके जनयिष्यामीति वक्तव्यम्। कर्णे कर्णयुग्मे
द्वे पुत्रान् पंचकनिष्ठांगुलेनारभ्यांगुष्ठांतं यावदानुपूर्व्या क्रमेण पुत्रपंचकं स्यात्। तत्र कनिष्ठास्पर्शने एकं पुत्रं स्ते तेनामास्पर्शने मध्यमायां त्रयः
तर्जन्याम् चत्वारोंगुष्ठे पंच पादांगुष्ठस्पर्शे पार्ष्णियुग्मे पि स्पृष्टे कन्यामेकां स्तेतद्वति ॥ अन्यदप्याह ॥ सव्यासव्योरुसंस्पर्शे स्त्र तेकन्यास्त
नद्वयम् स्पृष्टे ललाटमध्यांते चतस्त्रिस्तनयो र्भवेत् ॥ ललाटमध्ये स्पृष्टे चतुः स्तनया चतुष्पुत्रा ललाटांते स्पृष्टे त्रितनया भवेत्यादि
ति ॥ तथा च पराशरः ॥ तत्र जठरस्पर्शे गर्भिणीमेव ब्रूयात् अंगुष्ठेन नासास्रोतसि दक्षिणे कुर्यान्मासांतरेण गर्भग्रहणम् वामाद्वि वर्षा
तरेण कर्णच्छिद्रे मासद्वये न वामे न वर्षद्वये न स्तनयोरंगुष्ठेनैव स्पृशेच्चतुर्भिर्मासैः पीठमंदकं धातुना कृत्वा उदरे कंडूयेद्ग्रहस्तं हस्तेनामिष्ट
ह्य वामे पृष्ठे इत्यलोकिकापिठरउदालक उठरस्दति चलितपतितभग्नदर्शनशब्दप्रादुर्भावो वास्याद्गर्भपतनं विद्यात्तथान्नपानफलपक्षिद्वि
चतुष्पद मन्यद्रव्याणां पुंसंज्ञानां दर्शनशब्दप्रादुर्भावे पुंजन्मविद्यात् स्त्रीसंज्ञानां स्त्रीजन्म नपुंसकाख्येन पुंसकानां। पुंसंज्ञमंगं संस्पृश्य गर्भि

णीष्टके पुंजन्म विद्यात् स्त्रीसंज्ञानां स्त्रीजन्म। नपुंसकाख्येषु नपुंसकानाम्॥ अथविशेषः॥ वेणीमूलमभिस्पृशति तस्याद्वेकन्यके नीरूपुत्रा
नुजनयिष्यतीति ब्रूयात् ललाटमध्यं स्पृशंती चत्वार्यपत्यानि ललाटांते त्रीणि कर्णयोः संस्पर्शे पंचापत्यानि विंद्यात् हस्ततलसंस्पर्शे त्रीणिक
निष्ठिकानामिकामध्यमाप्रदेशिन्यंगुष्ठानामेकद्वित्रिचतुपंचापत्यानि दक्षिणेन संस्पर्शे द्वौपुत्रौ द्वे च कन्यके जनयिष्यतिवामस्पर्शे तिस्रः कन्या
द्वौपुत्रौ पादांगुष्ठस्य कन्यकैकापार्ष्णेः कन्यकैकैवेति॥ अथगर्भिण्याः कस्मिन्नक्षत्रे जातकजन्म भविष्यतीति तज्ज्ञानार्थमाह॥ ॥
शिरोललाटभ्रूकर्णगंडहनुरदागलम् सव्योपसव्यः स्कंदश्चहस्तौचिबुकनालकम्॥ उरः कुचं दक्षिणमथसव्यं हृत्पार्श्वमेवं जठरं क
टिश्च। स्फिक्पायुसंध्योरुयुगं च जानुजंघेथपादावितिकृत्तिकादौ॥ स्पृतद्वृत्यनुवर्तते। पृच्छासमये गर्भिण्याः शिरः प्रभृतिसंस्पर्शे कृ
त्तिकादौनक्षत्रे जन्म विद्यात् तत्रशिरोमूर्धान्तसंस्पर्शे कृत्तिकानक्षत्रे जन्म भवति गर्भिणीस्पृष्टे एवं ललाटे रोहिण्याम् भ्रुवोर्मृगशिरसि। क
र्णयोरार्द्रायाम् गंडयोः पुनर्वसौ। हन्वोस्तिष्ये। रदौ दंताव श्लेषायाम् गलेग्रीवायां मघास्तु। सव्ये दक्षिणस्कंदे पार्श्वे पूर्वफल्गुण्याम्। अप
सव्येवामस्कंदसंस्पर्शने उत्तरफल्गुन्याम् हस्तयोः स्पर्शने हस्ते। चिबुके तस्याधः चित्रायाम् नालकेस्कंदवक्षः स्कंदौ स्वातौ। उरसि वक्षसि
विशाखायां। कुचौस्तनौ दक्षिणस्पर्शने अनुराधायाम् अपसव्येवामे ज्येष्ठास्तु हृदि मूले। पार्श्वद्वयमेवं आषाढ। तेन दक्षिणपार्श्वे पूर्वाषा
ढास्तु। वामउत्तरषाढास्तु जठरेश्रवणं। कट्यां धनिष्ठायां। जान्वोः रेवत्याम् जंघयोरश्विन्याम् पादयोः भरण्यामिति॥ तथाच पराशरः॥
शिरसि संस्पृष्टे कृत्तिकास्तु जन्म विद्याल्ललाटे रोहिण्यां भ्रुवोर्मृगशिरसि कर्णयोरार्द्रायाम् गंडयोः पुनर्वसौ। हन्वोस्तिष्ये। दंतयोरश्लेषा
स्तु। ग्रीवायां मघास्तु। दक्षिणांसे पूर्वफल्गुन्यां। वामांसोत्तरफल्गुन्याम्। हस्ते हस्तयोः चिबुके चित्रायां। नालके स्वातौ उरसि विशाखायां।
दक्षिणस्तनेऽनुराधास्तु। वामेज्येष्ठास्तु। हृदि मूले। दक्षिणपार्श्वे पूर्वाषाढास्तु। उत्तरषाढात्वपरपार्श्वे। जठरे श्रवणे। श्रोण्यां धनिष्ठास्तु।
स्फिग्गुदयोर्वारुणे। दक्षिणे तु प्राक्प्रोष्ठपदायां वामेनोत्तरायां। जानुभ्यां पौष्णे। जंघयोरश्विने। पादयोर्भरण्यामिति॥ २॥

अथोपसंहारार्थमाह ॥ इतिनिगदितमेतज्ज्ञात्रसंस्पर्शलक्ष्मप्रकटमभिमतार्थैर्वीक्ष्यशास्त्राणिसम्यक् विपुलमतिरुदारोवेत्तिसंपन्नमेतन्नरप
तिजनिताभिःपूज्यतेसौसदैव ॥ इतिशब्द उपसंहारे प्रकारेवा एतज्ज्ञात्रसंस्पर्शलक्ष्म अवयवस्पर्शनलक्षणं प्रकटमतिस्फुटं विरचितं। किंकृत्वा
सम्यगागमतः शास्त्राणिगर्गपराशरादिभिर्विरचितानिवीक्ष्य दृष्ट्वा किमर्थमभिमतार्थैः अभीष्टार्थसिद्ध्ये विपुलमति विस्तीर्णबुद्धिरुदारोस्य
लब्धं सर्वंनिरवशेषमेतद्वेत्तिजानातिसनरपतिभिर्नृपैर्जनिताभिः जनसमूहैः दैवज्ञः सदैव। सर्वकालं पूज्यते अर्च्यतइति ॥ ॥ ॥
इतिसंहिताविवृत्तावंगविद्यानामाध्यायएकोनपंचाशः ॥ ॥ ॥ अतःपरमपिकेचित्पिटकलक्षणंपठंति ॥ तदध्यस्माभिर्व्या
ख्यायते ॥ तत्रब्राह्मणानांवर्णानांपिटकलक्षणमाह ॥ ॥ सितरक्तपीतकृष्णाविप्रादीनांक्रमेणपिटकायेः तेक्रमशः प्रोक्तफलावर्णानाम
नुजातीनाम् ॥ विप्रादीनांचतुर्णांवर्णानांक्रमेणपरिपाट्यापिटकाः सितरक्तपीतकृष्णास्तेनलोहितकारिद्राः सिताः ब्राह्मणानांसिताःक्षत्रिया
णांरक्ताः वैश्यानांपीताः शूद्राणांकृष्णाइति। एवंक्रमेणयेपिटकाउक्ताः तेक्रमशोनुक्रमेणवर्णानांप्रोक्तफलाः कथितफलाः किंतु
नानुजातानांब्राह्मणवर्जितानां। एतदुक्तंभवतिसिताब्राह्मणानांफलदानान्यसितरक्ताक्षत्रियाणांनान्योसितरक्तपीतावैश्यानांनान्यासित
रक्तपीतकृष्णाःशूद्राणामिति ॥ ॥ अधुनाविशेषेणफलमाह ॥ स्निग्धव्यक्तशोभःशिरसिधनचयंमूर्ध्निसौभाग्यमाराद्दौर्भाग्यंभ्रूयु
गोत्थाःप्रियजनघटनामाशुदुःशीलतांचतन्मध्योत्थाश्चशोकंनयनपुटगतानेत्रयोरिष्टदृष्टिंप्रव्रज्यांशंखदेशेस्त्रुजलनिपतनस्थानगाश्चां
तिचिंताम् ॥ शिरसिमूर्धनिपिटकाःस्निग्धाअरूक्षास्तथाव्यक्तशोभाव्यक्तास्फुटाशोभाकांतिर्येषांतेतथाभूताधनचयंवित्तसमूहंकु
र्वंतिमूर्ध्निमुखपृष्ठेकशांतेआरात्शीघ्रमेवसौभाग्यम्। भ्रूयुगोत्थाभ्रूयुगलोत्पन्नादौर्भाग्यंदुर्भगत्वम्। तन्मध्योत्थाभ्रूसंगमजनिताप्रियज
नघटनामिष्टबंधुसंयोगंदुःशीलतादुष्टशीलत्वंचाशुशीघ्रमेवकरोतिनयनपुटगताअक्षिपुटगताइष्टेजनाःशोकंददाति। नेत्रयोश्चक्षु
शोरिष्टदृष्टिदर्शनम्। शंखदेशेशंखस्थानेप्रव्रज्याम् अस्त्रुजलनिपातनस्थानगाअस्त्रुजलंयत्रनिपततीतितत्रगताचिंतांरातिददंति ॥ तथा

पराशरः ॥ अथ पिटकाः सितरक्तपीतकृष्णा द्विजातीनां वर्णानां क्रमात्स्थानवर्णविशेषणोक्तमनल्पफलदा भवंति ॥ तत्र मूर्ध्नि तु घनाः स्निग्धाः
सुवर्णाभिषेकागमनं कुर्यात् शिरसि धनागमं केशांते सौभाग्यं ललाटे धनसंचयं भ्रुवोर्दौर्भाग्यं संगमे दौःशील्यमिष्टसंगमं च नेत्रपुत्रयोः शोकं
नेत्रयोरिष्टदर्शनं शंखदेशे प्रव्रज्याम् चिंतामश्रुपातमिति ॥ अथान्यदप्याह ॥ घ्राणगंडे वसनसुतदा चोष्ठयोरन्नलाभं कुर्युस्तद्वच्चिबु
कतलगा भूरिवित्तं ललाटे। हन्वोरेवं गलकृतपदाः भूषणान्यन्नपाने श्रोत्रे वा तद्भूषणानां गणमपि ज्ञानमात्मस्वरूपम् ॥ घ्राणगंडे यथाक्रमं
वसनसुतदाः तेन घ्राणगंडयोः नासादेशे वसनदा वस्त्रलाभप्रदाः पिटकाः गंडे सुतदाः पुत्रदाः ओष्ठयोरन्नलाभमन्नागमं कुर्युः भोजनावाप्तिम्
चिबुकतलगा आस्याधोभागं गताः स्थिता तद्वदन्नदा एव ललाटे भूरिवित्तं प्रभूतं धनम् हन्वोरेवं तत्रास्थिताः प्रभूतदा एव गलकृतपदा गलेकृ
तेकृतं पदं यैस्ते तत्र स्थिता इत्यर्थः भूषणान्यन्नपानानां च शोभने ददाति श्रोत्रे कर्णप्रदेशे तद्भूषणगणमपि ददातीति कर्णपरामर्शः तद्भूषणगण
स्य कर्णालंकाररूपस्यागमः तथा आत्मस्वरूपं ज्ञानमध्यात्मज्ञानं प्राप्नोतीति ॥ तथा च पराशरः ॥ गंडे सुतलाभं नासावंशे वस्त्र
लाभं चिबुकधरे ओष्ठधरे चान्नमाभि ऊर्ध्वं धनागमं गले चान्नपानं माभरणं च शिरः संधौ ग्रीवायां चोपघातं शस्त्रेण कर्णयोः तद्भूष
णं आत्मश्रवणं चेति ॥ अथान्यदप्याह ॥ शिरःसंधिग्रीवाहृदयकुचपार्श्वोरस्सु गता अवघातं घातं सुततनयलाभं कुचमपि प्रि
यप्राप्तिं स्कंदे यटनमथ भिक्षार्थमसकृद्विनाशं कक्षोत्था विदधति धनानां बहुसुखम् ॥ शिरःसंध्यादिषु गताः पिटका यथाक्रमम
योघातादिकं कुर्वंति। तेन शिरःसंधौ वयोघातं शस्त्रपीडाम् ग्रीवायां घातमुपतापम् हृदये सुतलाभम् कुचयोः स्तनयोश्च तनयलाभं
पुत्रप्राप्तिं पार्श्वयोः शुचमपि शोकम् उरसि वक्षसि गताः प्रियप्राप्तिमिष्टलाभम् स्कंदे अंसेपि असकृत्पुनर्पुनर्भिक्षार्थमटनं परि
भ्रमणम् अथ शब्दः चार्थे। कक्षोत्थाः कक्षयोः संभूता धनानां वित्तानां बहुसुखमनेकप्रकारं विनाशं क्षयं विदधाति कुर्वंति ॥ ॥
अन्यदप्याह ॥ दुःखशत्रुनिचयस्य विनाशं पृष्ठबाहुयुगजा रचयंति। संयमं च मणिबंधनजाता भूषणाद्यमुपबाहुयुगोत्था ॥ २

१८०

पृष्ठबाहुयुगजा यथाक्रमं दुःखं शत्रुनिचयस्य विनाशं रचयंति कुर्वंतितत्र पृष्ठजाता दुःखनिचयस्य दुःखसमूहस्य विनाशं कुर्वंति बाहु
युगजाः शत्रुनिचयस्यारिसमूहस्य विनाशं मणिबंधनजाताः प्रकोष्ठस्थानोत्पन्नाः संयमं हस्तबंधं कुर्वंति उपबाहुयुगोत्थाः प्र
जातोः जाताः भूषणाद्यमाभरणवस्त्रान्नदानं कुर्वंति ॥ तथा च पराशरः ॥ पार्श्वयोः शोकमुरसीष्टसंगमं स्कंदयोर्भैक्षचर्यांकक्षयो
रर्थहृद्योस्तनयोः पुत्रलाभं पृष्ठे दुःखशमनं मरिविनाशं बाह्वोः प्रबाह्वोराभरणं मणिबंधने नियमनम् ॥ अन्यदप्याह ॥
धनाप्तिं सौभाग्यं शुचमपि करांगुल्युदरगाः स्तपानान्नं नाभेंतदधद्वहृच्चौरैर्धनहृतिम् धनं धान्यं वस्तौ युवतिमथमेढ्रे सुतनयानुध
नं सौभाग्यं वा गुदवृषणजाताविदधाति ॥ करांगुल्युदरस्थाः पिटका यथाक्रमं धनाप्त्याधिकं विदधति कुर्वंति तत्र कारगता धना
प्तिं वित्तागमम् अंगुलिगताः सौभाग्यम् उदरगताः शुचं शोकम् नाभौ स्तुपानान्नं शोभनमन्नपानम् उदरेनाभावधोभागे हृदास्मिन्
पिटकलक्षणे चौरैस्तस्करैः धनस्य निश्चितं हरणम् वस्तौ धनं धान्यं मेढ्रे शिश्ने युवतिं स्त्रियं सुतनयां शोभनपुत्राणि विदधाति
धनं सौभाग्यं वा गुदवृषणजाताः गुदजाता अपानस्थानोत्पन्ना धनं वित्तम् वृषणजाताः सौभाग्यमिति ॥ तथा च पराशरः ॥
पाणौ धनागमं सौभाग्यमंगुलिषु शोकमुदरेन्नपानवाप्तिं च नाभौ चौरैरर्थहरणमथ उदरे धनधान्यावाप्तिं शिरसि सौभाग्यमर्थला
भं च वृषणयोः पुत्रजन्म स्त्रीलाभं मेहने गुदे सौभाग्यमिति ॥ अन्यदप्याह ॥ ऊर्वोर्यानांगनालाभं जानुनो रिपुतः क्षतिम् शस्त्रे

चट

णजंघयोर्गुल्फे ध्वबंधः क्लेशदायिनः ॥ ऊर्वोर्यानलाभं वाहनाप्तिमंगनालाभं स्त्रीप्राप्तिं च ददाति। जान्वोः शत्रुजनादरिलोकात्

१८०

क्षतिं विनाशं जंघयोः शस्त्रेण विनाशम् गुल्फे स्थिता अध्वनि पथि बंधने च क्लेशदायिनः कष्टप्रदा भवंति ॥ तथा च पराशरः ॥
यानांगलाभमूर्वोर्जान्वोरुपरि रिपुघातं। शस्त्रेण जंघयोर्गुल्फयोरध्वबंधपरिक्लेशागमः ॥ अन्यदप्याह ॥ स्फिक्पार्ष्णिपा
दजाता धनाशगम्यगमनमध्वानम् बंधनमंगुलिनिचये ऽंगुष्ठे च ज्ञातितो लोकतः पूजाम् ॥ स्फिक्पार्ष्णिपादजाताः पिटका यथा

शालिहोत्रः ॥ शुक्लराजिपरिक्षिप्तं यस्यांतर्लोचने शुभे। मल्लिकाक्षो महाधन्यः समरः हतसतारकः इत्यनेन लक्षणेन युक्तो मल्लिकाक्षः तथा
बुद्बुदो जलबुद्बुदः प्रसिद्ध एव। एवं वैडूर्यमल्लिका बुद्बुदेक्षणस्तत्तुल्यनेत्राः नेत्रवर्त्मा शिरोमाणिगतानि स्थूलान्यतिघनानि येषाम् पार्ष्णिभिः खुरपश्चि
मभागैरस्फुटिताभिरभग्नाभिः ते सर्वे निःशेषाः प्रशस्ता भारसहाश्च भारसंकृतइति ॥ अथयदथाह ॥ घ्राणदेशे सवलिर्मार्जारमुखः सितश्च
दक्षिणानः कमलोत्पललाक्षाभः सवालधिर्वाजितुल्यजवः ॥ लंबैर्वृषणैर्मेघोदरश्च संक्षिप्तवक्षणक्रोडः ज्ञेयो भाराध्वसहो जङ्घातुल्यश्च शस्तफ
लः ॥ यश्च घ्राणदेशे नासायां सवलिर्वलियुक्तः मार्जारमुखो बिडालतुल्यो वदनः दक्षिणेन दक्षिणभागे सितः शुक्लवर्णः कमलोत्पललाक्षाभः क
मलं पद्ममुत्पलं नीलोत्पलं। लाक्षा प्रसिद्धा लोहितवर्णा एषां सदृशी आभा कांतिर्यस्य सुवालधिः शोभनपुच्छवान्ः वाजितुल्यजवः वाजी तुरगः तत्तुल्य
स्तत्सदृशो जवो वेगो यस्य शीघ्रगतिरित्यर्थः लंबैः प्रलंबमानैर्वृषणैर्मेढ्रैरंडैर्युक्तः मेघोदरः मेघोदराकारमुदरं यस्य संक्षिप्तवक्षणक्रोडपश्चिम
जंघा वृषणांतरं वक्षणशब्देनोच्यते ॥ अमुमेवार्थं शालिहोत्र एवाह ॥ सक्थियस्कांतरस्थं डोवेक्षणस्त्वभिनिर्दिशेत् अग्रजंघांतरं क्रोड उच्यते
वेशशीघ्रगः। वंक्षणश्च क्रोडश्च वंक्षणक्रोडानि संक्षिप्तानि वंक्षनक्रोडानि यस्य स वृषभो भारे भारोद्वहने अध्वनि पथि च समर्थः क्रोज्ञेयः ज्ञातव्यः
जवेन वेगेनाश्वस्य तुल्यः तुरगसमः जवो वेगो गतिरिति पर्यायाः एवंविधाः शस्तफलः शुभफलद इति ॥ अथयदथाह ॥ सितवर्णः पिंगाक्षः
ताम्रविषाणो गोक्षणो महावक्त्रः हंसो नाम शुभफलो यूथस्य विवर्धनः प्रोक्तः ॥ यश्च सितवर्णः श्वेतवर्णः पिंगाक्षः कपिलनेत्रः ताम्रविषा
णो क्षणः ताम्रवर्णो लोहितवर्णो विषाणो शृंगे गोक्षणो नयने च यस्य। महावक्त्रः स्थूलाननः स हंसो नाम हंसाख्यः शुभफलः प्रशस्तफलः यूथस्य
वृंदस्य विवर्धनो वृद्धिकरः प्रशस्तः प्रोक्तः कथितः ॥ अथयदथाह ॥ स्पृष्टवालधिराताम्रविषाणो रक्तदृक् ककुद्मांश्च। कल्माषस्स्वामिनमचिरा
त्कुरुते पतिं लक्ष्म्याः ॥ यो वृषभो भूः स्पृष्टवालधिः पुच्छवालाः भूः स्पृशो यस्य। आताम्रविषाणो लोहितशृंगः रक्तदृक् लोहितनेत्रः ककुद्मान् ककु
द्युक्तः कल्माषश्च कल्माषवर्णः सितरक्तपीतश्यामिश्रवर्णः स स्वामिनं पतिमचिरात् शीघ्रमेव लक्ष्म्याः श्रियः पतिं प्रभुं कुरुते ॥ ॥ अथयदथाह ॥ ८

२३२

योवासितैश्चचरणैर्यथेष्टवर्णैश्चसोपिशुभफलस्त्वत् मिश्रफलोपिस्याद्यो यदिनैकांतप्रशस्तोस्ति ॥ योवाष्टभिः सितैः शुक्लैः चरणैः पादैर्युक्तः यथेष्टवर्णैर्यादृग्वर्णैः शुभाशुभवर्णयुक्तोपिसशुभफलस्त्वत् अविद्योपासितैकचरणइति पठंति। एकांतप्रशस्तः सर्वलक्षणसंपूर्णो यदिनास्तिन विद्यते तदा मिश्रफलोपिस्यामिश्रफलोस्यात्। अपिशब्दः संभवनायाम् केचिदिनैकांततः प्रशस्तोस्तीतिपठंति मिश्रफलस्य शुभाशुभानाम शुभानां लक्षणानामंतरं कृत्वा यद्येकोशुभोंतवमानेनास्ति नातिरिच्यते तदाशुभाशुभलक्षणोपिस्यादिति ॥ तथाच पाराशरः ॥ मृदुसंहततनाम्रो ष्टस्तनुजिह्वस्तनुस्फिजः वैडूर्यमणिवर्णैश्च जलबुद्बुदसन्निभैः स्निग्धैश्चनयनैस्तथारक्तकनीनिकैः सिंहस्कंदामहोरस्कादृष्टपृष्ठः क कुद्मिनः भूमौकर्षतिलांगूलं प्रलंबस्थूलवालधिः पुरस्ताद्दुच्छदानीचाः पृष्ठतः सुसमाहितः हृत्तुंगाः स्थूलगात्राश्चविस्तीर्णजघनाश्चयोस्प ष्टताम्रतनुश्लक्ष्णौः शफैरविरलैर्दृढैः सुगुह्यवरसंस्थानैः समास्फुरितपार्ष्णिभिः वृतः स्थूलोद्धृतग्रीवाः ककुदैश्चसमुच्छ्रितैः एतेभारसहाज्ञेया धुरियानेचपूजिताः प्रलंबवृषणस्त्वर्थं सक्षिप्तोदरवंक्षणः विस्तीर्णवक्षोजघनोभारेयानेचपूजितः स्निग्धपिंगेक्षणः श्वेतः ताम्रशृंगोमहानतः रक्तगोः पञ्चकोनामगोसहस्रप्रवर्धनइति ॥ ॥ ॥ इतिश्रीमहोत्पलविरचितायांसंहितावित्तौ गोलक्षणंनामाध्यायएकोनषष्टितमः ॥ ॥ ॥ अथाश्वलक्षणंव्याख्यायते ॥ ॥ तत्रादावेवशुनःलक्षणमाहैकेन ॥ पादाः पंचनखाः त्रयोग्रचरणाः षड्भिर्नखैर्दक्षिणस्ताम्रोष्ठाग्रनसोमृगेश्वरगतिः जिघ्रन्भुवंयातिच। लांगूलंसमटंदृष्टक्षसदृशीकर्णौचलंबौमृदू यस्यश्वाम्लकरोतिपोष्टुराचिरात्पुष्टां श्रियंसत्वष्टे ॥ यस्यशुनः श्वयाः पादाः चरणाः पंचनखाः पंचभिर्नखैः करुहैः युक्ताश्चत्वारोदक्षिणेग्रचरणाग्रपादः षड्भिर्नखैर्युक्ताः ताम्रोष्ठाग्रनसाताम्रवर्णौलोहितोष्ठौतथानासिकाग्रंयस्य मृगेश्वरः सिंहः तत्सदृशीगतिः गमनंयस्यसमृगेश्वरगतिः भुवंभूमिं जिघ्रन्यातिगच्छति लांगूलंपुच्छंसमटंसराभिर्युक्तंजटिलमित्यर्थः दृष्टिः ऋक्षसदृशीऋक्षः प्राणीतत्सदृशीतत्तुल्यादृष्टिरित्यर्थः कर्णौश्रोत्रेलंबौप्रलंबौमृदूमार्दवयुक्तौयस्यैवंस्याद्भवेत्सश्वाकुक्कुरः पोष्टोपालयितुरचिरात्शीघ्रमेवष्टव्यमनिपुष्टांपरिपूर्णांश्रियंलक्ष्मीं

२३२

करोति ॥ तथाच गर्गः ॥ त्रयः पादाः पंचनखाः चाग्रगो दक्षिणस्तथा । पश्चाद्वामस्ताम्रनासो यास्ताश्चौष्ठः सिंहविक्रमः मंत्रीजिह्वः समायाति
लांगूलं जटिलं यथा । मद्धाभीचद्धाघीकौर्णिष्टहति वोष्ठलंबिनौ । सम्यगाष्टपश्यमक्तीश्रिवंपक्तिपोषितः ॥ अथ कुक्कुटलक्षणमाह ॥ ॥ पा
दे पादे पंचनखा वाग्रपादे वामे यस्याः षण्नखाः मल्लिकाक्ष्याः वक्रं पुच्छं पिंगला लंबकर्णी या सा राष्ट्रं कुक्कुरी पाति पुष्टा ॥ यस्याः कुक्कुर्याः पादे
पादे प्रतिचरणे पंच पंचनखाः करसहाः अग्रपादे चतुर्थे वामे चरणे यस्याः षण्नखाः भवंति । याच मल्लिकाक्षी ईदृक् मंडलवासे मल्लिकाख्यपक्ष
सौराज्ये यस्याः भवंति । याच मल्लिकाक्षी एवंविधा या मल्लिकाक्ष्याः यस्याः पुच्छं लांगूलं वक्रं कुटिलं च पिंगला कपिला लंबकर्णी च या सा पुष्टा
परिपोषिता राष्ट्रं पाति रक्षति ॥ ॥ इति भट्टोत्पलविरचितायां संहिताविवृतौ श्वलक्षणं नामाध्यायः षष्टितमः ॥ ६० ॥ श्रीः ॥
अथ कुक्कुटलक्षणं व्याख्यायते ॥ तत्रादावेव कुक्कुटलक्षणमाह ॥ कुक्कुटस्त्वृजुतनूरुहांगुलिस्ताम्रवक्त्रनखचूलिकः सितः रौति सु
स्वरमुषात्यये च यो वृद्धिदः स नृपराष्ट्रवाजिनाम् ॥ यः कुक्कुटः कृकवाकुः ऋजुतनूरुहांगुलिः ऋजवः स्पष्टास्तनूरुहाः पक्षाणि यस्य ऋ
ज्वंगुलिः स्पष्टकरशाखा ताम्रवर्णवक्त्रो यस्याः ताम्रनखः ताम्रमुखः ताम्रचूलिकः ताम्रचूडः सितः शुक्लः उषात्यये रात्र्यवसाने सुस्वरं मधु
रं मधुरं रौति शब्दं करोति स नृपस्य राज्ञो राष्ट्रस्य च जनपदस्य वाजिनामश्वानां वृद्धिदो वृद्धिं ददाति ॥ तथाच गर्गः ॥ श्वेतः ताम्रनखः श्रेष्ठः ताम्र
चूडः तनुवालधिः अनावृतांगुलिः स्वंगः ताम्रचूलः प्रशस्यते । अस्यालाभे यवग्रीवो दधिवर्णः शुभाननः प्रशस्यास्य स्थूलशिरः हारिद्रवर
र्णो द्विजः अरवं जास्ताम्रवक्त्राश्च स्निग्धवर्णाश्च दृष्टजिताः दीनाः चैव विवर्णाश्च विस्वराश्च विगर्हिता इति ॥ ॥ अथान्यल्लक्षणमाह ॥ ॥
यवग्रीवो यो वा बदिरसदृशो वापि विहगो बृहन्मूर्धा वर्णैर्भवति बहुभिर्यश्च रुचिरः समस्तः संग्रामे मधुमधुपवर्णश्च जयकृत्स शस्तो यो तोच्चः
कृशतनुखः खंजचरणः ॥ यो विहगः पक्षी यवग्रीवो यवसदृशग्रीवः यवशिरा इति लोके प्रसिद्धः यो वा बदिरसदृशो लोहितवर्णः
सुपक्वबदिरफलाभ इत्यर्थः बृहन्मूर्धा विस्तीर्णशिर्षः बहुभिर्नानाप्रकारैः सितरक्तनीलपीतकृष्णैर्वर्णैर्युक्तः रुचिरो निर्मलः स कुक्कुटः संग्रा

मेपुछे शस्तः नशस्तः अथ वा मधुवर्णः पीतवर्णः मधुपवर्णो भ्रमरवर्णः कृष्णः सोपिजयकृत् अतोन्मादुक्तादन्योपरो न शस्तो न शुभः योष्ठशतनवः कृश
क्षामातनुरल्पोरवः शब्दोयस्य रवंजचरणे विकलपादः सोपि न शुभः ॥ ॥ अथ उलूकीलक्षणमाह ॥ ॥ उलूकी बहुदुचारुभाषिणी स्निग्धमूर्ति
रुचिराननेक्षणा। सा ददाति सुचिरं महीक्षितां श्रीर्यशो विजयवीर्यसंपदः ॥ या च उलूकी मृदुमार्दवयुक्तं चारु शोभनं भाषते स्निग्धमूर्तिर्निर्मलश
रीरा रुचिराननेक्षणा रुचिरं शोभमानमाननं सुवर्तं तथेक्षणे यस्याः सा महीक्षितां राज्ञां सुचिरं चिरकालं श्रियं लक्ष्मीं यशः कीर्तिं विजयं विशेषेण
जयं वीर्यसंपदमैश्वर्यं च ददाति ॥ ॥ ॥ इति भट्टोत्पलविरचितायां संहितावृत्तौ उलूकीलक्षणं नामाध्याय एकषष्टितमः ॥ ६१ ॥
अथ कूर्मलक्षणं व्याख्यायते ॥ ॥ ॥ तत्राह ॥ स्फटिकरजतवर्णो नीलराजीविचित्रः कलशसदृशमूर्तिश्चारुवंशश्च कूर्मः अरुणस
मवपुर्वा सर्षपाकारचित्रः सकलनृपमहत्त्वं मंदिरस्थः करोति ॥ यः कूर्मः स्फटिकवर्णः स्फटिकोपलाभः रजतवर्णो रुक्माकृतिः नीलाभिर्नी
लवर्णाभिः राजिभिः लेखाभिर्विचित्रो विचित्रितः कलशसदृशमूर्तिः ऊर्ध्वमुख्यशरीरः चारुवंशः वंशः स्पष्टास्थि चारु शोभनं यस्य नात्युच्चद्रव्य
र्यः अथवा अरुणसमवपुर्लोहितशरीरः सर्षपाकारैः श्वेतैः बिंदुभिः चित्रः चित्रितः स मंदिरस्थः गृहे समवस्थितः सकलनृपाणां समस्तराज्ञां
महत्त्वं प्रभुत्वं महिमानः करोति राजाधिराजतां करोतीत्यर्थः ॥ अन्यदप्याह ॥ अंजनभृंगश्यामतनुर्वा बिंदुविचित्रोव्यंगशरीरः सर्पशिरा वा स्थू
लगलो यः सोपि नृपाणां राष्ट्रविवृद्ध्यै ॥ अंजनं प्रसिद्धं कज्जलं भृंगो भ्रमरः अंजनभृंगवत् श्यामतनुः शरीरं यस्य बिंदुविचित्रो बिंदुभिस्तिलकैः
विचित्रितः अव्यंगशरीरः अव्यंगं परिपूर्णावयवं शरीरं देहो यस्य। सर्पशिरा वा सर्पसदृशमूर्धा वा यश्च स्थूलगलो विस्तीर्णकंठः सोपि कूर्मो
नृपाणां राज्ञां राष्ट्रस्य विवृद्ध्यै वर्धनाय भवति ॥ अन्यदप्याह ॥ वैडूर्यत्विट् स्थूलकंठस्त्रिकोणो गूढः छिद्रः चारुवंशश्च शस्तः क्रीडावा
प्यां तोयपूर्णे मणौ वा कार्यः कूर्मो मंगलार्थं नरेंद्रैः ॥ वैडूर्यत्विट् वैडूर्यसदृशकांतिः स्थूलकंठः पीनगलः त्रिकोणः शृंगाटकाकृतिः गा
ढच्छिद्रः गूढानि अदृश्यानि छिद्राणि रंध्राणि चारुवंशः शोभनपृष्ठास्थि स शस्तः शोभनो य एवंविधः कूर्मः स नरेंद्रैः राजभिर्मंगलार्थं क्रीडावाप्यां

२२४

स्तनतस्तृतीयं नाभिः कटिश्चेति चतुर्थमाहुः उदरं कथयंति पंचमं हृदयं षष्ठमतस्तराद्वितम् अथ सप्तमं मांसजत्रुणी कथयंत्यष्टममोष्टकंधरे। नवमं
नयने च सभ्रुणी सललाटं दशमं शिरस्तथेति। दशादो त्राणिष्टज्ञां चेति। मृज्ञापं चमकाभूतं कायाच्छाया शुभफलानि निवेदयंती लक्ष्म्या पददर्शितलक्षण
ज्ञैः। तेजोगुणा बहिरपि प्रविकासयंती दीपप्रभा स्फटिकरत्नघटस्थितेव॥ तथा च काशिपुत्रेणाप्यक्षणां षड्विधच्छाया प्रोक्ता। यावच्छायाप्रभासैव
षड्विधा समकीर्तिता। स्वकान्तिस्थाप्रसन्ना च कांतादीनां विदीपिनी॥ ॥ अथाचार्याः पादात्प्रभृति केशांतं यावल्लक्षणानि वक्ष्यति॥ ॥ तत्रादा
वेव पादयोर्लक्षणमाह॥ अस्वेदनौ मृदुतलौ कमलोदराभौ श्लिष्टांगुली रुचिरताम्रनखौ सुपार्ष्णी। उष्णौ शिराविरहितौ च निगूढगुल्फौ कूर्मो
न्नतौ च चरणौ मनुजेश्वरस्य॥ एवंविधौ चरणौ पादौ मनुजेश्वरस्य राज्ञः। कीदृशौ। अस्वेदनौ स्वेदवर्जितौ। मृदुतलौ मृदुनी मार्दवयुक्ते तले ययोः
कमलोदराभौ कमलं पद्मं तस्योदरं गर्भमभ्यंतरं तत्सदृशी आभा कांतिः ययोः श्लिष्टांगुली घनांगुलियुक्तौ रुचिरताम्रनखौ रुचिरतेजस्विनस्ताम्रास्ता
म्रवर्णा नखावयवाः केचित्तु रुचिरपार्ष्णी नखाविति पठंति। रुचिरपार्ष्णी ययोः सुपार्ष्णी शोभनपार्ष्णी। पार्ष्णिशब्देन पश्चात्पादभाग उच्यते उष्णावुष्णु
कौ शिराविरहितौ शिरावर्जितौ निगूढगुल्फौ निगूढौ निमग्नौ अनुल्बणौ गुल्फौ ययोः कूर्मोन्नतौ कूर्मपृष्ठाकारौ तथाभूतौ चरणौ मनुजेश्वरस्य मनुजाम
नुष्याः तेषामीश्वरः प्रभुरिति॥ तथा च समुद्रः॥ पादैः समांसैः सुस्निग्धैः मांसैः श्लिष्टैः सुशोभनैः उन्नतैः स्वेदरहितैः शिराहीनैः च पार्थिवः॥ तथा
च गर्गः॥ पद्मरक्तोत्पलनिभैस्तथा दांतजसन्निभैः नृपाः पादतलाज्ञेया वे चान्ये सुखभागिनः॥ अथात्रैव शुभाशुभलक्षणान्याह॥ शूर्पा
कारविरूक्षपांडुरनखौ वक्रौ सिरासंततौ संशुष्कौ विरलांगुली च चरणौ दारिद्र्यदुःखप्रदौ। मार्गायोत्कटकौ कषायसदृशौ वंशस्य विच्छेदकौ ब्रह्मघ्नौ
परिपक्वद्युतितलौ पीतावगम्यारतौ॥ एवंविधौ चरणौ पादौ शूर्पाकारौ शूर्पवत्प्रविस्तीर्णौ विरूक्षौ अस्निग्धौ पांडुरनखौ पांडुराः शुक्लाभा नखा ययोः वक्रौ व
स्पष्टौ दीर्घौ वा सिरासंततौ सिराबहुलौ संशुष्कौ मांसरहितौ विरलांगुली च विरला विश्लिष्टा अंगुल्यः शाखावयवा ययोः तौ तथाभूतौ दारिद्र्यदुःखप्रदौ
दारिद्र्यं निर्धनत्वं दुःखं च ददतः॥ तथा च समुद्रः॥ शूर्पाकारैस्तथा भग्नैर्वक्रैः शुष्कैः सिराततैः सस्वेदैः पांडुरैर्दीनैः चरणैरतिदुःखितः। मार्गायो

त्कटकाविति। उत्कटकोमध्यादुन्नतोपांडुकाकारोमार्गायाधनिरतोभवतः तथाकषायसदृशोक्तस्मलोहितोवंशस्यउत्लाय्यविच्छेददौ विनाशकरो
परिपक्वयादथयास्तुदालुल्याध्कतिर्कीतिस्तनयोर्मयोत्तौ अस्तरुत्याकारोपीतो पीतवर्णाविगद्यास्तुस्त्रीपुरतोसक्ताविव्यर्थः॥ तथाचसमुद्रः॥
उत्कटावधनिरतोकषायोउत्लनाशनो। अलक्ष्योदथसदृशौ अतिपीतावगम्यदौ ॥ ॥ अथजंघोरुजानूनांलक्षणमाह ॥ अविरल
तनुवृत्तरोमजंघाद्विरदकरप्रतिमेवरोमभिश्च। उपचितसमजानवश्च भूपाधनरहितः शृगालतुल्यजंघाः ॥ अविरलैरघनैःस्त
नुभिः सूक्ष्मैरोमाभिर्युतेवृत्तेपरिवर्तुले जंघे येषांतेतथाभूतातथावरोरुभिः श्रेष्ठैः ऊरुभिः द्विरदकरप्रतिमैः गजहस्तसदृशैरुपलक्षिता
उपचितोमांसलोसमावविषमोजानुनीयेषांतेभूपाराजानः शृगालतुल्यजंघाः शुनांस्तगालानांचतुल्याःसदृश्याजंघायेषांतेधनर
हितादरिद्राभवंति॥ तथाचसमुद्रः॥ जंघाभिरोमिष्टत्राभिरैश्वर्यमभिनिर्दिशेत् स्तगालजंघादुःखार्ताः श्वजंघानित्यमध्वगाः॥ ॥
अथजंघयोरोमलक्षणमाह ॥ रोमैकैकंकूपकेपार्थिवानांद्वेद्वेज्ञेयंपंडितश्रोत्रियाणाम् त्र्याद्यैर्निस्त्वोमानवोदुःखभाजोःकेशाः
चैवंनिर्मिताःपूजिताश्च ॥ एकैकंरोमकूपकेपार्थिवानांराज्ञांभवेत् द्वेद्वेरोमेरोहिणीकूपकेपंडितानांविदुषांश्रोत्रियाणांनियमिनां
चभवतः त्र्याद्यैरोमैस्त्रिभिस्त्रिभिश्चतुर्भिर्वाकूपकेमानवामनुष्यानिस्वानिर्धनादुःखभाजाचभवंति। एवमनेनप्रकारेणकेशामूर्धजा
निंदितागर्हिताःपूजिताःशुभाश्चभवंतिरोमशाभिस्तुजंघाभिःदुःखदारिद्र्यभागिनः एकरोमाभवेद्राजाद्विरोमश्चमहायशाः त्रिरो
मोबहुरोमश्चनराभाग्यविवर्जिताः॥ ॥ अथजानुलक्षणमाह ॥ ॥ निर्मांसजानुर्म्रियतेप्रवासेसौभाग्यमल्पैर्विकटैर्दरिद्राः
स्त्रीनिर्जिताश्चैवभवंतिनिम्नैराज्ञांसमांसैश्चमहद्भिरायुः ॥ निर्मांसेमांसरहितेयस्यसप्रवासेपथिम्रियते। अल्पैःसूक्ष्मैस्तनुभिः
सौभाग्यम् विकटैरतिविस्तीर्णैःदरिद्राःनिर्धनाभवंति। निम्नैर्जानुभिःखदायुक्तैःस्त्रीनिर्जितास्त्रीभिर्निर्जिताभवंतिसमांसैर्मांसयुक्तैःराज्यं
प्राप्तंभवति। महद्भिरतिस्थूलैरायुःजीवितंबहुभवति॥ तथाचसमुद्रः॥ निर्मांसौजानुनीयस्यप्रवासेम्रियतेतुसः अल्पैर्भवतिसौभाग्यं।

विकटस्त्र्यदरिद्रता ॥ स्त्रीजितःस्यात्तथानिम्नैर्मांसयुक्तैर्नराधिपः अतिस्थूलैश्चिरंकालंजीवेदैश्वर्यसंयुतः ॥ अथलिंगलक्षणमाह ॥ ॥
लिंगेल्पेधनवानपत्यरहितःस्थूलेपिहीनोधनैर्मेढ्रेवामनतेसुतार्थरहितेवक्रेऽथपुत्रवान् धारिद्र्यंविनतेत्वधोल्पतनयोलिंगेसिरासंततेस्थू
लेग्रंथियुतेसुखीस्तदुकरोत्यंतेप्रमेहादिभिः ॥ अल्पेलिंगेमेढ्रेधनवान्वित्तवान्भवति अपत्यरहितःचपुत्रवर्जितः अतिस्थूलेलि
गेधनैर्हीनोदारिद्र्योभवतिमेढ्रेलिंगेवामनतेवामभागविनतेसुतैःपुत्रैरर्थैर्धनैरहितोवर्जितः अन्यथावक्रेदक्षिणविनतेपुत्रवान्भवति। अ
धोभागविनतेदारिद्र्यंनिर्धनत्वंभवति। सिरासंततेःसिराबहुलेअल्पतनयःस्वल्पपुत्रःस्थूलेनग्रंथिनायुतेसुखीसुखितोभवति। दुष्टदुलिं
गेमनुष्यप्रमेहादिभिःकामलाद्यरक्तक्षैर्दुष्टरोगैरंतंकरोतिम्रियतइत्यर्थः ॥ अत्रैवाप्यल्पलक्षणमाह ॥ कोशनिगूढैर्भूपादीर्घैः
भग्नैश्चवित्तपरिहीना। ऋजुवृत्तशेपसःलघुसिरालशिश्नाश्चधनवंतः ॥ कोशेनचर्मणाभस्त्राकृतिनानिगूढैराशितैर्लिंगैःभूपारा
जानोभवंति। दीर्घैःलिंगैर्भग्नैःस्फुटितैःवित्तपरिहीनानिर्धनाभवंति। ऋजुवृत्तशेपसः ऋजुःस्पष्टवृत्तंपरिवर्तुलंशेपःलिंगंयेषांतेऋजु
वृत्तशेपसःतथालघुसिरालशिश्नालघुस्वल्पसिरालंसिरासंततंशिश्नंलिंगंयेषांतेधनवंतःवित्तयुक्ताः॥ तथाचसमुद्रः॥ दक्षिणाव
र्तलिंगोयःसभवेत्पुत्रवान्नरःवामावर्तेतथाकन्यास्तुबह्व्यःसंभवंतिच। स्थूलैःसिरालैःकठिनैर्नराःदारिद्र्यभागिनः ऋजुभिर्वर्तुलैर्लि
गैःपुरुषाःसुखभागिनः यस्यपादोपविष्टस्यभूमिंस्पृशतिमेहनम् दुःखितःसतुविज्ञेयःनरोदारिद्र्यभाजनः भूमौपादोपविष्टस्ययस्य
स्पृशतिमेहनम् भोगवान्सतुविज्ञेयस्तथालुरगमेहनः स्थूलग्रंथियुतेलिंगेनरोतिसुखभाग्भवेत् लिंगेनष्टदुनामर्त्योम्रियतेष्टकपीडितः॥ ॥
अथवृषणलक्षणमाह ॥ ॥ जलमृत्युरेकवृषणोविषमैःस्त्रीचंचलःसमैःक्षितिपोह्रस्वायुश्चोद्बद्धैःप्रलंबवृषणस्यशतमायुः॥ ॥
एकवृषणएकांडोजलमृत्युर्भवतिजलमध्येम्रियतेविषमैरतुल्यैर्वृषणैःस्त्रीचंचलास्त्रीषुअभिलाषुकोभवति। समैस्तुल्यैर्वृषणैःक्षितिपो
राजाभवति। उद्बद्धैःऊर्ध्वसंलग्नैःह्रस्वायुःस्वल्पजीवितःप्रलंबोवृषणोयस्यसप्रलंबवृषणस्तस्यशतमायुःशतंवर्षाणांजीवितमिति ॥

तथाचसमुद्रः ॥ एकांडोजलमृत्युः स्याद्विषमैस्त्रीपुचंचलः समांडोनरनाथश्चसंलग्नैरल्पजीवितः ॥ स्थूलंभांडः समानांतुशतंजीवतिमानवः ॥ २
अधुनामणीनांलक्षणमाह ॥ रक्तैराढ्यामणिभिर्निर्द्रव्याः पांडुरैश्चमलिनैश्च । स्निग्धैः सशब्दस्त्वच्चानिस्वानः यद्वस्त्रच्चधाराश्च ॥ द्वित्रिच
तुर्धाराभिः प्रदक्षिणावलितमूत्राभिः पृथिवीपतयोज्ञेयाविकीर्णमूत्राधनविहीनाः एकैवमूत्रधारावलितद्रूपप्रधानस्तुतधात्री । स्निग्धोन्नतस
ममणयोधनवनितारत्नभोक्तारः मणिभिश्चमध्यनिम्नैः कन्यापितरोभवंतिनिस्वाश्च । बहुपशुभाजश्चमध्योन्नतैश्चनातुल्यणै धनिनः ॥ रक्तैराढ्या
मणिभिरिति ॥ लिंगस्यायंमणिशब्देनोच्यते । रक्तैः लोहितैर्मणिभिराढ्याईश्वराभवंति । पांडुरैः शुक्लाभैः मणिभिर्मलिनैः चक्राभावर्णैः
निर्द्रव्याणिनिर्धनानिभवंति । सशब्दंशब्दसहितमूत्रंयेषांतेनिःस्वानानिर्धनाभवंति । द्वित्रिचतुर्धाराभिरितिद्वाभ्यांमूत्रधाराभ्यांद्विभिर्वाचतुर्भिर्मूत्र
धाराभिः प्रदक्षिणावलितमूत्राभिः प्रदक्षिणेनावर्त्तेनवलितंवेष्टितंयासांताभिः पृथिवीपतयोज्ञेयाराजानोवेदितव्याः विकीर्णविक्षिप्तं
मूत्रंयेषांतेविकीर्णमूत्राधनविहीनानिर्धनाभवंति । एकैवेति । एकैवमूत्रधारासाचवलितावेष्टिताद्रूपप्रदाशोभनंद्रूपंददातिनस्तुतधात्रीस्तु
तान्पुत्रान्नददाति । केचिद्रूपप्रधानस्तुतदात्रीतिपठंति । रूपप्रधानान्सुतान्ददाति । स्निग्धोन्नतसममणयः उन्नताउच्चाः समास्तुल्याः मणयोये
षांतेधनानांवित्तानांवणितानांस्त्रीणांरत्नानांमणीनांचभोक्तारः स्वामिनोभवंति । मणिभिरितिमध्यनिम्नैर्मध्यभागविनतैर्मणिभिः कन्यापितरः
कन्याजनकानिःस्वानिर्धनाश्चभवंति । मध्योन्नतैर्मध्यभागेश्चमणिभिर्बहुपशुभाजः बहूनांपशूनांचचतुष्पदानांभोगिनोभवंति । रत्नुल्यणैरति
स्थूलैर्मणिभिर्निर्धनिनईश्वरानभवंति ॥ तथाच ॥ रत्नाद्भातिर्मणिर्यस्यसममध्येविराजते । पार्थिवः सतुविज्ञेयः समुद्रवचनंयथा । स्वर्णरज
तप्रख्यैर्मणिमुक्तासमप्रभैः प्रवालसदृशैःस्निग्धैर्मणिभिः पार्थिवोभवेत् पांडुरैर्मलिनैरूक्षैः शावैरल्पैश्चनिर्धनैः मूत्रधारापतेद्देहाद्दक्षिणाव
लितायदि । पार्थिवःसतुविज्ञेयः समुद्रवचनंयथा । द्विधानंचपतेन्मूत्रंस्निग्धंशब्दविवर्जितं । भोगवान्सतुविज्ञेयः गवाद्योनात्रसंशयः बहुधारे
तथाद्रूक्षेसशब्देपुरुषाधमः ॥ अधुनावस्तिशुक्रमैथुनानांलक्षणमाह ॥ परिशुष्कवस्तिशीर्षाधनरहितादुर्भगाश्चविज्ञेयाः कुसुमसमगंध

242

२४२

शुक्रा विज्ञातघ्यामहीपालाः ॥ मधुगंधे बहुवित्ता मत्स्यसगंधे बहून्यपत्यानि। तनुशुक्रः स्त्रीजनको मांससगंधे महाभोगी। मदिरागंधे यज्वा क्षारसगंधे
चेरतासिदरिद्रः शीघ्रं मैथुनगामी दीर्घायुरतोन्यथाल्पायुः ॥ परिशुक्रेति। नाभिलिंगयोरंतरं वस्तिः परिशुष्कं निर्मांसवस्तिशीर्षं येषां ते धनरहिताद
रिद्रा दुर्भगा ज्ञानानामप्रिया विज्ञेया विज्ञातघ्याः अर्थादेवसंपूर्णा वस्तिशीर्षाः सुभगाः ॥ तथाच ॥ विस्तीर्णमांसलाः स्निग्धा वस्तिः उन्नता प्रशस्यते। निर्मां
साकर्कशारूक्षा दुःखदारिद्र्यदाः स्मृताः गोमायुसदृशा यस्य खरोष्ट्रमहिषस्य च। सम्भवेद्दुःखितो नित्यं धनहीनश्च मानवः ॥ कुंकुमसमं पुष्पतुल्यं शुक्रं ग
धं रेतः सुरभि येषां ते महीपाला राजानो विज्ञातघ्याः मधुमाक्षिकं मधुतुल्यगंधे शुक्रे बहुवित्ता प्रभूतधना मत्स्यसगंधे मीनसदृशगंधे बहूनि प्रभूतान्य
पत्यानि सुतादयो भवंति। तनुशुक्रो घनेरेताः स्त्रीजनः कन्यानां पिता भवति मांससगंधेन मांससदृशगंधेन महाभोगी भोगवान्भवति मदिरागंधे मद्गंधे शु
क्रे यज्वा याज्ञिको भवति। क्षारगंधे क्षारतुल्यगंधे रेतसि शुक्रे दारिद्रो निःस्वनो भवति ॥ तथाच ॥ पुष्पगंधो भवेद्राजा बहुस्वामधुगंधिनः मत्स्यगंधः सुत्वा
न्यान्स्त्रीप्रजातनुरेतसाः मांसगंधा महाभोगी यज्वानो मदिरासमे। गंधो येषां क्षारसमाः तेनिस्वामनुजाः स्मृताः शीघ्रपार्श्ववयो मैथुनंगमनशीलः सदी
र्घायुश्चिरजीवी भवति। अतोन्यथाचिरं मैथुनगामी सत्वल्पायुर्भवेन्नरः चिरमैथुनगामी वः सहस्रायुः प्रकीर्तितः ॥ ॥ अथस्फिग्लक्षणमाह २ ॥
निःस्वोतिस्थूलस्फिक्सुमांसलस्फिक्सुखान्वितो भवति। व्याघ्रांतो ध्यर्धस्फिक्मंडूकस्फुङ्नराधिपः ॥ अतिस्थूलौ स्फिजौ यस्य स निःस्वो निर्ध
नो भवति सुमांसलौ मांससंयुक्तौ स्फिजौ यस्य स सुखान्वितः सुखयुक्तो भवति यद्यर्धस्फिक्व्याघ्रांतः व्याघ्रः प्राणीन् मारयति। मंडूको भेकः तत्सद
शौ स्फिजौ यस्य स नराधिपती राजा भवति ॥ तथाच ॥ अतिस्थूलौ स्फिजौ यस्य निर्धनः सम्भवेन्नरः सुमांसलस्फिक्सुचितो मंडूकस्फिक्नराधिपः अर्ध
र्धस्फिक् नरो यस्तु व्याघ्रांतः सतु कीर्तितः ॥ ॥ अथ कटिजठरलक्षणमाह ॥ सिंहकटिर्मनुजेंद्रः कपिकरभकटिर्धनैः परित्यक्तः सम
जठराभोगभुजा घटपिठरनिभाश्चरानिःस्वाः ॥ सिंहसदृशी कटिर्यस्य स मनुजेंद्रो राजा भवति कपिः वानरः करभः उष्ट्रः कपिकरभसदृशाः कटिः
धनैः वित्तैः परित्यक्तो वर्जितः समजठरो यस्य स मनुजेंद्रो राजा भवति। समजठराः कल्याः दरान निंनोन्नत जठरं उदरं येषां भोगभुजा भोगिनः घटः कुंभः पिठि

२४३ रोमांडविशेषः तन्निम्नमुदरंयेषांतेनिस्वानिर्धनाः ॥ तथाच ॥ सिंहतुल्याकटिर्यस्यसनरेंद्रोनसंशयः ॥ सृगालखरोष्ट्राणांतुल्यायस्यसनिर्धनः समोदराभोग
युताविषमानिर्धनाः स्मृताः ॥ अथपार्श्वकक्षोदरलक्षणमाह ॥ अविकलपार्श्वाधनिनः निम्नैर्वक्रैश्चभोगसंत्यक्तः समकक्ष्याभोगाढ्यानिम्नाभिः
भोगसंत्यक्ताः ॥ उन्नतकक्ष्याक्षितिपाः कठिनाःस्युर्मानवाविषमकक्ष्याः सर्पोदरादरिद्राभवंतिबह्वाशिनश्चैव ॥ कक्षाउपरिचतुरंगुलोभागः पार्श्व
शब्देवाच्यः अविकलेपरिपूर्णेसमांसलेपार्श्वेयेषांतेधनिनईश्वराः निम्नैः पार्श्वैः वक्रैश्चदीर्घैः भोगसंत्यक्ताभोगरहिताकक्ष्याशब्देनोदरमध्यभागः
उच्यते। समातुल्याकक्ष्यायेषांतेभोगयुक्ताः निम्नाभिः कक्ष्याभिर्भोगसंत्यक्ताभोगरहिताभवंति। उन्नताउच्चाकक्ष्यायेषांतेक्षितिपाः राजानः विषमाः
अतुल्याकक्ष्याः येषांतेमानवाः पुरुषाः कठिनाःस्युर्भवेयुः सर्पस्यइवश्याममतिदीर्घमुदरंयेषांतेदरिद्राः निर्धनः बह्वाशिनः प्रभूताहाराभवंति ॥ तथाच ॥
पुष्टैःसुमांसोपचितैर्धनिनोमानवाः स्मृताः निम्नैर्वक्रैश्चविषमैर्नरोभोगविवर्जिताः समकक्ष्याभोगयुक्तोनिम्नाभिर्भोगवर्जितः नृपाश्चोन्नतकक्ष्याःस्युः
विषमाभिर्दुराशयाः सर्पोदरानराःनिःस्वाः स्मृताबह्वाशिनस्तथेति ॥ ॥ अथनाभिलक्षणमाह ॥ ॥ परिमंडलोन्नताभिर्विस्तीर्णाभिश्चनाभिभिः
सुखिनः अल्पाव्यक्ताचनिम्नानाभिःक्लेशावहाभवति ॥ वलिमध्यगताविषमाशूलाबाधांकरोतिनैःस्व्यंच। शाठ्यंवामावर्ताकरोतिमेधांप्रदक्षिणतः ॥
पार्श्वायुताचिरायुषमुपरिष्टाच्चेश्वरंगवाढ्यमधः शतपत्रकर्णिकाभानाभिर्मनुजेश्वरंकुरुते ॥ परिमंडलाभिः परिवर्तुलाभिः उन्नताभिरुच्चाभिर्विस्ती
र्णाभिः पृथुलाभिर्नाभिभिः सुखिनोभवंति। अल्पाःसांगुलाअलक्ष्यानिम्नाअगंभीरानाभिर्विस्तीर्णानाभिर्क्लेशावहाक्लेशप्रदाभवति। वलिमध्यगतेति
वलीमध्येयस्यांनाभ्यांगतातथाविषमाअतुल्याशीलाबाधांकरोति शूलोद्भिन्नतनोस्तस्यदृष्टपुर्भवति नैःस्व्यंनिर्धनत्वंचकरोति। वामावर्त्तानाभिःशाठ्यं २४३
शठभावंकरोतिशठः परकार्यविमुखः ॥ तथाच ॥ वचसामनसायश्चदृश्यतेकार्यतत्परः कर्मणाविपरीतश्चसशठः सद्भिरिष्यते ॥ प्रदक्षिणतः प्रदक्षि
णावर्तः मेधांबुद्धिंकरोति शोभनाधीर्भवति अत्रगुणयुक्ताबुद्धिर्विवक्षिता ॥ तथाच ॥ शुश्रूषाश्रवणंचैवग्रहणंधारणंतथा। ऊहापोहार्थविज्ञानंत
त्त्वज्ञानंचधीगुणाः ॥ पार्श्वयोरायताविस्तीर्णाचिरायुषंचिरजीविनंकुरुते। उपरिष्टादायताचेश्वरंसमृद्धम् अधआयतागोधनाढ्यं गोबहुलं। शतपत्रंपद्मं

तस्यकर्णिकामध्यभागस्तदाभस्तत्सदृशीनाभिर्मध्योन्नतामध्येंऽतः पद्मकर्णिकाकारउच्चभागोभवतिसामनुजेश्वरंराजानंकुरुते॥ वर्तुलाविपुलातुच्छाना
भिर्यदिनरेश्वरः अल्पादृश्यातथानिम्नानाभिः क्लेशावहाभवेत्॥ वलिमध्यगतायाचसाशूलवधकारिणी, वामावर्ताशाठ्यमेवंधिषणांचप्रदक्षिणा,
पार्श्वायतादीर्घजीवंधनयुक्तातथोर्ध्वगा। अधोगाबहुलंकुर्यान्नाभिर्भोगसमन्वितम् पद्मस्यकर्णिकातुल्यानाभिःकुर्यान्नरेश्वरम् ॥ ॥ अथोदरवर्तिनीनां
वलीनांलक्षणमाह ॥ शस्त्रांतंस्त्रीभोगिनमाचार्यंबहुसुतंयथासंख्यम् एकद्वित्रिचतुर्भिर्वलिभिर्विद्यान्नृपत्ववलिम् ॥ विषमवलयामनुष्याभवंत्य
गम्याभिगामिनः पापाः ऋजुवलयः सुखभाजः परदाराद्वेषिणश्चैव ॥ शस्त्रांतमिति॥ एकावलिर्यस्योदरेभवतिसशस्त्रांतः शस्त्रेणम्रियते। द्वाभ्यां
स्त्रीभोगिनंस्त्रीबहुलम् त्रिभिराचार्यमुपदेशकारिणम् चतुर्भिः बहुसुतंप्रभूतपुत्रंअवलिंवलिरहितंनृपराजानम् विद्याज्जानीयात् येमनुष्याः पुरुषा
विषमवलयः समवलयःकाचिद्दीर्घाकाचिद्ध्रस्वाः येषांते अगम्याभिगामिनः अगम्यगमनशीलाः पापाश्चभवंति॥ येचऋजुवलयःस्पष्टवलयःते
सुखभाजःसुखितः परदारद्वेषिणः परस्त्रीद्वेषशीलावैरिणोभवंति॥ तथाच॥ एकावलिःशस्त्रहतस्त्रीभोगीद्विवलिःस्मृतः त्रिभिराचार्यइत्याहुश्च
तुर्भिः स्याद्बहुप्रजः अवलिस्तुनृपः प्रोक्तोयज्वादानैकतत्परः विषमोवलयोयेषुतेचागम्याभिगामिनः ऋज्वास्तुवलयायेषुतेनराः सुखभागिनः॥ ॥
अथपार्श्वलक्षणमाह ॥ मांसलमृदुभिःपार्श्वैःप्रदक्षिणावर्तरोमभिर्भूपाः विपरीतैर्निर्द्रव्याः सुखपरिहीनाःपरप्रेष्याः ॥ कटेरुपरिचलसंगु
लोभागः पार्श्वशब्दवाच्यः पार्श्वैर्मांसलैर्घनैः मृदुभिः कोमलैः प्रदक्षिणावर्तरोमभिः प्रदक्षिणावर्तैर्नरोमाणियेषांतथाऽस्तेभूपाराजानोभवंतिविपरी
तैरमांसलैर्दृढैर्वामावर्तैरोमभिः निर्द्रव्यानिर्धनाः सुखैःपरिहीनारहिताः पराणांप्रेष्यः कर्मकराश्चभवंति॥ तथाच॥ मांसलैर्मृदुभिःपार्श्वैर्दक्षि
णावर्तरोमभिः नराभूम्यधिकाज्ञेयाविपरीताःसुदुःखिताः ॥ ॥ अथचूचुकानांलक्षणमाह ॥ ॥ सुभगाभवंत्यनुद्बद्धचूचुकानिर्धनाविषमदी
र्घैःपीनोपचितनिमग्नैः क्षितिपतयःचूचुकैः सुखिनः ॥ चूचुकंस्तनाग्रम् अनुद्बद्धैरनूर्ध्वप्रेङ्कैः चूचुकैःसुभगाभवंति। विषमैरतुल्यैर्दी
र्घैश्चचूचुकैर्निर्धनादरिद्राभवंतिपीनैःकठिनैरुपचितैःसमांसलैर्निमग्नैरनुद्बद्धैश्चूचुकैःक्षितिपतयःराजानोभवंतितेचसुखिनःसुखभाजः॥ तथाच॥

२५५ चूचुकेश्चाप्यनुद्बद्धैः सुभगाः सुखभागिनः निर्धना विषमैर्दीर्घैर्मग्नैर्मांससंयुतैर्नृपाः ॥ अथ हृदयलक्षणमाह ॥ हृदयं समुन्नतं पृथुमवेपनं मांसलं च
नृपतीनाम् अधनानां विपरीतं खररोमचितं सिरालं च ॥ हृदयं समुन्नतमुच्चं पृथुं विस्तीर्णं अवेपनं सकंपनं मांसलं च नृपतीनां राज्ञां भवति विपरीतं विषमं
निम्नमवेपनं मांसलम् अधनानां दरिद्राणां भवति। तथा खररोमचितं दृढस्थूलरोमसंयुक्तं सिरालं सिरासंततं चाधनानामेवाचलं पृथुमुच्चं च नृपाणां
हृदयं स्मृतम् विपरीतं सिरालं च रोमशं दुःखभागिनाम् ॥ अथ वक्षोलक्षणमाह ॥ समवक्षसोऽर्थवंतः पीनैः शूराश्च किंचनास्तनुभिः।
विषमं वक्षो येषां ते निःस्वाः शस्त्रनिधनाश्च ॥ समं न निम्नं नात्युच्चं वक्षस्तरो येषां ते अर्थवंतो धनिनः पीनैर्मांसलैः कठिनैश्च वक्षोभिः शूरा भवंति।
तनुभिरल्पमांसैरकिंचनाः किंचित्कराः पुरुषकारहीना येषां वक्षो विषमं तुल्यं ते निःस्वा निर्धनाः शस्त्रनिधनाश्च शस्त्रमृत्यवो भवंति ॥ तथा च ॥
अर्थवान्समवक्षाः स्यात्पीनैः शूराधनाश्चिताः अल्पैश्चाकिंचनादीना विषमः शस्त्रमृत्यवः ॥ अथ जत्रुलक्षणमाह ॥ विषमैर्विषमो जत्रु
भिरर्थविहीनोऽस्थिसंधिपरिणद्धैः उन्नतजत्रुर्भोगी निम्नैर्निःस्वोऽर्थवान्पीनैः ॥ जत्रुः कक्षयोः संधिः विषमैरतुल्यैर्जत्रुभिः विषमः क्षुद्रो भवति
अस्थिसंधिपरिणद्धैः अस्थ्नां संधयः अस्थिसंधयः तैः परिणद्धैः बद्धैः अर्थविहीनो निर्धनो भवति। उन्नत उच्चजत्रुर्यस्य स भोगी भोगवान्भवति।
निम्नैर्जत्रुभिः निःस्वो दरिद्रो भवति। पीनैः पीवरैः जत्रुभिरर्थवान् धनी भवति॥ तथा च॥ जत्रुभिर्विषमैः क्षुद्राः दरिद्राः क्षुद्रसंधिभिः भोगी चोन्नत
जत्रुः स्यान्निम्नैर्निःस्वो यथाधनी ॥ अथ ग्रीवापृष्ठलक्षणमाह ॥ चिपिटग्रीवो निःस्वः शुष्का सिरा यस्य च ग्रीवा। महिषग्रीवः शूरः
शस्त्रान्तो वृषसमग्रीवः ॥ कंबुग्रीवो राजा प्रलंबकंठः प्रभक्षणो भवति। स्पष्टमथ समरोमशमर्थवतः सशुभदमतोन्यत् ॥ चिपिटा च २५५
पिटा यस्य पृष्ठा ग्रीवा यस्य स निःस्वो निर्धनो भवति। यस्य च शुष्का निर्मांससिरासंतता ग्रीवा भवति स निःस्व एव। महिषसदृशग्रीवः शूरो भवति।
वृषसमग्रीवो दांतस्तुल्यकंधरः शस्त्रान्तो भवति। शस्त्रेण म्रियते वलित्रयं ग्रीवायां यस्य भवति स कंबुग्रीवः॥ तथा चोक्तम्॥ वलित्रयाङ्कि
तग्रीवः कंबुग्रीवोऽभिधीयते इति यस्य कंबुग्रीवा स राजा भवति। प्रलंबकंठः प्रलंबकंठो यस्य स प्रभक्षणो भवति असंचयशीलः॥ तथा च ॥

ग्रीवा च वर्त्तुला यस्य स नरो धनवान्स्मृतः कंबुग्रीवा नरा ये तु राजानस्तेन संशयः दीर्घग्रीवा नरा ये तु ते पि दुःखस्य भागिनः बकग्रीवा नरा ये ते दांभि
काः पिशुनास्तथा। निर्वक्ता चिपिटग्रीवा शुष्कग्रीवस्तथैव च। अनुरक्तमहिषग्रीवाः शस्त्रांतोष्ट्रसकंधराः॥ दृष्टूभ मंसमस्फुटितं मरोमशं रोमभिर्वर्जितंमर्थ
वतां स धनानां भवति। अतोस्मादन्यदृसं रोमशमस्थुभदं निर्धनानां भवतीति॥ तथा च॥ स्निग्धं मांसलं दृष्टं समभग्नं चाथ लोमशम् सधनानां विपर्यस्तं
निर्धनानां प्रकीर्तितम् ॥ अथ कक्षालक्षणमाह ॥ अस्वेदनपीनोन्नतसुगंधसमरोमसंकुलाः कक्षाः। विज्ञातव्यो धनिनामतोन्यथार्थैर्वि
हीनानाम् ॥ बाहुमूलतलं कक्षाशब्देनोच्यते। कक्षाः अस्वेदनाः स्वेदरहिताः पीनाः समांसलाः उन्नता उच्चाः सुगंधाः शोभनगंधाः समाः तु
ल्या रोमसंकुला रोमभिर्युक्ताः धनिनामीश्वराणां विज्ञातव्या ज्ञेयाः अतोस्मादन्यथा विपरीतलक्षणाः सस्वेदनाः निर्मांसा निम्ना दुर्गंधा विष
मा रोमवर्जिता अर्थविहीनानां धनरहितानां भवति॥ तथा च। निःस्वेदमांसलाः कक्षाः सुगंधा रोमसंकुलाः धनिनां तु विज्ञानीयान्निर्धनाना
मतोन्यथा ॥ अथांसलक्षणमाह ॥ निर्मांसौ रोमचितौ भग्नावल्पौ च निर्धनस्यांसौ। विपुलावव्युच्छिन्नौ सुश्लिष्टौ सौख्यवीर्यवताम् ॥
अंसौ स्कंधौ निर्मांसौ मांसरहितौ रोमचितौ रोमभिर्व्याप्तौ भग्नौ स्फुटितावल्पौ अधनस्य दरिद्रस्य विपुलौ व्युच्छिन्नावभग्नौ सुश्लिष्टौ सुमांसलौ
सौख्यवीर्यवतां सुखिनां बलिनां च भवतः॥ तथा च॥ कदलीस्तंभसंकाशा अंसस्कंधाश्च ये नराः राजानस्ते विजानीयान्महाकोशा महाबलाः
निर्मांसलोमबहुला निर्धनस्य प्रकीर्तिताः ॥ अथ बाहुलक्षणमाह ॥ करिकरसदृशौ वृत्तावाजानुविलंबिनौ समौ पीनौ। बाहू
पृथिवीशानामधमानां रोमशौ ह्रस्वौ ॥ बाहू भुजौ करिकरसदृशौ गजहस्ततुल्यौ वृत्तौ परिवर्तुलावाजानुविलंबिनौ जानुसंप्रापिणौ स
मौ तुल्यौ पीनौ समांसलौ पृथिवीशानां राज्ञां विज्ञातव्यौ रोमशौ रोमयुक्तौ ह्रस्वौ अदीर्घौ अधनानां निर्धनानां विज्ञेयौ। उद्बद्धबाहुः अपि च
धवं धमवाप्नुयात् दीर्घबाहुर्भवेद्राजा समुद्र वचनं यथा। प्रलंबबाहुरैश्वर्यं प्राप्नुयाद्गुणसंयुतं। ह्रस्वबाहुर्भवेद्दासः परप्रेष्यकरस्तथा। वामावर्त
भुजा ये तु ये तु दीर्घभुजा नराः संपूर्णबाहवो ये तु राजानस्ते प्रकीर्तिताः ॥ ॥ इदानीं हस्तलक्षणमाह ॥ ॥ ॥ ॥ ॥

हस्तांगुल्यो दीर्घाश्चिरायुषामवलिताश्च सुभगानाम् मेधाविनां च सूक्ष्माः चिपिटाः परकर्मनिरतानाम् ॥ स्थूलाभिर्धनरहिता बहि-
र्नताभिश्च शस्त्रनिर्याणाः कपिसदृशकरा धनिनः व्याघ्रोपमपाणयः पापाः ॥ दीर्घाश्च सूक्ष्माः हस्तांगुल्यः करशाखाः चिरायुषां दीर्घजीविनां
भवंति। अवलिताश्च वेष्टिताः सुस्पष्टाः च सुभगानां सौभाग्ययुक्तानां भवंति। सूक्ष्माश्च स्थूला मेधाविनां बुद्धिमतां भवंति। अत्र केचिन्मेधा
बुद्धिमतो धनिनोपीछंति ॥ तथा चोक्तम् ॥ अतीतानुस्मृतिर्मेधा तत्कालग्राहिणी मतिः शुभाशुभविचारज्ञा प्रज्ञा धीरैरुदाहृता ॥ परक-
र्मनिरतानां परप्रेष्याणां चिपिटाश्चर्परा भवंति। स्थूलाभिरतिदृढाभिरंगुलीभिः धनरहिता निर्धना भवंति। बहिर्नताभिः बाह्योन्नताभिः
शस्त्रनिर्याणाः शस्त्रेण निर्याणं मरणं येषां कपिसदृशकरा वानरतुल्यहस्ता धनिन ईश्वरा भवंति। व्याघ्रोपमपाणयः व्याघ्रपाणितत्सदृश-
हस्ताः पापा भवंति ॥ ॥ अथ दशाह ॥ मणिबंधनैर्निगूढैर्दृढैश्च सुश्लिष्टसंधिभिर्नृपाः हीनैः हस्तछेदः श्लथैः सशब्दैश्च निर्द्रव्याः ॥
मणिबंधनशब्देन हस्तमूलमुच्यते। निगूढैरनुल्बणैर्मणिबंधनैः दृढैरशिथिलैः सुश्लिष्टसंधिभिः सुसंलग्नमर्मभिः भूपा राजानो भवंति॥
हीनैर्मणिबंधैः हस्तछेदो भवति। श्लथैः शिथिलैः सशब्दैः शब्दयुक्तैः निर्द्रव्या निर्धना भवंति ॥ अथ दशाह ॥ पितृवित्तेन विहीना
भवंति निम्नेन करतलेन। संवृतनिम्नैर्धनिनः प्रोत्तानकराश्च दातारः ॥ विषमैः विषमा निःस्वाश्च करतलैरक्तैः ईश्वरो लाक्षाभैः पीतैरगम्य-
वनिताभिगामिनो निर्धना रूक्षैः ॥ नराम्मनुष्या निम्नेन करतलेन हस्ततलेन पितृवित्तेन पैतृकेन धनेन विहीना रहिता भवंति। संवृतनिम्नैः
समपरिवर्तुलं कृत्वा निम्नैः धनिनः सधना भवंति। प्रोत्तानकराः उत्कर्षेणोत्तान उच्चः करो हस्तो येषां ते दातारो दानशीला भवंति। विषमैरसमैः
करतलैर्विषमाः क्रूराः निःस्वा निर्धनाश्च भवंति। लाक्षाभैरतिलोहितैः करतलैः ईश्वराः सधना भवंति। पीतैः हस्ततलैरगम्यानां वनितानां स्त्रीणां
अभिगामिनो गमनशीला भवंति रूक्षैः हस्ततलैः निर्धनाः दरिद्राः ॥ ॥ अथ दशाह ॥ तुषसदृशनखाः क्लीबाः चिपिटैः स्फुटितैश्च वि-
तसंत्यक्ताः कुनखविवर्णैः परतर्ककाः ताम्रैश्च भूपतयः ॥ तुषैः सदृशाः संकुलरेखान्विता ह्रस्वा नखा येषां ते क्लीबाः षंढा भवंति ॥

चिपिटैः चर्पटैः स्फुटितैर्भग्नैश्च वित्तसंत्यक्ताः धनरहिता भवंति। ऊनखैर्ऊनैस्तैर्नखैर्विवर्णैर्विगतवर्णैरपि परतर्ककाः परमुखप्रेक्षिणो भवंति। ताम्रैः ताम्रवर्णैश्च नखैश्च नृपतयः सेनाधिपाश्च भवंति ॥ अथ यदथाह ॥ अंगुष्ठयववैराढ्याः सुतवंतोंगुष्ठमूलजैश्च यवैः दीर्घांगुलिपर्वाणः सुभगा दीर्घायुषश्चैव ॥ यवो यवाकार एव अंगुष्ठमध्यगतैर्यवैराढ्याः धनिनो भवंति। अंगुष्ठमूलजातैः यैः सुतवंतः पुत्रवंतः दीर्घाण्यंगुलपर्वाणि येषां ते सुभगाः सौभाग्योपेताः दीर्घायुषः चिरजीविनाश्च भवंति ॥ अथ यदथाह ॥ स्निग्धा निम्ना रेखा धनिनां तद्व्ययेन निःस्वानाम् विरलांगुल्यो निःस्वा धनसंचयिनो घनांगुलयः ॥ स्निग्धा निर्मला निम्ना गंभीरा रेखाः करगता धनिनामीश्वराणां भवंति। तद्व्ययेन विपरीतेन चास्निग्धा अनिम्ना निःस्वानां निर्धनानां भवंति। विरला विश्लिष्टा अंगुल्यः करशाखा येषां ते निःस्वाः निर्धनाः घनांगुलयो धनसंचयिनः धनार्जनशीला भवंति। ॥ अथ यदथाह ॥ तिस्रो रेखा मणिबंधनोत्थिताः करतलोपगा नृपतेः। पीनयुगांकितपाणिः नित्यं सत्रप्रदो भवति ॥ वज्राकारा धनिनां विद्याभाजां च मीनपुच्छनिभाः शंखातपत्रशिविकागजाश्वपद्मोपमा नृपतेः ॥ कलशमृणालपताकांकुशोपगाभिर्भवंति निधिपालाः धामनिभाभिश्चाढ्याः स्वस्तिकरूपाभिरैश्वर्यम् ॥ चक्रासिपरशुतोमरशक्तिधनुःकुंतसन्निभा रेखा। कुर्वंति चमूनाथं यज्वानमुलूखलाकाराः ॥ मधुरध्वजकोष्ठागारसन्निभाभिर्महाधनोपेताः वेदीनिभेन चैवाग्निहोत्रिणः ब्रह्मतीर्थेन ॥ वापीदेवकुलाद्यैर्धर्मं कुर्वंति च त्रिकोणाभिः अंगुष्ठमूलरेखाः पुत्राः स्युर्दारिकाः स्त्रिदमाः ॥ रेखा प्रदेशिनिगताः शतायुषं कल्पनीयमूनाभिः छिन्नाभिः द्रुममतनं बहुरेखा रेखाविनो निःस्वाः ॥ ॥ तिस्रो रेखा इति। मणिबंधनोत्थितास्तिस्रो रेखाः करतलोपगाः करतले हस्ततले उपगाः प्राप्ता नृपतेः राज्ञो भवंति। मीनयुगेन मत्स्यद्वयेनांकितः चिह्नितः पाणिः हस्तो यस्य स नित्यं सर्वकालं सत्रप्रदो भवति मठकृद्भवतीत्यर्थः। वज्रं मध्यक्षामं उभयाग्रविस्तृतं तदाकाराः तत्सदृशाः करतले रेखा धनिनामीश्वराणां भवंति। मीनपुच्छनिभा मत्स्यपुच्छनिभाकारा विद्याभाजो भवंति विद्यावंतश्च ते भवंतीत्यर्थः। शंखः प्रसिद्धः आतपत्रं छत्रं शिविका पुष्पादिकं गजाः हस्ती अश्वस्तुरगः पद्मं कमलं येषामुपमास्तदाकारा नृपतेः राज्ञो भवंति। कलशः कुंभो मृणालं बिसं स्पष्टं मध्यान्मध्यात् यथियुक्तं पताका वैजयंती अंकुशः प्रसिद्धः एषामुपगाभिस्तदाका

राः तत्सदृशाः करतलरेखा धनिनामीश्वराणां भवंति। नृपतेः राज्ञो भवंति। कलशः कुंभो घटः मालं बिसं स्पष्टं मध्यात्मध्याद्ग्रंथियुक्तं पताका
वैजयंती अंकुशः प्रसिद्धः एषामुपगाभिस्तदाकाराभिर्लेखाभिर्निधिपालाः पालाः अथ स्थापनशीला भवंति। अतिधनिनश्च। धामनिभा
भिरज्वाकाराभिः चाप्याई श्वरा भवंति। स्वस्तिकः चिह्नविशेषः तद्रूपाभिस्तदाकाराभि रैश्वर्यं भवति। चक्रमायुधमस्तिः खड्गः परशुरायु
धविशेषः कुगरः तोमरः प्रसिद्धः शक्तिः प्रसिद्धा। धनुः चापं कुंताः आयुधविशेषः एषां सन्निभास्तदाकारा रेखाः करतलोपगाः चमूनाथं से
नापतिं कुर्वंति॥ उलूखलाकारा रेखा यज्वानां याज्ञिकं कुर्वंति। मकरो जलप्राणिध्वजश्चिह्नम्। विचित्र पदनिर्मितत्वाद्वै चित्र्यमुपास्यं भव
ति। पताकातः कोष्ठागारं प्रसिद्धमेव। एषां सन्निभाभिः सदृशाभिरेखाभिः महाधनोपेताः अतिधनिनः मणिबंधनस्योपरि बद्धस्तातीर्थमंगुष्ठमू
लेन च स तीर्थेन अंगुष्ठमूले तीर्थे वध्येनि भेन वध्यार्थं हितिना अमि होत्रिणो यजमाना भवंति। वापी प्रसिद्धा। चलरा आपुष्करिणी। देवकुलं देवप्रा
सादः आदिग्रहणात्सिंहासनरथश्चीहृष्टधूपाष्टसंते ते धर्मं कुर्वंति धर्मिष्ठा भवंति। त्रिकोणाभिः च आभिः शृंगाटकाकाराभिः च शब्दात्स्व
र्ममेव कुर्वंति। अंगुष्ठमूले याव त्यो रेखाः तान्यपत्यानि तासां याः दीर्घ दीर्घ पुत्राः सुताः याः च सूक्ष्माः तादारिकाः दुहितरः प्रदेशिनी अंगुष्ठा
नंतरा बहुवचननिर्देशात् तिस्रो रेखा अवज्ञा तथाः। न प्रदेशिनिगताः तत्प्राप्ताः रेखाः शतायुषं शतजीविनां भवंति। रेखाभिः कुनाभिः स्वबु
ध्या कल्पनीयम्। यथा हस्तमध्यप्राप्ताभिः पंचाशत् अन्यत्रानुमतादायुषः परिकल्पना कार्या। रेखाभिः छिन्नाभिर्मध्यादि छिन्नाभिर्द्रुमापतनं
वृक्षापतनं भवति बह्व्यो रेखा येषां ते बहुरेखा न विद्यंते रेखा येषां ते अरेखिनः बहुरेखा अरेखिनश्च निस्वा निर्धना भवंति॥ तथा च॥ सुवर्तुलैः
नियूढैश्च मणिबंधैः समन्विता। हढैश्च शब्दरहितैः राजानास्ते प्रकीर्तिताः हीनैश्च छिन्नपाणिः स्यात् श्लथैर्दारिद्र्यभाजनाः निम्नेकरतले यस्यापि
त्र्यवित्तविवर्जिताः निम्नेन संवृते नैव वित्तवान्सोऽथ संयुताः ससुतानकाप्येचदातारस्तेन संशयः विषमैर्विषमानिः स्वालाक्षाभैरीश्वराः करैः।
अगम्यगामिनः पीतैर्नरवैःस्तैश्च निर्धनाः सूर्पश्च कोलुषनरवा नैकवर्णाम्लानरवाः स्फुटितार्धनरवाश्चैव सुताद्भ्य विवजिताः निर्मलैः लो
हिताभैश्च नरवैर्भवति पार्थिवः पांडुरा विरलाद्रुका अंगुल्याः करसंस्थिताः येषां ते च न राज्ञेयादुः खदारिद्र्यभाजनाः यस्य मीनसमा रेखा कर्मसिद्धिः

लतस्यवै। धनवान्सविज्ञेयः बहुपुत्रश्चमानवः तुला यस्यतलेवेदिर्वा करमध्ये प्रदृश्यते। वाणिज्यं सिद्ध्यतेतस्य उत्पन्नस्यनसंशयः वेदीपाणितलेय
स्यद्विजस्यतुविशेषतः शक्तितोमरखड्गाभारेखाः चापसमास्तथा। यस्यहस्तेप्रदृश्यंते चक्रनाथं वदंतिहि ॥ छत्रंवाप्यथवाशैलं करमध्येतुदृश्यते।
अचलं प्राप्यतेराज्यं मंडलेतुनसंशयः ध्वजंवाप्यथवाशंखं दृश्यतेकरसंस्थितं। धनेशंतंविजानीयात्समुद्रवचनंयथा। दक्षिणेतुकरांगुष्ठेयवो
यस्यप्रदृश्यते। सर्वविद्याप्रवक्तासौभवतीतिविनिर्दिशेत् यस्यपाणितलेरेखाः कनिष्ठामूलसंभवाः गतामध्येप्रदेशिन्यांसजीवेच्छरदांशतम् अं
गुष्ठमूलेयारेखाः पुत्रास्तेपरिकीर्तिताः सूक्ष्माकन्याविनिर्दिष्टाः समुद्रवचनंयथा। छिन्नाभिर्दृष्टिपतनं सूक्ष्माभिरनीश्वराः अंगुष्ठमूलतीर्थेन
यज्ञवाजीभवेन्नरः ॥ ॥ अथचिबुकाधरदशनानांलक्षणमाह ॥ ॥ अतिकृशादीर्घेश्चिबुकेनिर्द्रव्यामांसलैर्धनोपेता। बिंबोपमैरख
ण्डैरधरैर्नृपास्तनुभिरस्वाः ॥ ओष्ठैः स्फुटितविखंडितविवर्णरूक्षैश्चधनपरित्यक्ताः स्निग्धाघनाश्चदशनाः सुतीक्ष्णदंष्ट्राःसमाश्च शुभाः ॥
चिबुकमधरस्याधोभागोमुखांतं अतिकृशैर्निर्मांसैरतिदीर्घैश्चचिबुकैर्निर्द्रव्यादरिद्राभवंति। मांसलैः चिबुकैः धनोपेताः सधनाः अधरैरो
ष्ठैः बिंबोपमैरतिलोहितैरखण्डैः स्पष्टैः भूपाराजानोभवंति। तनुभिरमांसलैरधरैरस्वानिर्धनाभवंति। ओष्ठैरुत्तरैः स्फुटितैः भग्नैः विखंडितैः द
लितैः विवर्णैः विगतवर्णैः रूक्षैः निस्तेजस्कैश्च धनपरित्यक्तादरिद्राभवंति। दशनाः दंताः स्निग्धानिर्मलाघनाः चसंहताः सुतीक्ष्णादंष्ट्राः सुतीक्ष्णा
दंष्ट्रायेषांसमाः चसर्वेतुल्याः शुभाः मध्यभागवर्तिनोदंतचतुष्टयस्यपार्श्ववर्तिनीदंष्ट्रे ॥ तथाच ॥ निर्मांसैः चिबुकैर्दीर्घैर्निर्द्रव्याश्चाधवाचि
नः समांसलैर्धनोपेताबहुपुत्रसमावृताः रक्ताधरोनरपतिः धनवान्कमलाधरः स्थूलोष्ठाबहुलोमाचशुष्कैः क्षीणैश्चदुःखिताः उन्नतैरोष्ठैर्लो
हितैश्चधनिनः सौख्यसंयुताः खंडैर्विवर्णैर्निर्द्रव्याःरूक्षैर्दुःखसमन्विताः कुंदकुड्मलसंकाशैः प्राकारैर्दशनैर्नृपः अदक्षवानरदंताश्चनित्यं
क्षुत्परिपीडितः हस्तिदंताः खररदाः स्निग्धदंतागुणान्विताः करालैर्विषमैर्दीर्घैः दशनैर्दुःखजीविनः द्वात्रिंशद्दंताराजानश्चैकोनोश्चाथभोग
वान् त्रिंशद्दंतानराश्चैतेसुखदुःखस्यभागिनः एकोनत्रिंशद्दशनाः पुरुषाः दुःखजीविनः अष्टाविंशद्दशायेषांतेतिदुःखस्यभाजनाः ॥ ॥ ॥ ॥

अथ जिह्वाताल्वोर्लक्षणमाह ॥ जिह्वा रक्ता दीर्घा श्लक्ष्णा सुसमा च भोगिनो ज्ञेयाः श्वेता कृष्णा परुषा निर्द्धनानां तथा तालुः ॥ जिह्वा र-
सना रक्ता लोहितवर्णा दीर्घा आयामिनी श्लक्ष्णा तनुरायामस्तु यस्य शोभना समा चतुरस्रा भोगिनां ज्ञेया ज्ञातव्याः श्वेता पाण्डुरा कृष्णा सुसिता निर्द्धनानां
दरिद्राणां भवति। तथा तालुः तथानेनैव प्रकारेण तालु ज्ञेया यथा जिह्वा रक्ता श्लक्ष्णा सुसमा च शोभना तथा तालुरपि शोभना श्वेता कृष्णापि
परुषा तालुरप्यशोभना ॥ तथा च ॥ कृष्णा जिह्वा भवेद्यस्य समला यदि वा भवेत् न पापवान्भवेन्मर्त्यः ऊरुः स्थूला यथा भवेत् श्वेत जिह्वा नरा ज्ञे-
याः शौचाचारविवर्जिताः पद्मपत्रसमा जिह्वा सूक्ष्मा दीर्घा सुशोभना। नस्थूला नातिविस्तीर्णा येषां ते मनुजाधिपाः निम्ना दीर्घा च ह्रस्वा च रक्ता असम-
नायदि। सर्वविद्याप्रवक्ता सौ भवेन्नास्त्यत्र संशयः कृष्णतालुर्नरो यस्तु स भवेत्कुलनाशनः विकृतः स्फुटितो यस्य तालुस्तस्य न शोभनः सिंहतालुः
नरपतिर्गजतालुस्तथैव च। पद्मतालुर्भवेद्राजा श्वेततालुश्च निर्धनः ॥ अथास्यलक्षणमाह ॥ वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समं च भू-
पानाम् विपरीतं क्लेशभुजां महामुखं दुर्भगानां च ॥ वक्त्रं मुखं सौम्यमनाकुलं संवृतं परिवर्तुलं अविकासितममलं निर्मलं श्लक्ष्णम् नाति-
मांसलं स्तु पार्श्वसमं तुल्यं भूपानां राज्ञां ज्ञेयम् विपरीतं यस्तल्लक्षणमसौम्यमसंवृतमनिर्मलमश्लक्ष्णमसमं क्लेशभुजां दरिद्राणां ज्ञेयम्। महामुख-
मतिविस्तीर्णमास्यं दुर्भगानां भवति॥ तथा च॥ सौम्यं च संवृतं वक्त्रममलं यस्य देहिनः स तु राजा भवेन्नित्यं विपरीते तु निर्धनः ॥ ॥ अथ मुखल-
क्षणमाह ॥ स्त्रीमुखमनपत्यानां शाठ्यवतां मंडलं परिज्ञेयम् दीर्घं निर्द्धनानां भीरुमुखं च पापकर्मणां ॥ चतुरस्रं धूर्तानां निम्नं वक्त्रं च तन-
यरहितानाम् कृपणानामतिह्रस्वं संपूर्णं भोगिनां कान्तम् ॥ स्त्रीसदृशं मुखं वदनं अनपत्यानामपत्यरहितानामपुत्राणां भवति। मंडलं मंड-
लाकारं परिवर्तुलं शाठ्यवतो शठभावसंयुक्तानां परिज्ञेयम् ज्ञातव्यम् शठः परकार्यविमुखः दीर्घमुखं निर्द्धनानां दरिद्राणां भवति भीरुमुखं
भीतस्येव मुखं येषां ते पापकर्मणः पापानुरता भवंति। चतुरस्रं चतुष्कोणं मुखं निर्द्धनानां दरिद्राणां भवति। चतुरस्रं चतुष्कोणं मुखं धूर्तानां पर-
वंचनरतानां भवति। निम्नं हीनं वक्त्रं मस्पष्टं च तनयरहितानामपुत्राणां भवति। अतिह्रस्वमत्यल्पं कृपणानां भवति कृपणोर्थलुब्धस्तो कार्थश्चसं।

पूर्णसमांसलंकांतंदीप्तिमद्भोगिनांभोगवतांचभवति॥ तथाच॥ स्त्रीमुखंचनिरपत्यानांमंडलंशाठ्यसेविनां। दीर्घमुखंचवित्ताणांभीरुवक्त्राद्गुराश
याः चतुरस्रंलधूर्तानांनिम्नेसुतविवर्जिताः कृपणानांतथाह्रस्वंचिपिटंपरजीविनाम्। वन्मुखंमांसलंस्निग्धंसप्रभंप्रियदर्शनम्। वर्णाढ्यंसंधिवि
श्लिष्टंमजस्रंसुखभागिनम् ॥ ॥ अथश्मश्रुलक्षणमाह ॥ अस्फुटिताग्रंस्निग्धंश्मश्रुशुभंमृदुसन्नतंचैव। रक्तैःपरुषैःचौराःश्मश्रुभिर
ल्पैश्चविज्ञेयाः ॥ श्मश्रुकूर्चमस्फुटिताग्रंस्निग्धंश्मश्रुशुभंमृदुसन्नतंचैवरक्तैःपरुषैःचौराःश्मश्रुभिरल्पैश्चविज्ञेयाः ॥ श्मश्रुकूर्चंस्निग्धं
चादंष्ट्रंमृदुकोमलंसन्नतंसम्यङ्नतंशुभंप्रशस्तम्। केचिन्मृदुसन्नतेचैवेतिपठंति। रक्तैःलोहितैःपरुषैःखरैरल्पैश्चश्मश्रुभिःचौरास्तस्कराः
विज्ञेयाज्ञातव्याः॥ तथाच॥ स्निग्धमस्फुरिताग्रंचसन्नतंश्मश्रुचेष्यते। रक्तैरल्पैस्तथारूक्षैःश्मश्रुभिस्तस्कराःस्मृताः ॥ अथकर्णलक्षणा
माह ॥ निर्मांसैःकर्णैःपापमृत्यवःचर्पटैःसुबहुभोगाः कृपणाश्चह्रस्वकर्णाःशंकुश्रवणाश्चचमूपतयः ॥ रोमशकर्णादीर्घायुषःधनभागि
नोविपुलकर्णाःक्रूराःअतिकठिनःसिरावनद्धैर्व्यालंबैर्मांसलैःसुखिनःनिर्मांसैर्मांसरहितैःकर्णैःपापमृत्यवःपापेनकर्मणाम्रियंते। चर्पटैः
विकीर्णैःसुबहुभोगाअतिभोगिनोभवंति। ह्रस्वकर्णाअल्पश्रोत्राःकृपणाअदानशीलाभवंति। शंकुश्रवणाःतीक्ष्णाग्रकर्णाःचमूपतयःसे
नापतयोभवंति। विपुलकर्णाविस्तीर्णश्रोत्राधनभागिनोवित्तवंतःसिरावनद्धैःसिराबहुलैःकर्णैःक्रूराविषमाभवंति। व्यालंबैर्दीर्घैर्मांसलैश्चसु
खिनोभवंति॥ तथाच॥ ह्रस्वकर्णामहाभोगामहाकर्णाश्चयेनराः आवर्तकर्णाधनिनःस्निग्धकर्णास्तथैवच। दीर्घायुषःशंकुकर्णाःतुच्छक
र्णामहाधनाः सुखान्वितादीर्घकर्णालंबकर्णास्तपस्विनः निर्मांसैःपापमरणाश्चर्पटैर्भोगिनोनराः दीर्घायुषोलोमकर्णाधनिनोविपुलैःस्मृताः
सिरावनद्धैर्विषमामांसलैःसुखभागिनः ॥ ॥ अथगंडनासालक्षणमाह ॥ ॥ भोगीत्वनिम्नगंडोमंत्रीसंपूर्णमांसगंडोयःसुखभाक्
शुकसमनासश्छिन्नानुरूपयागम्यगामिनोदीर्घयाचसौभाग्यम् आकुंचितयाचौरःस्त्रीमृत्युःस्याच्चिपिटनासः धनिनोग्रवक्रनासाः दक्षिणा
विनताःप्रभक्षणाःक्रूराःऋज्वीस्वल्पच्छिद्रासुपुटानासाःसभाग्यानाम् ॥ भोगीति। अनिम्नातुच्छौगंडौसुखगंडौयस्यसभोगीभोगवान्भवति।

यस्य च संहृतौ मांसलौ गंडौ सम्मंत्रीसचिवो भवति। निम्नोन्नतौ गंडौ यस्य पुरुषस्य सैव भोगवान् स्मृतः। सुखभागिति। शुकः पक्षी शुकस्तमात
दाकारा नासा यस्याः ऽऽ कुंचितलोऽिततेति यावत् स सुखभाग्भवति। शुष्का निर्मांसा नासा यस्य स चिरजीवी दीर्घायुर्भवति। छिन्नेव या नासा दृश्यते।
सा छिन्नानुरूपा तया गम्यगामिनः गम्यगमनशीला भवंति दीर्घया नासया सौभाग्यं भवति। आकुंचितया स्पष्टया चौरस्तस्करो भवति। चिपिटनासः
चर्पटघ्राणः स्त्रीष्टस्पुः स्यात् भवेत् स्त्रीतस्य मारयतीत्यर्थः। अग्रवक्रा प्रांतकुटिला नासा येषां ते धनिनो वित्ताढ्यिता दक्षिणभागे विनतावक्रा नासा ये
षां ते प्रभक्षणा असंचयशीलाः क्रूरा विषमाश्च भवंति। ऋज्वी स्पष्टा स्वल्पछिद्रा अल्परंध्राः सुपुटाः शोभनपुटा सौभाग्यानां भागसंयुक्तानां
नासा भवति॥ तथा च। शुकनासः सौख्यभागी शुष्कनासाः चिरायुषः छिन्नानुरूपा येषां स्यान्नासा ते गम्यगामिनः दीर्घनासा भोगयुक्ता अग्रवक्रा
धनान्विताः क्रूरा दक्षिणवक्रा च स्पष्टनासा ह्युत्तमाः स्त्रीघ्नास्तु चर्पटाभिः कुटिलाभिश्च तस्कराः॥ ॥ अथ क्षुतलक्षणमाह॥ धनि
नां क्षुतं सकृद्द्वित्रिपिंडितं ह्लादिमानुनादं च दीर्घायुषां प्रमुक्तं विज्ञेयं संहृतं चैव॥ धनिनामीश्वराणां क्षुतं नामा शब्दितं सकृदेकवारं द्वित्रि
पिंडितं द्विगुणितं त्रिगुणितमेवं केचित्॥ अन्ये पुनरर्थं चक्रते॥ धनिनामीश्वराणां क्षुतं सकृदेकवारमेव भवति दीर्घायुषस्तु द्विरथ द्वित्रिपिं
डितमेकीकृतं ह्लादिसानुनादं प्रसक्तं संहृतं चेति दीर्घायुषश्चिरजीविनस्तेषां द्विपिंडितं द्विगुणितं त्रिपिंडितं त्रिगुणितं भवति तथा ह्लादि युगपद्बहू
नां जल्पतामुपकृत्य बोधिकं श्रूयते स निर्ह्लादी॥ तथा सानुनादं दूरादपि शनैः शनैरुच्चार्यमानः श्रुतिपथं याति सोऽनुनादे तथा प्रसक्तमतिदी
र्घं संहृतं चैवमनेन प्रकारेण विज्ञेयं ज्ञातव्यम् तत्रोदीरित आदिमध्यावसाने पुनरल्पोऽयः संहृतः क्रोधहर्षत्यादिभयादिषु विहृतः श्रोत्रपथं
याति यः सस्निग्धः यः सर्वजनमनोऽभिप्रेतः सरक्तः एतदेव व्याख्यानं शोभनम् यस्मात्पराशरः॥ ॥ अथ लोचनलक्षणमाह॥ ॥ पद्म
दलाभैर्धनिनः रक्तांतलोचनः श्रियो भाजः मधुपिंगलैर्महार्था मार्जारविलोचनाः पापाः॥ हरिणसमा मंडललोचना च जिह्मैश्चलोचनैश्चौ ॥ ॥
राः क्रूराः केकरनेत्रा गजसदृशविलोचनाश्च नृपतयः॥ ऐश्वर्यं गंभीरैर्नीलोत्पलकांतिभिश्च विद्वांसः अतिकृष्णतारकाणामक्ष्णामुत्पाटनं भवति॥ ॥

मेचिचंस्थूलदृश्यं श्यावाक्षाणांभवतिसौभाग्यम् दीनादृष्टिः स्वानांस्निग्धाविपुलार्थभोगवताम् ॥ पद्मदलाभैः कमलपत्रसदृशलोचनैः धनि
नोविद्यान्वितोभवति। रक्तांतविलोचनास्तेचश्रियोभाजः लक्ष्मीवंतः मधुपिंगलैर्मधुवत्कपिलवर्णैर्नयनैर्महार्थामहाधनाः मार्जारोबिडालः
तत्सदृशलोचनाः काचराराक्षसापापाभवंति। हरिणाक्षामृगलोचनास्तथामंडललोचनाः परिवर्तुलनेत्राजिह्मैः कुटिलैश्चलोचनैश्चोराः
तस्कराभवंति। केकरनेत्रानीलाक्षामृगलोचनास्तथामंडललोचनाः परिवर्तुलनेत्राः जिह्मैः करालाविषमाभवंति। गजसदृशविलोचनाहस्ति
तुल्यनेत्राश्चभूपतयः सेनापतयोभवंति, गंभीरैः नेत्रैरैश्वर्यंभवति। नीलोत्पलकांतिभिर्नेत्रैस्तत्सदृशतारकैः विद्वांसः पंडिताभवंति। अ
त्यंतकृष्णतारकाणांमनुष्याणांनेत्राणामुत्पाटनंभवति, अत्यसिततारकेअक्षिणीउत्पाद्यतेस्थूलतारकेस्थूलादृष्टिर्येषांतेस्थूलदृशस्तेषांमित्र
त्वंभवति। पत्नीभवतीत्यर्थः श्यावाक्षाणांश्यावत्वेमनुष्यमेअक्षिणीतारकौयेषांतेषांसौभाग्यंभवति। दीनादैन्यंगताद्दृष्टिर्येषांतेनिस्वा
निर्धनाभवंति। स्निग्धानिर्मलाविपुलाविस्तीर्णाचदृष्टिरर्थवतांभोगवतांचभवति॥ तथाच॥ समेगोक्षीरवर्णाभेरक्तांतेकृष्णतारके। घ्रस
नेत्रचविशालेचस्निग्धेचैवायतेशुभे। अतसीपुष्पसंकाशेभवेतांयस्यलोचने। भूपतिः सतुविज्ञेयोसख्यास्तेमध्यमाः स्मृताः नश्चित्यजातिसर्व
त्रपुरुषंमधुपिंगलम् आज्यपिंगलनेत्राश्चराजानोभोगसंयुताः रोचनाहरितालाश्चगजापिंगधनेश्वराः बलवंतोगुणोपेताः पृथिव्याः चक्रव
र्तिनः तप्तहाटकवर्णाभेभवेद्यास्यतुलोचने। भूपतिः सतुविज्ञेयः समुद्रवचनंयथा। द्विमात्रस्तांदिनायेतुधनिनस्तेप्रकीर्तिताः त्रिमात्राःस्प
दिनोज्ञेयाः पुरुषाःसुखजीविनः चतुर्मात्रनिमेषाश्चधनवान्परिकीर्तितः दीर्घायुषोधर्मरतापंचमात्रनिमेषिणः॥ ॥ अथभ्रूलक्षणा
माह॥ ॥ अत्युन्नताभिरल्पायुषोविरलोन्नताभिरतिसुखिनः विषमभ्रुवोदरिद्राबालेंदुनतभ्रुवः सधनाः॥ दीर्घासंयुक्ताभिः
धनिनः खंडैभिरर्थपरिहीनः मध्यविनतभ्रुवोयेतेसक्ताः स्त्रीष्वगम्यासु ॥ अत्युन्नताभिराभिमुख्येनोच्चाभिरल्पायुषः स्वल्पजी
विनोभवंतिविशालाविस्तीर्णाभिरुन्नताभिरुच्चाभिः चक्षुर्भिरतिसुखिनोभवंतियेसर्वस्यविषमभ्रुवः लम्बभ्रुवः तदरिद्रानिर्धनाभवंति। बालेंदु

सदृशाबालचंद्रतुल्यानतेभ्रुवौयेषांतेसधनाः दीर्घाश्चताअसंसक्तादीर्घसंसक्तास्ताभिर्दीर्घसंसक्ताभिर्भ्रूभिर्धनिनोभवंति। खंडाभिरर्थपरिहीना
दरिद्राभवंतियेमनुष्यामध्यविनतभ्रुवोमध्याद्विनताअस्पष्टाभ्रुवौयेषांतेअगम्यासुस्त्रीषुसक्तानिरताभवंति॥ तथाच॥ अत्युन्नताभिःस्वल्या
सुविशालाभिः सुखान्वितः मध्योन्नतभ्रुवौयेचपापसक्ताश्चतेनराः बालेंदुभ्रूसमाश्चाढ्यादरिद्राविषमभ्रुवः असंलग्नभ्रुवौयेतुधनिनास्तेनराः
स्मृताः खंडाभिर्निर्धनाज्ञेयाविषमाभिर्नराधमाः॥ ॥ अथशंखललाटलक्षणमाह॥ उन्नतविपुलैः शंखैः धनिनः सुतार्थसंपन्नाः
विषमललाटाधनिनोधनवंतोर्धेंदुसदृशेन॥ शुक्तिविशालैराचार्यतासिरासंततैरधर्मरताः उन्नतसिराभिराढ्याः स्वस्तिकवत्संस्थिता
भिश्च॥ निम्नललाटावधबंधभागिनः क्रूरकर्मनिरताश्च। अत्युन्नतेश्चनृपाः कृपणाः स्युः संकटललाटाः॥ उन्नतैरुच्चैर्विपुलैः
विस्तीर्णैः शंखैर्धनिनर्दीश्वराभवंति। निम्नैरनुच्चैः शंखैः सुतैः पुत्रैरर्थधनैः संत्यक्तारहिताभवंति॥ तथाच॥ उन्नतैर्विपुलैः शंखैः
धनिनः सुखजीविनः सुतार्थरहितानिम्नैर्मनिवादुःखभागिनः॥ विषममसमंललाटंमुखपृष्ठंयेषांतेनिधनादरिद्राः बालेंदुसदृशैरर्धचंद्र
तुल्येनललाटेनधनवंतईश्वराभवंति। शुक्तिविशालैः शुक्तिविस्तीर्णैर्ललाटैराचार्यता आचार्यत्वंभवति परोपदेशकत्वदाचार्यः सिरासंततैः
सिराबहुलैर्ललाटैरधर्मताभवंति। उन्नताभिःसिराभिः ललाटगताभिराढ्याईश्वराभवंतिस्वस्तिकवत्स्वस्तिकाकारेणसंस्थिताभिःसिराभिः
चाढ्याभवंति। निम्नंललाटंयेषांतेनिम्नललाटावधेऽहननेबंधनेचभागिनोयोग्याः क्रूरविषमेचकर्मणिकार्येनिरताः सक्ताभवंति। अत्युन्न
तेराभिमुख्येनोन्नतैर्ललाटैः चनृपाः सेनापतयोभवंति। संकटंपरिवर्तुलमल्पंचललाटंयेषांतेकृपणाअदानशीलाः स्युः भवेयुः॥ ल
लाटेनार्धचंद्राभवंति पृथिवीश्वराः विपुलेनललाटेनमहाधनयुतास्मृताः। तथाच। विषमेनाधमाज्ञेयापापामर्त्याः सिराततैः निम्ने
नतुललाटेनक्रूरकर्मरतानराः अत्युन्नतैश्चनृपाः स्युः संकटैःकृपणाःस्मृताः॥ ॥ अथरुदितलक्षणमाह॥ रुदितमदीनमनस्तुस्निग्धं
चसुभावरुन्मनुष्याणाम् रुक्षंदीनंप्रचुरास्त्रुवैवनशुभप्रदंपुंसाम्॥ यत्रुदितमदीनंधैर्यसहितंअश्रुवाष्परहितम् स्निग्धमरुक्षं

एवंविधंमनुष्याणांपुरुषाणांशुभावहम् प्रशस्तंन दृष्टंपुरुषंदीनंदैन्ययुक्तंप्रचुरास्रुबहुबाष्पंयुक्तंनराणांनशुभदं॥ तथाच॥ अदीनमस्रुसहितंक्लि
ष्टंचरुदितंशुभम् न दृष्टंदीनंबाष्पयुतंपुरुषाणामनिष्टदम् ॥ अथहसितलक्षणमाह ॥ हसितंशुभदमकंपंस्तुनिमीलितलोचनंतुपापस्य।
दुष्टस्यहसितमसकृत्सोन्मादस्यासकृत्प्रांते ॥ यच्चहसितमकंपंकंपरहितंतत्शुभदंप्रशस्तम् शरीरस्यकंपस्खलनमवयवानांयेननोत्पद्य
तेस्तुनिमीलितलोचनमतिसंकुचितनयनंहसितंपापस्यपापकर्मणः असकृत् पुनः पुनः दुष्टस्यसदोषस्यहसितंप्रांतेऽवसानांतेऽसकृत्हसितंसो
न्मादस्योन्मादयुक्तस्यभवति॥ तथाच॥ हसितंकंपरहितंनृपाणामन्यथाशुभम् असकृद्दोषयुक्तस्यमीलिताक्षस्यचाशुभम् ॥ ॥ ॥ अथ
ललाटरेखानांलक्षणमाह॥ ॥ तिस्रोरेखाःशतजीविनांललाटायतास्थितायदितः चतसृभिरवनीपात्वंनवतिश्चायुःसपंचाद्वा ॥ विछिन्ना
भिःचागम्यगामिनः नवतिरप्यरेखेनःकेशांतोपगताभिरेखाभिरशीतिवर्षाभिः ॥ पंचभिरायुःसप्तभिरेखाग्रावस्थिताभिरपिषष्टिःबहु
रेखेनशतार्धंचत्वारिंशच्चवक्राभिः भ्रूलग्नाभिःत्रिंशद्विंशतिवामभागवक्राभिः क्षुद्राभिःस्वल्पायुर्भ्रूनाभिःचांतरेकल्प्यम् ॥ तिस्रोरे
खाइति॥ ललाटेमुखपृष्ठेआयतादीर्घास्थिताःतिस्रोरेखाःशतजीविनांशतायुषांभवंति। चतसृभिः ललाटायतरेखाभिरवनीश्वरत्वं
राज्यंभवंति। विछिन्नाभिर्छेदयुक्ताभिर्ललाटरेखाभिरगम्यगामिनोऽगम्यगमनशीलाभवंति। नवतिःचवर्षाणांतेषामायुः अरेखेनरेखाव
र्जितेनललाटेननवतिरपिवर्षाणामायुः॥ अपिशब्दोऽत्रचार्थे॥ अगम्यगामिनोभवंति। केशांतोयतः प्रभृतिभिःकेशानामुत्पत्तिः केशांतोप
गताभिस्तत्रप्राप्ताभिर्लेखाभिरशीतिवर्षाणामायुर्भवति। पंचभिर्लेखाभिर्ललाटस्थिताभिःसप्ततिर्वर्षाणामायुःबहुरेखेनषड्भिः लेखाभिः
उपलक्षितेनशतार्धंपंचाशद्वर्षाणामायुः रेखाभिःभ्रूलग्नाभिस्त्रिंशद्वर्षाणिवामभागवक्राभिः कुटिलाभिः विंशतिकः विंशतिवर्षाणांजी
वितपरिमाणंयस्यसविंशतिकःक्षुद्राभिःस्वल्पाभिरल्पायुर्विंशतिन्न्यूनमायुःउक्तान्न्यूनाभिरेखाभिर्द्वाभ्यामेकयावाचशब्दात्स्वल्पायुरेव ॥
अंतरमध्येकल्प्यंकल्पनीयम् स्वबुध्याऊह्यम् तथातिस्रोरेखाःशतजीविनामिति चतसृभिर्नवतिश्चायुषःसपंचाद्वइत्युक्तमत्रांतरसार्धास्तिस्रःरेखा

यस्यतस्यसप्तनवतिवर्षाण्यायुरित्याद्यंतरेकल्पनीयम्॥ तथाच॥ रेखाःपंचललाटेतुयस्यासौधवनःस्मृताःशतंजीवतिवर्षाणामैश्वर्यम
धिगच्छति। चतस्रश्रेखोस्यशीतिस्तुत्रिभिःसप्तभिरेववा। षष्टिर्द्वाभ्यांतुरेखाभ्यांचत्वारिंशत्तथैकया। अरेखेनललाटेनभवंतिनिधिपालकाः
रेखाछेदैस्तुविज्ञेयाःपापकर्मरताःनराः अल्पायुषस्तथाल्पायुर्व्याधियुक्ताश्चतेसदा। त्रिशूलंपट्टिसंवापिललाटेयस्यदृश्यते। ऐश्वर्यंत
स्यविज्ञेयंसेनानांनायकश्चसः॥ ॥ अथशिरोलक्षणमाह॥ परिमंडलैर्गवाढ्याश्छत्राकारैःशिरोभिरवनीशाःचिपिटैःपितृ
मातृघ्नाःकरोटिशिरसांचिरान्मृत्युः॥ घटमूर्धाध्वानरुचिर्द्विमस्तकःपापकृद्धनैस्त्यक्तः निम्नंतुशिरोमहतांबहुनिम्नमनर्थदंभवति॥
परिमंडलैःपरिवर्तुलैःशिरोभिःमस्तकैःगवाढ्यागोबहुलाभवंति। छत्राकारैःछत्राकृतिभिःऊर्ध्वभागविस्तृतैरवनीशाराजानःचिपिटैः
चर्पटैःपितृमातृघ्नाःपितृमातृहंतारःकरोटिशिरसांनराणाम् करोटिसदृशशिरसांचिरात्बहुकालेनमृत्युर्भवतिचिरायुषस्तेभवंतीत्य
र्थः घटमूर्धाउंभसदृशशिराअध्वानरुचिराध्वशीलोभवति। द्विमस्तकोद्विशीर्षःपापकृत्पापकर्तापधनैस्त्यक्तोनिर्धनोभवतिमहतांप्रधाना
नामेवनिम्नंतुशिरोभवति। बहुनिम्नंअतिनिम्नंशिरोनर्थदंदुःखदंभवति॥ तथाच॥ उत्क्रांतिदोनिम्नशिरअल्पोपकृतएववा। छत्राकार
लक्षणमाह॥ ॥ एकैकभवैःस्निग्धैःकृशैरकुंचितैरभिन्नाग्रैः। मृदुभिर्नातिबहुभिःकेशैःसुखभाङ्नरेंद्रोवा॥ बहुमूलविष
मकापिलास्थूलस्फुटिताग्रपरुषह्रस्वाश्च। अतिकुटिलाश्चातिघनाश्चमूर्धजावित्तविहीनानाम्॥ केशैरेकैकभवैरेकस्मिन्रोम
कूपेभवंत्येकैकभवाःतैःतथाभूतैःस्निग्धैरदृढैःकृशैरसितैरकुंचितैःअटिलैरभिन्नाग्रैरस्फुटितप्रांतैःमृदुभिःकोमलैःनचातिबहुभिः
घनैःएवंविधैःकेशैःसुखभाक्सुखितोभवति। नरेंद्रोवाराजाभवति। बहुमूलाएकैकस्मिन्रोमकूपेबहूनांसंभवात् विषमाअसमाःकेचित्
ह्रस्वाःकेचिद्दीर्घाःकपिलाःकपिलवर्णाःस्थूलाःअसूक्ष्माःस्फुटिताग्राभिन्नप्रांताःपरुषाःदृढाःह्रस्वाःदीर्घाःअतिकुटिलाःअतिकुंचिताः।

अतिघनाः संतताः मूर्धजाः केशाः वित्तहीनानां निर्धनानां भवंति ॥ तथा च ॥ एकैकसंभवाः स्निग्धाः कृष्णा नातिघनाः कचाः कुंचिता विपरी
ताश्च निर्धनानां प्रकीर्तिताः ॥ आचार्येणोक्तम् ॥ सामुद्रविद्वदति यात्मनागतं वेत्यत्रोत्रास्माभिः सामुद्राणि पुरुषलक्षणानि उदाहृतानि
यावदाचार्यस्य तेभ्योप्यधिकमस्तीति ज्ञेयम् ॥ अधुनैतदेव सर्वं संक्षेपेणाह ॥ यद्यद्गात्रं मांसविहीनं सिराधनद्धं च तत्तदनिष्टं प्रोक्तं
विपरीतमतः शुभं सर्वम् ॥ यद्यद्गात्रमवयवं रूक्षमास्निग्धं मांसविहीनं निर्मांसं सिरावनद्धं सिरासंततं तत्तद्गात्रमनिष्टमशुभं प्रोक्तम् कथितं (
अतोस्माद्विपरीतं सर्वं निःशेषं शुभं स्निग्धं समांसमसिरालमित्यर्थः ॥ ॥ अधुना महापुरुषलक्षणमाह ॥ ॥ त्रिषु विपुलो गंभीरः
त्रिष्वेव षडुन्नतः चतुः ह्रस्वः सप्तसु रक्तो राजा पंचसु दीर्घः सूक्ष्मश्च ॥ स राजा स्पष्टो भवति ॥ अथैतेषामेव विभागमाह ॥ ॥ नाभी
स्वरः सत्त्वमिति प्रशस्तं गंभीरमेतत्त्रितयं नराणाम् उरो ललाटं वदनं च पुंसां विस्तीर्णमेतत्त्रितयं प्रशस्तम् वक्षोथ कक्ष्या नखनासिकास्यं
कृकाटिका चेति षडुन्नतानि। ह्रस्वानि चत्वारि च लिंगपृष्ठे ग्रीवा च जंघे च हितप्रदानि ॥ नेत्रांतपादकरताल्वधरोष्ठजिह्वा रक्ता नखाश्च खलु
सप्त सुखावहानि। सूक्ष्माणि पंच दशनांगुलिपर्वकेशाः साकं त्वचा कररुहाश्च न दुःखितानाम् ॥ हनुलोचनबाहुनासिकं स्तनयोरंतरमत्र
पंचमम् इति दीर्घमिदं तु पंचकं न भवत्येव नृणामभूभृताम् ॥ ॥ नाभी शरीरमध्यस्थानम् स्वरः शब्दः सत्त्वं गुणाभागः यस्य लक्षणमविकारक
रं सत्त्वं व्यसनाभ्युदयागमे एतत्त्रितयं नराणां पुरुषाणां गंभीरं प्रशस्तम् उरो वक्षः ललाटं मुखपृष्ठं वदनं वक्त्रं सकलमेतत्त्रितयं नराणां पुरुषाणां
गंभीरं प्रशस्तम् विस्तीर्णं प्रशस्तम् वक्ष उरः ॥ अथ शब्दः चार्थे ॥ कक्ष्याबाह्वेन शरीरमध्यभाग उच्यते। नखाः कररुहाः नासिका घ्राणं आस्यं
वक्त्रं कृकाटिका ग्रीवा पश्चिमभागः एतानि च षडुन्नतानि उच्चानि हितप्रदानि प्रशस्तानि ॥ लिंगं मेढ्रं पृष्ठं शरीरपश्चिमभागः ग्रीवा शिरोध
रा जंघे च शब्दः सर्वत्र समुच्चये। एतानि चत्वारि ह्रस्वानि अदीर्घाणि हितप्रदानि प्रशस्तानि नेत्रांतं चक्षुः पर्यंतः पादौ चरणौ करौ हस्तौ तालु
आस्यपृष्ठभागः अधरः उष्ठः रसना जिह्वा नखाः कररुहा एतानि सप्त रक्तानि लोहितानि सुखप्रदानि दशनाः दंताः अंगुलपर्वाणि करशाखाश्रिता

२५१ 251

लेखाः केशाः मूर्धजाः त्वचाकर्मणस्ताकंस ह्रककरह्रजानखाः एतानि पंचसूक्ष्माणि तनुः खितानांभवंति अपि तुच्छखितानां भवंतीत्यर्थः हनुनी प्रसिद्धे
लोचने नेत्रे बाहू भुजौ नासिका घ्राणं स्तनयोरंतरं मध्यं। अत्रास्मिन्वर्गे पंचमं पंचसंख्यम् इत्येतत्पंचकं दीर्घमस्त्येषां पुंसामस्य ते नामराज्ञो न भ
वंति। येषां च भवंति ते राजानः भवंतीत्यर्थः ॥ तथा च गर्गः ॥ चतुर्दशसमो द्वंद्वः चतुःकिष्कुः चतुःसमः दशपद्मो दशच्छायस्त्रिशुक्लः शस्यते नरः ॥
पादौ गुल्फौ स्फिचौ पार्श्वौ वृषणौ चक्षुषी स्तनौ। कर्णौ ओष्ठौ वंक्षणौ जंघे हस्तौ बाहू द्विकौ तथा। चतुर्दशसमद्वंद्वः समुद्रो दृष्टु शंसति। अक्षि तारे भ्रुवौ श्मश्रु
केशाश्चैवासिताः शुभाः अंगुल्योष्ठ हृदयं नेत्रे दशनाश्च समाहृताणाम् चत्वारि संप्रवास्यंते ते सदैश्वर्यसुखावहाः। जिह्वौष्ठतालुरास्यं च मुखं नेत्रे स्तनौ नखाः (
हस्तौ पादौ च शस्यंते पद्माभा दशदेहिनाम् पाणिपादपुरोग्रीवा वृषणौ हृदयं शिरः ललाटमुदरं पृष्ठं पृष्ठकृतः पूजिता दश। नेत्रे तारा विरहिते दशनाः
चलिताः शुभाः य एतल्लक्षणं कृत्स्ने नराणां समुदाहृतम् पंचदीर्घश्चतुर्ह्रस्वः पंचसूक्ष्मः षडुन्नतः पंचरक्तस्त्रिविस्तीर्णस्त्रिगंभीरः प्रशस्यते। बा
हू नेत्रांतरे चापि हनुनी वृषणौ तथा। स्तनयोरंतरं चैव पंचदीर्घः प्रशस्यते। ग्रीवा प्रजननं श्रोणि ह्रस्वे जंघे च पूजिते। तथैतरेषु सर्वेषु सर्वमेव प्रशस्य
ते। सूक्ष्माणि पंगुलिपर्वाणि दंता रोमाणि च छविः तथा नखाश्च सर्वे च पंचसूक्ष्मः प्रशस्यते ॥ कक्षा कुक्षि वक्षो मितथा मुखं पृष्ठं कृकाटिका सर्व
भूतेषु निर्दिष्टः षडुन्नेदः प्रशस्यते। पाणिपादौ तथा चास्यमुभे नेत्रे तनौ नखाः पंचरक्तानि यस्याहुर्मनुजे च्छ्रतमादिशेत् उरो मुखं ललाटं च त्रिवि
स्तीर्णः प्रशस्यते॥ ३चम् ॥ ॥ अथ छायालक्षणमाह ॥ ॥ छायाशुभाशुभफलानि निवेदयंती लक्ष्म्या मनुष्यपशुपक्षिषु लक्षणज्ञैः
तेजोगुणान्बहिरपि प्रविकासयंती दीपप्रभा स्फाटिकरत्नघटस्थितेव ॥ छायाशरीरकांतिः शुभानि अशुभानि च फलानि निवेदयंती कथयंती
लक्षणज्ञैर्ज्योतिश्चिह्नज्ञैर्लक्ष्या लक्षणीया विचार्येत्यर्थः केषु मनुष्यः पशुपक्षिषु मनुष्याः पुरुषाः पशवः चतुष्पदाः पक्षिणः विहंगमाः सा २५१
च शरीरांतर्वर्तिनी बहिरपि शरीरवाह्येपि तेजोगुणान्तेजःसंबंधि गुणान्प्रकर्षेणातिशयेन विकासयंती प्रकाशयंती। कथं दीपप्रभा
स्फाटिकरत्नघटस्थितेव। स्फाटिकश्चासौ रत्नश्चेति स्फाटिकरत्नं स्फाटिकरत्नस्य घटः स्फाटिकरत्नघटः स्फाटिकरत्नघटाभ्यंतरस्थिता दीपप्रभा

दीपकांतिर्यथा वह्निरपि तेजोगुणान् विकासयति तथां तरस्था छाया विकासयंतीत्यर्थः तत्र तावत्पंचानां महाभूतानां संबंधिन्यः पंचच्छाया भ
वंति प्रथमत एव जातक उक्तम् छायां महाभूतकृतां च सर्वे निर्दिश्य जयंति स्विदशामवाप्य। ॐ क्षितिवाद्यंभ जांगुणांश्च नसाद्यदृश्चे श्रवणानुमेयावि
ति॥ ॥ तत्रादावेव पार्थिवच्छायालक्षणमाह ॥ स्निग्धा द्विजत्वङ्नखरोमकेशाच्छाया सुगंधा च महीसमुत्था। तुष्ट्यर्थलाभाभ्युदयान्करो
ति धर्मस्य चाहन्यहनि प्रवृत्तिम् ॥ महीसमुत्थाऽस्निग्धाच्छाया यस्य जंतोर्भवति यदा तदा तस्य द्विजाः दंताः त्वक् चर्म नखाः करजाः रोमाण्यंग
जानि। केशाः मूर्धजाः एते सर्वे स्निग्धाः सुस्नेहा भवंति। तथा सा छाया शरीरकांतिः सुगंधाः शोभनगंधा भवंति। तस्य जंतोः शरीरं सुभगंधं भवतीत्यर्थः
सच्छाया तुष्टिं चित्तपरितोषः अर्थलाभो धनप्राप्तिः अभ्युदयः कार्याणामाभिमुख्ये त्रोदयः प्रादुर्भावाः एतान् करोति। तथा अहन्यहनि प्रतिदिनं धर्मस्य
प्रवृत्तिं वर्तनं करोति केचिद्धर्मस्य चाहन्यहनि प्रवृद्धिमिति पठंति ॥ अधुनाप्यच्छायालक्षणमाह ॥ स्निग्धा सिताच्छहरितानयनाभिरामा
सौभाग्यमार्दवसुखाभ्युदयान्करोति। सर्वार्थसिद्धिजननी जननीव चाप्याच्छाया फलं तनुभृतां शुभमाददाति ॥ आप्या वारुणीच्छाया स्निग्धा
स्नेहसंयुक्ता विमलेत्यर्थः सिता श्वेतवर्णा गौरप्राया अच्छहरिता अच्छा चासौ हरिता अच्छहरिता निर्मलनीलवर्णा नयनाभिरामा नयनाभ्यामा
भिमुख्ये न रम्यते अस्याः तुष्टिजननेत्यर्थः सा च सौभाग्यं सर्वजनवाल्लभ्यं मार्दवमक्रूरतां सुखं शरीरसौख्यं अभ्युदयं कार्याणामेतान्करोति
सर्वार्थसिद्धिजननी सर्वार्थानां सिद्धिर्जयति जननीव मातेव। यथा माता सर्वप्राणिनां हितकरी तथेति सा च तनुभृतां शरीरिणां शुभं फलमादधाति करोति ॥ ॥
अधुनाग्नेयच्छायालक्षणमाह ॥ चंडाऽधृष्याऽपद्महेमाग्निवर्णा युक्ता तेजोविक्रमैः सप्रतापैः आग्नेयीति प्राणिनां स्याज्जयाय क्षिप्रं सिद्धिं वांछि
तार्थस्य धत्ते ॥ आग्नेयीच्छाया चंडा क्रोधशीला अधृष्या अनभिभवनीया पद्महेमाग्निवर्णा पद्मस्य कमलस्य हेम्नः सुवर्णस्याग्नेर्हुताशनस्य
सदृशवर्णा तुल्यकांतिः तथा युक्ता तेजोविक्रमैः सप्रतापैः तेजसा दीप्त्या विक्रमेण पराक्रमेण प्रतापेन शौर्येण शत्रूणां निग्रहेण च युक्ता समवे
ता एतैस्तेजोविक्रमैः सप्रतापैर्युक्ता एषा आग्नेयीच्छाया द्रुतिराशुः प्रकाराय। एवं प्रकाराः प्राणिनां देहिनां जयाय स्याद्भवेत् वांछितस्याभिलषितस्यार्थस्य।

क्षिप्रमात्मैवसिद्धिंधत्तेददाति ॥ अधुनावायवीनभस्योश्छाययोर्लक्षणमाह ॥ मलिनपरुषकृष्णापापगंधानिलोत्थाजनयतिवधबंधव्याध्य
नर्थार्थनाशान् स्फटिकसदृशरूपाभाग्ययुक्तात्युदारानिधिरिवगगनोत्थाश्रेयसांस्वच्छवर्णा ॥ अनिलोत्थावायुसंभवाछायामलिनामलिनव
र्णा अत्रसन्नापरुषारूक्षाकृष्णाअसितापापगंधादुर्गंधाताचजनयत्युत्पादयतिवधोमरणम् बंधोबंधनम् व्याधयः पीडाः अनर्थः अलाभः
अर्थनाशः संचितवित्तस्यक्षयः एतान् जनयति ॥ अथनभस्यालक्षणमाह ॥ स्फटिकेतिगगनोत्थाआकाशजाछायानभसी ॥
स्फटिकसदृशरूपास्फटिकमणेः सदृशातुल्यारूपकांतिर्यस्याः अतिनिर्मलेत्यर्थः भाग्ययुक्ताभाग्यैः समेता अत्युदाराअतिशयेनोदारादा
नशीलाश्रेयसांसर्वेषांशुभकार्याणांनिधिरेवसर्वप्रदेत्यर्थः साचस्वच्छवर्णानिर्मलेति ॥ ॥ अत्रैवपरमतेनाद्याः पंचछायाआह ॥ ॥
छायाः क्रमेणकुजलाग्न्यनिलांबरोत्थाःकेचिद्वदंतिदशताश्चयथानुपूर्व्या। सूर्यांजनाभपुरुहूतयमोडुपानांतुल्यास्तुलक्षणफलैरितित
त्समासाः ॥ उः पृथिवीजलंवारुणः अग्निःहुताशनः अनिलावायुः अंबरमाकाशम् एभ्यउत्पन्नाछाया क्रमेणपरिपाट्या पंचकेचिन्मुन
योगर्गादयोदशछायावदंतिकथयंतिउक्ताः पंचपंचचेदानीवक्ष्यमाणताश्चापियथानुपूर्व्याक्रमपरिपाट्या। सूर्यांजनाभपुरुहूतयमोडुपानां
संबंधिन्योभवंति। सूर्यः आदित्यः अंजनाभोनारायणः पुरुहूतइंद्रः यमः पितृपतिः उडुपः चंद्रः एताः छायालक्षणैः फलैश्चयथा
क्रमेणप्रागुक्तानांवचनांतुल्याः सदृशाः यतः सौराएवाग्नेयी। अंजनाभानाभसी। पुरुहूतापार्थिवी। याम्यावायवी। औडुपीचाप्याइतितत्स
मासःइतिछेतोः तासांदशानांछायानांसमाससंक्षेपः कृतः फलसाम्यात्पंचैवछायाकृताः ॥ तथाचगर्गः ॥ धरापोनलवाय्वश्चसंभूताःपंच
कीर्तिताः छायास्त्वर्कविष्णुशक्रार्किचंद्राणांचतथापराः ॥ इतिसप्तजाम् ॥ ॥ अथस्वरलक्षणमाह ॥ करिवृषरथौघभेरीमृदंग
सिंहभनिः स्वनानृपाः गर्दभजर्जररूक्षस्वराश्चधनसौख्यसंत्यक्ताः ॥ करीवृषोहस्तीदांतः रथौघः स्यंदनसमूहः भेरीढक्कामृदंगो
वादित्रोमंदलेतिप्रसिद्धः सिंहोकेशरी अश्वोमेघः एतेषांसदृशस्वरातुल्यशब्दाक्ष्पाराजानोभवंति। गर्दभःखरः जर्जरोविस्तृतस्वरः रूक्षःपरुषःगर्दभा

दितदृशस्वराधनतौरश्वसंत्यक्ताः धनैः सुखैः चवर्जिताइत्यर्थः ॥ तथाचगर्गः ॥ गंभीरोदुंदुभिः स्निग्धोमत्तां श्चैवानुनादवत् इतिस्वरगुणाः पंच
समुद्रः प्राहतत्त्वविद् एभिराधुर्यशोविद्यामानसौख्यंधनागमम् वाहनानिसुतानार्योराज्यंभोगागमस्तथा, भिन्नोजर्जरितश्चैवमंदिनोगर्दभस्तथा
द्रःमस्वरास्तथैवोक्तासमुद्रेणाभिनिंदिताः स्वरैरेभिर्कलिक्रोधलोभमोहतमोभवेत् नैर्घृण्यमभिमानंच पारुष्यंशाठ्यमेव चेतिस्वरः ॥ ॥
अथसारानाह ॥ सप्तभवंतिचसारामेधामज्जाचगांधिशुक्राणि। रुधिरंमांसंचेतिप्राणास्तेषांतत्समासफलम् ॥ सप्तनराणांसाराभवंति।
तद्यथामेदः अस्थ्यंतरगतः स्नेहभागः मज्जाकपालांतरस्था। वक्त्र चर्म। अस्थिप्रसिद्धं। शुक्रं रेतः। रुधिरंरक्तम् मांसंपललम् चशब्दःसमुच्च
येइत्येवंप्रकाराः सप्तसाराः प्राणास्तेतांदेहिनांभवंति। तत्समासफलंतेषांसंक्षेपेणफलंकथ्यतेति ॥ ॥ तत्रताबदुक्तसारस्यलक्षणमाह ॥
ताल्वोष्ठदंतपालीजिह्वानेत्रांतपायुकरचरणे। वक्त्रोलरक्तसारान्बहुसुखवनितार्थपुत्रयुता ॥ तालुरास्यपृष्ठभागः ओष्ठोदंतछदोदंतपाली
दंतमांसपंक्तिः जिह्वारसनानेत्रांतंचक्षुः पर्यंतम् पायुगुह्यस्थानम् करौहस्तौचरणौपादौ अस्मिन्नष्टकेरक्तेलोहितेसतिरक्तसारानभवंति
तेचबहुभिः सुखैः वनिताभिः स्त्रीभिः बहुभिरर्थैः धनैः बहुभिः पुत्रैः सुतैश्चयुताः संयुक्ताभवंति ॥ अथात्वअज्जामेधसारानाह ॥
स्निग्धत्वक्काधनिनः मृदुभिःसुभगाविचक्षणास्तनुभिः मज्जामेदःसाराः सुशरीराः पुत्रवित्तयुताः ॥ त्वक्चर्मतत्त्वास्निग्धमदृढमेषांतेस्नि
ग्धत्वक्कास्तेचधनिनोवित्तान्विताभवंति। मृदुभिः सुस्निग्धैस्त्वभिः सुभगाः सौभाग्योपेताभवंति। तनुभिः त्वभिर्विचक्षणाः पंडितायेमज्जासारा
नरामेधासाराश्चतेसुशरीराभवंतीतितल्लक्षणम् तेचपुत्रवित्तयुताः सुतधनान्विताभवंति। मृदुभिः सुस्निग्धैस्त्वभिः सुभगासौभाग्योपेताभवं
ति। तनुभिःत्वभिर्विचक्षणाः पंडितायेमज्जासारा नरामेदासाराः चतेसुशरीराभवंतीतितल्लक्षणम् तेचपुत्रवित्तधनस्तुताः भवंतीति ॥ ॥
अथास्थिशुक्रसारमाह ॥ स्थूलास्थिरस्थिसारोबलवान्विद्यान्वितगःस्वरूपश्च। बहुगुरुशुक्राःसुभगाविद्वांसोरूपवंतश्च ॥ स्थूलान्यस्थी
नियस्यसोस्थिसारः सचबलवान्प्राणीभवतिविद्यांतगोविद्यान्वितगः शक्तः सुरूपः शोभनरूपश्चभवति। बहुगुरुशुक्राबहुप्रभूतंगुरुघनंशुक्रंरे
ते येषां ते शुक्रसाराः ते च सुभगाः सौभाग्योपेतः विद्वांसः पाठकः पंडिताः रूपवंताः सुरूपाश्चभवंति ॥ ॥ ॥

अथमांससारलक्षणंसंहतिलक्षणंचाह ॥ उपचितदेहोविद्वान्धनीसुरूपश्चमांससारोयः संघातइतिचसुश्लिष्टसंधितासुखभुज्ज्ञेया ॥ य
उपचितदेहः स्थूलशरीरः समांससारः सचविद्वान् पंडितः धनीवित्तवान् सुरूपश्च शोभनरूपोभवति ॥ अथसंहतिलक्षणंसंघातइति॥ सुश्लिष्ट
संधितासर्वांगसंधीनांसुश्लिष्टत्वंसंघातः साचसुश्लिष्टसंधितासुखभुजःसुखिनोज्ञेयाः सुश्लिष्टसंधितायेषांतेसुखभुजइत्यर्थः ॥ ॥ अथ
स्नेहलक्षणमाह ॥ स्नेहः पंचसुलक्ष्योवाग्जिह्वादंतनेत्रनखसंस्थः सुतधनसौभाग्ययुताःस्निग्धैस्तैर्निधनारूक्षैः ॥ पंचसुस्नेहोलक्ष्योविचार्यः
केषु वाचिवचने। जिह्वायाम् दंतेषुरदनेषु नेत्रयोश्चक्षुषोः नखेषुकररुहेषु एतेषुसंस्थः तैः वागादिभिः सर्वैः स्निग्धैः सुस्नेहैः सुतधनसौभाग्ययु
तानराभवंति। सुताः पुत्राः धनंवित्तंसौभाग्यंसर्वजनवाल्लभ्यम् एतैर्गुणैःसंयुक्ताः तैरेवसर्वैरूक्षैरस्निग्धैर्निर्धनादरिद्राभवंति॥ स्नेहः ॥
अथवर्णलक्षणमाह ॥ द्युतिमान्वर्णःस्निग्धः क्षितिपानांमध्यमःसुतार्थवताम् रूक्षोधनहीनानांशुद्धः शुभदोनसंकीर्णः ॥ वर्णोगौर
लोहितश्यामादिकवर्णः स्निग्धोयस्यासौवर्णःस्निग्धः सद्युतिमान्दीप्तिमान्भवति सचक्षितिपानांराज्ञांभवति मध्यमोवर्णोनातिरूक्षोनातिस्नि
ग्धः समसुखार्थवतांपुत्रधनान्वितानांभवति। रूक्षोवर्णोधनहीनानांदरिद्राणां शुद्धोवर्णः स्निग्धएवशुभदः प्रशस्तः नसंकीर्णोमिश्रवर्णः
क्वचित्स्निग्धः क्वचिद्रूक्षोनशुभदइति ॥ ॥ अथानूकलक्षणमाह ॥ साध्यमनूकंवक्त्राज्जोवृषशार्दूलसिंहगरुडमुखा। अप्रतिहतप्रतापा
जितरिपवोमानवेंद्राश्च ॥ वानरमहिषवराहाजतुल्यवदनाश्चसुतार्थसुखभाजः गर्दभकरभप्रतिमैर्मुखैःशरीरैश्चनिःस्वसुखाः ॥ अनूकं
प्राग्जन्मनश्चवक्त्रान्मुखात्साध्यंकल्पनीयोगोः प्रसिद्धः वृषोदांतः शार्दूलः सिंहसदृशः प्राणिविशेषः सिंहोहरीगरुडोवैनतेयः एतेषांयेस
दृशमुखाःतुल्यवक्त्रास्तेषांप्राग्जन्मशुभम् तेचाप्रतिहतप्रतापाभवंति। अप्रतिहतोनभिभवनीयःप्रतापोयेषाम् जितरिपवोनिर्जितशत्रवएव
मानवेंद्राश्चराजानोभवंति। वानरःकपिः महिषः प्रसिद्धः वराहः सूकरः अजःछागः एतेषांतुल्यवदनाःसदृशमुखानराः श्रुतार्थसुखभाजः
श्रुतंशास्त्रमर्थोधनंसुखंप्रसिद्धमेषांभागिनोभवंति। एतेषांमध्यमंप्राग्जन्मगर्दभः खरः करभउष्ट्रः गर्दभकरभप्रतिमैस्तत्सदृशैर्मुखैर्वदनै
शरीरैश्चदेहैर्निःस्वसुखाभवंतिनिःस्वानिर्धनोतिःसुखाःसुखरहिताश्च तेषामशुभंप्राग्जन्मानूकम् ॥ ॥ अथोन्मानलक्षणमाह ॥ ॥

253

अष्टशतं षण्णवति परिमाणं चतुरशीतिरिति पुंसाम् । उत्तमसममहीनानामंगुलसंख्यास्वमानेन ॥ पुंसां पुरुषाणां स्वमानेनात्मीयप्रमाणे
नांगुलसंख्याप्रमाणम् अष्टशतमष्टाधिकं शतं स्वांगुलैरुत्तमानां नराणां परिमाणं भवति षण्णवत्यंगुलानि मध्यमानां मानम् स्वमानेन चतुरशी
त्यंगुलानि हीनानां परिमाणं भवति। उत्थितस्य पुरुषस्य भूपादसंयोगाच्छिरोमध्यं यावदूर्ध्वं दत्त्वा तन्मापयेत्स्वांगुलैरिति स्थितः ॥ उन्मानम् ॥
अथ मानलक्षणमाह ॥ भारार्धतनुः सुखभाक्तुलितो दुःखभाग्भवेन्न्यूनः भारोऽतीवाढ्यानामध्यर्धः सर्वधरणीशः ॥ भारः पलसहस्रद्वयं यः
पुरुषः तुलायां तुलितो भारार्धतनुर्भवति दशपलशतानीत्यर्थः सुखभाक् सुखितो भवति। अतोऽस्माद्भारार्धाद्यदूनतनुः स दुःखभाक् दुःखितो भवति
भारप्रमाणतनुरतीवाढ्यानामतिधनानां भवति। अध्यर्धभारतनुस्त्रिंशत्पलशतानि यः स सर्वधरणीशः सार्वभौमो राजा भवतीत्यर्थः ॥ कस्मिन्
काले उन्मानमाने मापयेदित्येतत्प्रतिपादयन्नाह ॥ ॥ विंशतिवर्षा नारी पुरुषः खलु वर्षपंचविंशत्या। अर्थाति मानोन्मानं जीवतिभागे चतुर्थे वा ॥ र
नारी स्त्री। विंशतिवर्षमाने मानोन्मानमर्हति वर्षशतमाने तु जीविते निश्चिते चतुर्थभाग इत्युक्तम् ॥ मानम् ॥ ॥ प्रकृतिलक्षणमाह ॥ भूजलशि
ख्यनिलांभरसुरनररक्षःपिशाचकतिरश्चाम् सत्त्वेन भवति पुरुषो लक्षणमेतद्भवति तेषाम् ॥ ॥ भूः प्रसिद्धा जलं कं शिखी अग्निः अनिलो वा
युरंभरमाकाशम् सुराः देवाः नराः मनुष्याः रक्षो राक्षसाः पिशाचो देवयोनयः तिर्यंचस्तिर्यग्जातयः एतेषां सत्त्वेन प्रकृत्या पुरुषो नरो भवति
तेषां चैतद्वक्ष्यमाणं लक्षणं भवति। अत्र केचित्पठंति। भूजलशिख्यनिलांभरसुरनररक्षःपिशाचतिर्यंचो मितितन्नयः सतिरश्चामिति भवितव्यं।
तस्मात्प्राक्तनः पाठः शोभनीयः ॥ ॥ तत्र भूजलस्वभावयोर्लक्षणमाह ॥ महीस्वभावः शुभपुष्पगंधः संभोगवान्सुश्वसनः स्थिरश्च।
तयोः स्वभावो बहुतोयपायी प्रियाभिभाषी रसभाजनश्च ॥ महीस्वभावोऽत्र प्रकृतिः पुरुषः शुभपुष्पगंधः शोभनानां चम्पकप्रभृतीनां पुष्पा
णां कुसुमानां सदृशो गंधो यस्य सुश्वसनः शब्देनाच्छखरवाही वातः स च सुगंधस्तस्य भवतीत्यर्थः स्थिरश्चास्थिरस्वभावो भवति। तोयस्वभावो जलप्र
कृतिः बहुतोयपायी। बहु प्रभूतं तोयं जलं पिबति तत्कीलः प्रियाभिभाषी प्रियमनुकूलं भाषते वक्ति। रसभाजनश्च रसा मधुरादयस्तेषां भा
जनो योग्यस्तत्प्रियः केचिद्रसभोजनश्चेति पठंति ॥ ॥ अथाग्निमारुतयोर्लक्षणमाह ॥ अग्निप्रकृत्या चपलोऽतितीक्ष्णश्चंडः क्षुधालुर्ब

कुभोजनाढ्य। वायोः स्वभावेन लैः कोपश्च क्षिप्रं च कोपस्य वशं प्रयाति ॥ अग्निप्रकृत्या नरः चपलः कृशयास्वनवस्थितः अतितीक्ष्णः खलः चंडः कूरः दयालुः क्रंदनसक्तो बहुभोजनश्च बाह्याशी वायुस्वभावेन पुरुषः चपलः अस्थिरमतिः कृशो दुर्बलः कोपस्य क्रोधस्य क्षिप्रमाश्चेव वशं याति वि धेयतां गच्छति ॥ ॥ अथाकाशसुरसत्त्वयोर्लक्षणमाह ॥ खप्रकृतिर्निपुणो विवृतास्यः शब्दगतेः कुशलः सुशिरांगः त्यागयुतः कृशो ऽल्पकोपः स्नेहरतश्च भवेत्सुरसत्त्वः ॥ खप्रकृतिराकाशस्वभावो नरो निपुणः कलासु दक्षः दृष्टिविवृतास्य उद्घाटितमुखः शब्दगतः कुशलः शब्दानां संस्कृतपदानां गतिर्ज्ञातिस्तस्याः कुशलः शक्तः अथवा शास्त्रे गतिर्गमनस्य कुशलः केचित् शब्दगता कुशला इति पठंति। शब्दगता गीति विषये कुशलः सुशिरांगः सुशिरावयवः सुरसत्त्वो देवप्रकृतिः पुरुषः त्यागयुतः त्यागी स्वल्पकोपो ऽल्पक्रोधः स्नेहरतः प्रीतियुक्तः च भवति ॥ ॥ अथ पुरुषसत्त्वस्य लक्षणमाह ॥ मर्त्यसत्त्वसंयुतो गीतभूषणप्रियः संविभागशीलवान्नित्यमेव मानवः ॥ मर्त्यो नरः नरसत्त्वसंयुतः गीतभूषणप्रियः गीतप्रियः भूषणप्रियः भूषणानि अलंकरणानि प्रियाणि यस्य सः विभजनं संविभागः संविभागवान् बांधवानां उपकर्ता शीलवान् चरित्रयुक्तः नित्यं सर्वकालं मानवो मनुष्यो भवति ॥ अथ रक्षःपिशाचानां लक्षणमाह ॥ तीक्ष्णप्रकोपः खलु चेष्टितश्च पापश्च सत्त्वेन निशाचराणाम्। पिशाचसत्त्वश्चपलो मलाक्तो बहुप्रलापी च समुल्बणांगः ॥ निशाचराणां रक्षसां सत्त्वेन नरः तीक्ष्णप्रकोपश्च पापरतो भवति। पिशाचसत्त्वः पिशाचप्रकृतिर्नरः चपलो ऽनेकमतिः मलाक्तो मलोपदिग्धशरीरः बहुप्रलापी बहुविदं प्रलपति समुल्बणांगः स्थूलांगो भवति ॥ ॥ अथ तिर्यक्सत्त्वस्य लक्षणमाह ॥ भीरुः दयालुः बहुभुक् च यः स्यात् ज्ञेयः स सत्त्वेन नरः तिरश्चाम् एवं नराणां प्र दिष्टो ऽयं लक्षणज्ञः प्रवदंति सत्त्वम् ॥ यो नरः पुरुषो भीरुः भयार्तः दयालुः क्रंदनसक्तो। बहुभुग् बह्वाशी च यः स्यात् भवेत् स तिरश्चां तिर्य ग्जातीनां सत्त्वेन ज्ञेयः ज्ञातव्यः एवमनेन प्रकारेण नराणां पुंसां प्रकृतिः प्रदिष्टा उक्ताः लक्षणज्ञः पुरुषलक्षणविदः यत्सत्त्वमिति प्रवदंति कथ यंति ॥ तथा च गर्गः ॥ धनधान्यरतो वर्णो वर्णाढ्य वृत्तरः स्वरः स्वराढ्यतरं सत्त्वं सर्वं सत्त्वे प्रतिष्ठितम् ॥ प्रकृतिसत्त्वम् ॥ ॥ अथ गतिल क्षणमाह ॥ शार्दूलहंससमदद्विपगोपतीनां तुल्या भवंति गतिभिः शिखिनां च भूपाः येषां च शब्दरहितं स्तिमितं प्रयातं ते ऽपि ईश्वराः द्रुतपरिप्लुतगा दरिद्राः ॥ ९

शार्दूलः सिंहः हंसः पक्षी। केचित् शार्दूलसिंहेतिपठंति। शार्दूलः प्राणिविशेषः शार्दूलइतिलोकेप्रसिद्धः सिंहोहरीसमदोमदमत्तोद्विपोह-
स्तीमत्तगजइत्यर्थः गोपतिः वृषः तथाशिखीमयूरः एषांगतिभिर्गमनैस्तुल्याः सदृशगतयोनृपाराजानोभवंति। येषांचयातंगमनंशब्दरहितंनिः-
शब्दंस्तिमितमल्पंचतेपीश्वराधनिनः द्रुतपरिप्लुताः दारिद्राः द्रुतंत्वरितंपरिप्लुतंमंडूकवज्ज्ञातादौपंगत्वेनैतेदरिद्रः निर्धनः भवंति ॥ सिद्धांतमाह ॥
श्रांतस्ययानमशनंचबुभुक्षितस्यपानंतृषापरिगतस्यभयेषुरक्षा। एतानियस्यपुरुषस्यभवंतिकालेधन्यंवदंतिखलुतंनरलक्षणज्ञाः ॥
यस्यनरस्यश्रांतस्यखिन्नस्ययानंवाहनमश्वादिकंभवति। बुभुक्षितस्याशनंभोजनंभवति। तृषापरिगतस्यपिपासांतगतस्यपानंजलंभवति। भयेषू-
त्पन्नेषुरक्षापरिपालनं। एतानिकालेयशोपयुज्यमानानिभवंति। तंनरंधन्यंशुभलक्षणंभवंति कथयंतिनरलक्षणज्ञाःपुरुषविदः ॥ २ ॥
इतिश्रीभट्टोत्पलविरचितायांसंहिताविवृतौपुरुषलक्षणंनामअष्टषष्टितमोध्यायः ॥ ६८ ॥ अथपंचमनुष्यविभागोव्याख्यायते ॥ २
तत्रादावेवतदारंभप्रयोजनप्रदर्शनार्थमाह ॥ ॥ ताराबलैर्ग्रहयुतैःस्वक्षेत्रस्वोच्चगैश्चतुष्टयगैः पंचपुरुषाः प्रशस्ताजायंतेतानहंवक्ष्ये ॥
ताराग्रहाभौमबुधजीवशुक्रसौराः तैस्ताराग्रहैः बलयुतैः सबलैः स्थानदिक्चेष्टाकालबलयुक्तैः स्वक्षेत्रगैः स्वराशावस्थितैः स्वोच्चगैः स्वा-
त्मीयस्वोच्चराशिषुव्यवस्थितैः लग्नचतुर्थसप्तमदशमानामन्यतमेष्ववस्थितैरित्यर्थः पंचपुरुषाः प्रशस्ताजायंतेतान्पुरुषानहंवक्ष्येकथयि-
ष्ये ॥ अथैतेषांप्रविभागलक्षणमाह ॥ जीवेनभवतिहंसःशशः कुजेनरुचकश्च। भद्रोबुधेनबलिनामालव्योदैत्यपूज्येन ॥ ॥
जीवेनबृहस्पतिनाबलयुतेनहंसोनामपुरुषोभवति। एवंसौरेणशनैश्चरेणबलिनाशशोभवति। कुजेनांगारकेनबलिनारुचकोनामयोगो
भवति। बुधेनबलिनाभद्रः। दैत्यपूज्येनशुक्रेणबलिनामालव्योभवति ॥ तथाचसारावल्याम् ॥ स्वक्षेत्रेऽथचतुष्टयेचबलिभिः स्वोच्च-
स्थितैर्वाग्रहैः शुक्रांगारकमंदजीवशशिजैरेतैर्यथानुक्रमम्। मालव्योरुचकश्चशोथकथितोहंसश्चभद्रस्तथासर्वेषामतिविस्तरान्मुनिम-
तान्संकथ्यतेलक्षणम् ॥ एतेषामर्कचंद्रबलवशाद्विशेषमाहश्लोकद्वयेन ॥ सत्त्वमर्कान्स्वर्वाकरीरंमानसश्चचंद्रबलात् यद्राशिभेदयुक्ता

वैनोतल्लक्षणाः सत्ववान् उच्चात्तुमहाभूतप्रकृतिकांतिवर्णसत्वरूपाद्यम् अमलरवींदुद्युतैस्तैः संकीर्णलक्षणैः पुरुषाः ॥ सत्वमहीनंसूर्या
दिति। सत्वंगुणमहीनंपरिपूर्णंसूर्यादादित्यात्तुल्यत्वपुरुषस्य भवति बलवशात् शरीरंगुणोरुः कांतिः मानसंवश्रमनिकृतातच्चंद्रवशात्
चंद्रबलवशाद्भवति॥ कथमित्याह ॥ यद्राशिभेदेनद्रेक्काणनवांशद्वादशभागत्रिंशद्भागाद्येनकुजादिसंबंधिनायुक्तौतस्यराशिभेदस्य
योधिपतिः अर्कः तल्लक्षणैः तैर्लक्षणैर्युक्तः सत्ववान् भवति। राशिभेदकाः जातकेराशिभेदाध्याये प्रोक्ता उच्चात्तुमहाभूतप्रकृतिरितियद्राशि
भेदमुक्तावैनोतल्लक्षणैःसत्ववानित्युक्तम् तत्रतद्धेतोः तद्यः तस्यधातुर्भवति। तद्यथादातद्यः स्नाय्वस्थ्यसृङ्मांसत्वगथशुक्रवसे च मज्जा मंदार्क
चंद्रबुधभृगुसुरेज्यभौमाः इतिमहाभूतानिपृथिव्यादीनिभौमादीनांप्रकृत्युक्तानि॥ तद्यथा॥ शशिभूखपयोमरुद्गणानांवशिनो
भूमिसुतादयः क्रमेणेति॥ तन्महाभूतप्रकृतिर्युक्तोभवति। यथामहीस्वभावः शुभपुष्पगंध इति आदितउक्तम् छायाः कांतिः छायाभा
वर्णः स्निग्ध इत्यादिवर्णः यथारक्तश्यामोभास्कर इत्यादि सत्वगुणभागः तस्यलक्षणं। अधिकारकरं सत्वं घसनाभ्युदयागमे [illegible] नृपवया॥
मधुपिंगलभागित्यादि॥ आदिग्रहणाच्छेष्टास्वभावकौशल्यंतेरादिभेदैरबलरवींदुद्युतैः बलरहितार्कचंद्रयुक्तैर्लक्षणैः संकीर्णैर्व्यामिश्राः
तेपुरुषाभवंति। एतदुक्तंभवति। चंद्रार्कयोर्बलीयः यस्मिन्राशिभेदेभवत्येकः तल्लक्षणोभवतिसपुरुषः अथतावद्बलौभवतः तदायत्रार्क
स्थितः यत्रचंद्रःस्थितः तैर्व्यामिश्रैर्लक्षणैर्युक्तोभवति ॥ ॥ अथकस्मात्ग्रहात्कोलक्षणोभवत्येतदाह ॥ युगलकम् ॥
भौमात्सत्वगुरुतातुपाल्पुरेज्यः स्वरःसितात्स्नेहः वर्णःसौरादेधांगुणादोषैःसाध्वसाधुत्वम् ॥ एषांपुरुषाणांभौमात्कुजात्सत्वंभवति
सशब्दोऽत्र शिष्टगुणवाचकः गुरुतागौरवंबुधात् सुरेज्यात् गुरुः स्वरःशब्दः सितात् शुक्रात्स्नेहः सौरात् शनैश्चराद्गुणः ॥ किमेत
त्सर्वदाभवतिनेत्याह ॥ गुणादोषैःसाध्वसाधुत्वम् एषांग्रहाणांगुणैः सबलवत्वेनसाधुत्वम् सत्वादीनांसंपद्भवतिदोषैर्हीनबलसत्वे
नसाधुत्वम् सत्वाद्दीनोपापाद्भवति॥ तथाचसारावल्याम् ॥ महीसुतात्सत्वमुदाहरंतिगुरुत्वमिंदोस्तनयाद्गुरुःस्वः स्वरःसितास्नेह

स्थूलमतिः महाबुद्धिः प्रतीपः प्रख्यातः ताम्रकविः रक्तवक्त्रः स्याद्भवेत् परिहासशीलः परिहसनप्रियः स च जघन्यनामा अपरः पादो वा
अनुचरः स नित्यं सर्वकालमेषोऽनुचर इति डोर्भ्यां हस्ते खड्गासिशक्तिपाशपरिस्वधांकैः डोर्वक्त्रः अंघ्रीपादौ हस्तौ पाणी एते खड्गासिः खड्गः श
क्तिरायुधविशेषः पाशः सर्पः अथवा पाशशब्द एव परिघ्वधमायुधम् एतैरंकितो चिह्नितो भवति ॥ ॥ अथ कुब्जलक्षणमाह श्लोकद्वये
न ॥ युगलकं ॥ कुब्जो नाम यः समुत्थोऽस्याधस्तात्क्षीणः किंचित्पूर्वकायेनतश्च । हंसः सेवी नास्तिकोऽर्थैरुपेतो विद्वान् शूरः सूचकः स्यात्कृ
तज्ञः ॥ कलास्वभिज्ञः कलहप्रियश्च प्रभूतभृत्यः प्रमदाजितश्च । संपूज्य लोकं प्रजहात्यकस्मात्कुब्जोऽयमुक्तः सततोद्यतश्च ॥ कुब्जो नाम्नेति
कुब्जो नाम यः सोऽधस्तात् अधोभागः शुद्धः परिपूर्णांगः पूर्वकाये प्रादेशभागे किंचित्क्षीणः किंचिन्नतः हंससेवी । हंसस्यानुचरः नास्तिकः क्रि
यारहितः लोकायतिकप्रायः अर्थैरुपेतोऽर्थसंयुक्तः विद्वान् पंडितः शूरः संग्रामप्रियः सूचकः पिशुनः स्याद्भवेत् कृतज्ञः कृतं जानाति । क
लास्वभिज्ञ इति कलासु गीतनृत्तवाद्येष्वभिज्ञः आभिमुख्येन जानाति कलहप्रियः प्रभूतभृत्यः बहुभृत्यः प्रमदाजितश्च स्त्रीनिर्जितः लोकं जनं सं
पूज्य अर्चयित्वा अकस्मादेव प्रजहाति त्यजति अयं कुब्ज उक्तः सततोद्यतः सर्वकालमुत्साही । अपरः पादो वा श्रेष्ठः प्रधानः ॥ युगलकम् ॥
अथ मंडकलक्षणमाह श्लोकद्वयेन ॥ मंडकलक्षणमतो रुचकानुचरोऽभिचारविकुशलः कृत्यावेतालकर्मसु विद्यासु चानुरतः ॥ वृ
द्धाकारः खरपरुषमूर्धजश्च शत्रुनाशने कुशलः द्विजदेवयज्ञयोगप्रसक्तधीः स्त्रीजितो मतिमान् ॥ मंडलकलक्षणमत इति । अतोऽस्मात्
कुब्जादनंतरं मंडलकलक्षणं भवति । स च कीदृक् रुचकानुचरः रुचकानुजीवी भवति । अभिचारविदभिचारज्ञः विद्वेषोच्चाटनवशीकरणमा
रणाद्यभिज्ञः कुशलः समर्थः कृत्यादिषु वेतालादिषु आदिग्रहणाद्ये अन्ये तेष्वेतेषु कर्मसु तथा तद्विद्यासु चानुरतः सक्तः वृद्धाकार इति वृ
द्धाकारो वृद्धसदृशशरीरः खरपरुषमूर्धजः खराः कठिनाः परुषाः रूक्षाः मूर्धजाः केशाः यस्य शत्रुनाशने रिपूणां हनने कुशलः समर्थः द्विज
नां ब्राह्मणानां देवानां सुराणां यज्ञानां यागानां तथा योगेषु सांख्यादिशास्त्रेषु प्रसक्ता धीर्बुद्धिर्यस्याथवा यज्ञं दुःसंतियते अग्निहोत्रिण इत्यपरः पाठः ॥

२६० स्त्रीजितः स्त्रीभिः पराजितः मतिमान् बुद्धिमान् भवति ॥ अथसाचिलक्षणमाह ॥ साचीतियः सोतिविद्रुपदेहः शशानुगामीखलुदुर्भगाश्च ।
दातामहारंभसमाप्तकार्योगुणाः शशस्येवभवेत्समानः ॥ यः साचेति। साचीनामासोतिविद्रुपदेहः अशोभनशरीरः शशानुगामी शशस्यानुगामी
पश्चाद्गच्छतिशशानुचरः खल्वित्ययंवाक्यालंकारे। दुर्भगः जनानामवल्लभः दातादानशीलः महारंभसमस्तकार्यः महारंभः करोतितेषुचसमाप्त
कार्यः अंतगःगुणैः पूर्वोक्तैः शशस्येवसमानःसदृशः तुल्योभवेदित्यर्थः ॥ अथपुरुषलक्षणज्ञस्यप्रभावमाह ॥ पुरुषलक्षणमुक्तमि
दंमयामुनिमतानिनिरीक्ष्यसमासतः इदमधीत्यनरोनृपसंमतोभवतिसर्वजनस्यचवल्लभः ॥ मुनिमतानि ऋषिप्रणीतानिशास्त्राणिनिरी
क्ष्यावलोक्यसमासतः संक्षेपतोमयेदंपुरुषलक्षणमुक्तंकथितम् इदंचपुरुषलक्षणंनरः पुरुषोधीत्यज्ञात्वानृपसंमतोराज्ञांसंमतोइष्टोभवति
सर्वजनस्यचसमस्तलोकस्यचवल्लभः प्रियोभवति। यतः पूर्वमेवाचार्येणस्वयंप्रतिज्ञातंयथाज्योतिषमागमशास्त्रविप्रतिपत्तौनयोग्यंअस्मा
कंस्वयमेवविकल्पयितुंकिंतुबहूनांमतंवक्ष्ये इत्येवंविचार्यसर्वागमतः पुरुषलक्षणंकथितम् तुचिंतनीयमत्यद्भुतंचेति ॥ ॥ ॥
इतिभट्टोत्पलविरचितायांसंहिताविवृतौपंचमहापुरुषलक्षणमनुचरसहाध्यायोषट्सप्ततमः ॥ ६७ ॥ अथकन्यालक्षणंव्याख्याय
ते ॥ ॥ तत्रादावेवपादलक्षणम् ॥ ॥ स्निग्धोन्नताग्रनखौकुमार्याःपादौसमोपचितचारुनिगूढगुल्फौ। श्लिष्टांगुलीकमलकांतितलौचय
स्याः तामुद्वहेद्यदिभुवोधिपतित्वमिच्छेत् ॥ यस्याः कुमार्याः कन्यकायाः पादौचरणौस्निग्धौउन्नताग्रतनुताम्रनखौस्निग्धौसस्नेहावुन्नतौ
कूर्मपृष्ठाववयेतनूर्ययोः ताम्रनखौताम्रवर्णौनखौययोः समोपचितचारुनिगूढगुल्फौसमौतुल्यावुपचितौसमांसलौचारुदर्शनीयौनिगूढौ
अनुल्बणौययोः तथाश्लिष्टांगुलीश्लिष्टाघनाअंगुल्यः शाखायययोः कमलकांतितलौकमलस्यपद्मस्येवकांतिस्तलेययोः तयोश्चतथाभू
तौपादौयस्याः कन्यायायदिभुवोभूम्यामधिपतित्वंराज्यंइच्छेत्तदातामुद्वहेत् उद्वाहयेत् ॥ पुनरपिपादजंघाजानूरुगुह्यमणिलक्षणमाह ॥ ॥
मत्स्यांकुशाब्जयवमत्स्यहलासिचिह्नावस्वेदनौमृदुतलौचरणौप्रशस्तौ। जंघेचरोमरहितेविशिरेसुवृत्तेजानुद्वयंसममनुल्बणसंधिदेशम् ॥ ॥

260

२६०

ऊरू घनौ करिकरप्रतिमौ अरोमावश्वत्थपत्रसदृशं विपुलं च गुह्यम् श्रोणीललाटमुरुकूर्मसमुन्नतं च गूढो मणिश्च विपुलां श्रियमादधा
ति ॥ मत्स्यांकुशाब्जेति । मत्स्यो मीनः अंकुशः प्रसिद्धः अब्जं पद्मं यवो यवाकारः वज्रमायुधं हलं लांगलं । असिः खड्गः एतैः चिह्नैः चिह्नि
तौ चरणौ पादौ तथा अस्वेदनौ स्वेदरहितौ मृदुतलौ मृदुनी तले ययोस्तौ तथाभूतौ प्रशस्तौ ॥ तथा च समुद्रः ॥ स्निग्धोन्नताग्रनखौ घनौ च कू
र्मपृष्ठौ सुलोहितौ । निगूढगुल्फौ सुश्लिष्टघनांगुलिसमन्वितौ । मत्स्यांकुशाब्जयवाब्जहलवज्रासिचिह्नितौ । अस्पृष्टौ रोमरहितौ कुमार्याश्चरणौ
शुभौ । अतो विपर्ययस्तु चरणौ दुःखदारिद्र्यभागिनौ । यस्याः पादानतौ कन्या सुखं लभते कदाचन । जंघे च रोमरहिते इति जंघे रोमरहिते रोमवर्जिते वि
सिरे सिरारहिते सुवृत्ते परिवर्तुले जानुयुगे जानुयुगले समं तुल्यमनुल्बणमस्फुलं संधिदेशम् । श्लिष्टे जानुनी यत्र ऊरू घनाविति ऊरू घनौ
संततौ करिकरप्रतिमौ गजहस्तसदृशौ अरोमौ रोमवर्जितौ गुह्यं भगम् अश्वत्थपत्रसदृशम् अश्वत्थदलरूपत्राकारं विपुलं विस्तीर्णं । श्रोणील
लाटं श्रोणीललाटं तच्चोरु विस्तीर्णं कूर्मसमुन्नतं कूर्मवद्वृत्तं कूर्मपृष्ठाकारम् मणिः च निगूढो दृश्यमानो विपुलां विस्तीर्णां श्रियं लक्ष्मीमा
ददाति करोति ॥ तथा च समुद्रः ॥ जंघे तु रोमरहिते सिराहीने सुवर्तुले । सुश्लिष्टौ जानुनी यस्यो सिरारोमविवर्जितौ । गजहस्तसमावूरू
सुस्पर्शौ संततौ समौ । सुस्पर्शं कूर्मपृष्ठं च विपुलं जघनं शुभम् मणिर्निगूढः सुश्लिष्टः स्फिजौ च विपुलौ शुभौ । नाभिदेशं सुगुप्तं च यस्याः सा धनभा
गिनी ॥ अथ नितंबनाभिलक्षणमाह ॥ विस्तीर्णमांसोपचितो नितंबः गुरुश्च धत्ते रशनाकलापं । नाभिर्गभीरा विपुलांगनानां प्रदक्षिणा
वर्त्तगता च शस्ता ॥ नितंबः कटिभागः स च विस्तीर्णः पृथुलो मांसोपचितः समांसलः गुरुश्च गौरवयुक्तो रशनाकलापं धत्ते धारयति रशनायाः
कलापो रशनाकलापो रशना मेखला तस्याः कलापो विस्तारः तं धारयति ॥ तथा च ॥ जघनं विपुलं यस्याः सुस्पर्शं रोमवर्जितम् सुवर्णभिर
तैर्युक्ता सा भवेद्राज्यभागिनी । नाभिर्गभीरेति । अंगनानां स्त्रीणां नाभिर्गभीरा गंभीरा विपुला विस्तीर्णा प्रदक्षिणावर्तेन च गता प्रशस्ता पूज्याः
तथा च ॥ गंभीरा विपुला नाभी दक्षिणावर्त्तमाश्रिता शस्ता विपर्ययेनेष्टा वामावर्त्ता विशेषतः ॥ अथ मध्यस्तनोदरवक्षोग्रीवालक्षणमाह ॥ ॥

२६१ नाभ्यां त्रिवयस्त्रिवलिनम्रवलोमशं च वृत्तौ घनावविषमौ कठिनावुरस्यौ। रोमप्रवर्जितमुरो मृदु चांगनानां ग्रीवा च कंबुनिचितार्थसुखानि धत्ते ॥ ॥
त्रिवेति। योषितो मध्ये मध्यभागे मध्यभागं त्रिवलिनाथं स्वामिनं वलित्रयोपविष्टं वलित्रययुक्तमित्यर्थः अरोमशं रोमरहितं॥ तथा च॥ मध्यं वलि
त्रयचितं सुस्पर्शं रोमवर्जितम्। यस्याः सा राजमहिषी कन्या नास्त्यत्र संशयः। घनाविति। उरसि भवावुरस्यौ स्तनौ वृत्तौ परिवर्तुलौ घनौ संततावविष
मौ तुल्यौ कठिनौ कर्कशौ॥ तथा च। स्तनौ सुवर्तुलौ धन्यौ संततौ कठिनौ तथा अरोमौ चातिरहितौ पुत्रसौख्यधनप्रदौ॥ रोमप्रवर्जितमिति। अं
गनानां स्त्रीणामुरो वक्षो रोमवर्जितं रोमरहितं मृदु सुस्पर्शं च शुभम्॥ तथा च॥ वक्षो विलोमः सुस्पर्शो विस्तीर्णः पतिसौख्यदः। सिराततश्च
विषमो वक्षिप्यायासशोकदः। ग्रीवा चेति। ग्रीवा शिरोधरा कंबुनिचिता वलित्रयोचितार्थान् सुखानि च धत्ते ददाति॥ तथा च गर्गः॥ स्थिरा त्रिरेखा
लवी रोपपन्ना स्निग्धा सुमांसोपचिता सुवृत्ता। न चातिदीर्घा च लघ्वंगुला च ग्रीवा च दीर्घा भवतीह धन्या॥ अथाधरदंतलक्षणमाह॥ ह
बंधुजीवकुसुमोपमोऽधरो मांसलो रुचिररूपबिंबभृत्। कुंदकुड्मलनिभाः समा द्विजा योषितां पतिसुखामितार्थदाः॥ अधर इति। अधर ओष्ठः
बंधुजीवकुसुमोपमः बंधुजीवपुष्पसदृशोऽतिलोहित इत्यर्थः मांसलो मांसोपेतो रुचिरबिंबरूपभृत् रुचिरस्य दीप्तियुक्तस्य [illegible] बिं
बफलस्य तुल्यं रूपं बिभर्ति धारयति॥ तथा च॥ अधरो बिंबसंकाशो मांसलोऽस्फुटितस्तथा। यस्याः सा राजमहिषी कुमारी नात्र संशयः। कुंद
कुड्मलेति। द्विजाः दंताः कुंदकुड्मलनिभाः कुंदः पुष्पविशेषः तस्य कुड्मलानि कलिकाः तन्निभाः तत्सदृशाः समाः तुल्याः येषां स्त्रीणां प
तिसुखं भर्तृसुखं अमितमपरिमितं प्रभूतमर्थं धनं च दधाति॥ तथा च गर्गः॥ तीक्ष्णाग्रा वृत्ताः सुसमा दृढाश्च सुभाग्रगा लेंदुसमानवर्णाः निरंतराः
स्त्रीषु भवंति यस्या द्विजास्तथा येरजतप्रकाशाः॥ तथा च समुद्रः॥ द्वात्रिंशद्दशना यस्याः सर्वे गोक्षीरपांडुराः सर्वे शिखरिणः स्निग्धा राजभार्या २६१
च सा भवेत्॥ अथ वदननासिकादृशां लक्षणमाह॥ दाक्षिण्ययुक्तमशठं परपुष्टहंसवल्गुप्रभाषितमदीनमनल्पसौख्यं। नासा समा
समपुटा रुचिरा प्रशस्ता दृङ् नीलनीरजदलद्युतिहारिणी च॥ प्रभाषितं वचनं दाक्षिण्ययुक्तं मानुकूल्यसंयुक्तं अशठमशाठ्यं शाठ्यभावरहितं।

परपुष्टः कोकिलः हंसः पक्षिविशेषः तत्सदृशं वल्गुरम्यं। तथाचादीनं दैन्यरहितं यदि भवति तदा नाल्पसौख्यं च भूतसौख्यदम् ॥ तथाच गर्गः॥
हंसस्वरा दुंदुभिनेमिघोषमेघस्वनाः शंखनिनादघोषाः मयूरचक्रप्रतिमाः स्वनाश्च स्त्रियस्तथा कोकिलतुल्यशब्दाः॥ काकश्च चक्रा ह्यथ किंकिनी
घुसमस्वनाथांश्च भवंति नार्यः सर्वाः प्रशस्ता धनपुत्रवत्यो भवंति धर्मानुरताः सदांताः ॥ नासासमेति। नासा नातिकाससमास्यपुष्टा समा समपुट
नासा सौभाग्यदा सताद्दृगिति दृष्टपुष्टिः नीलनीरजद्युति हारिणी दृष्टिः प्रशस्ता नोत्संगते नातिपृथू रम्ये शस्ते भ्रुवौ बालशशांकवक्त्रे अर्धेंदुसंस्था
नमरोमशं च शस्तं ललाटं। ननतं नतुंगं भ्रुवौ रोमसंगते न संश्लिष्टे नातिपृथू विस्तीर्णे विलंबे नातिसंगते भ्रुवौ यस्याः कुमार्याः तां महाराज्ञीं विनि
र्दिशेत्। अर्धेंदुसंस्थानमिति। ललाटं मुखपृष्ठमर्धेंदुसंस्थानमर्धचंद्राकारमरोमशं रोमरहितं ननतं ननिम्नं नतुंगं नोच्चं समं शस्तं प्रशस्तमित्य
र्थः॥ तथाच॥ नोन्नतं न च निम्नं वा सिरारोमविवर्जितम्। अर्धचंद्राकृतिं साध्यं ललाटं शस्यते स्त्रियः॥ अथ कर्णकेशशिरोलक्षणमाह ॥
कर्णयुग्ममपि युक्तमांसलं शस्यते मृदु समाहितं समम्। स्निग्धनीलमृदुकुंचितैकजा मूर्धजाः सुखकराः समं शिरः ॥ कर्णयुगः अन्वयम
पि युक्तमांसलमनिर्मांसमित्यर्थः मृदु कोमलं समं तुल्यं समाहितं संलग्नं शस्यते स्तूयते॥ तथाच॥ नातिलंबौ स्फुटौ तुल्यौ संलग्नौ युक्तमां
सलौ। कर्णौ यस्याः स्मृता सा तु राजभार्या न संशयः॥ सुस्निग्धेति। मूर्धजाः केशाः स्निग्धा निर्मला नीला अतिकृष्णवर्णाः मृदवः कोमलाः कुंचिताः
कुटिलाः एका एकरोमकूपभवाः सुखकराः सुखं कुर्वंति॥ तथाच॥ सुस्निग्धा नीलवर्णाश्च मृदवः कुंचिताः कचाः शस्यंते योषितां नित्यं
धनपुत्रप्रदायकाः॥ समं शिरः शिरः सिमं न निम्नं नोन्नतं सुखकरमेव। नोन्नतमथवा निम्नं शिरः सौख्यप्रदं स्मृतम् ॥ ॥ अथ हस्तपा
दयोर्लक्षणमाह ॥ भृंगारासनवाजिकुंजररथश्रीवृक्षयूपेषुभिः मालाकुंडलचामरांकुशयवैः शैलैः ध्वजैः तोमरैः। मत्स्यस्वस्तिक
वेदिकाव्यजनकैः शंखातपत्रांबुजैः पादे पाणितलेथवा युवतयो गच्छंति राज्ञीपदम् ॥ भृंगारो जलभांडं प्रसिद्धं। आसनं पीठं, वाजी
तुरगः कुंजरो हस्ती। रथः प्रसिद्धः श्रीवृक्षो बिल्वः यूपो यज्ञस्तूपः इषुः शरः एतैः चिह्नैः तथा माला स्रक् कुंडलं कर्णाभरणं। चामरं वालव्यजनं

अंकुशः प्रसिद्धः यवो यवाकारः एतैरपि। शैलः पर्वतः ध्वजः पताकारूपः वस्त्रपटनिर्मितातोरणाः प्रसिद्धमेव। एतैरपि। तथा मत्स्यो मीनः स्व
स्तिकः चित्रविशेषः वेदिका वेदी चतुरस्रा मध्यक्षामाः व्यजनकं तालवृन्तम् एतैरपि शंखः प्रसिद्धं। आतपत्रं छत्रम् अंबुजः पद्मः एतैः भृंगा
रादिभिः चिह्नैः पादचरणतले हस्ततले वा स्थितैर्युवतयः स्त्रियो गच्छंति राज्ञीपदं राज्ञीस्थानं गच्छंति प्राप्नुवंति ॥ तथा च गर्गः॥ मत्स्यः समुद्रो
वसुधा धनं च यूपस्तथा व्यंजनतोरणं च। छत्रं यवः पद्ममथांकुशं च सिंहो यवः स्वस्तिक एव वापी॥ कूर्मः पताका मकरः पुमांश्च दंडः स
रित्पूर्णघटो रथश्च। पाणिस्थ एतानि भवंति यासां तासामेकं तथा द्वे च बहूनि वापि॥ अत्यंतसौख्यं बहुपुत्रतां च स्त्रीणां तथा लक्षणमादिशेत
यस्याः पाणितले चक्रं कपोतो ध्वजोऽपि वा। श्रीवत्सं कमलं शंखं विमानं चामरं तथा। अंकुशश्चैव माला च यस्याः हस्ते तु दृश्यते। एकं सा जनये
त्पुत्रं राजानं पृथिवीपतिम्। यस्याः पाणितले दृश्यं कोष्ठागारः सतोरणः अपि दासकुले जाता सा राजमहिषी भवेत् ॥ अथ हस्तलक्षणमा
ह ॥ निगूढमणिबंधनौ तरुणपद्मगर्भोपमौ करौ नृपतियोषितस्तनुविकृष्टपर्वांगुली। न निम्नमतिनोन्नतं करतलं सुरेखान्वितं करोत्यवि
विधां चिरं सुतसुखार्थसंभोगिनीम् ॥ करौ हस्तौ निगूढमणिबंधौ निगूढौ अनुल्बणौ मणिबंधनौ प्रकोष्ठौ ययोः मणिबंधन [illegible]
मूलमुत्पद्यते। तरुणगर्भोपमा तरुणमभिनवं यत्पद्मं कमलं तस्य गर्भमभ्यंतरं तेन तुल्यौ तत्सदृशौ। तथा तनुविकृष्टपर्वांगुली तन्वाः सूक्ष्मा
यथा अंगुल्याः करशाखा तथा विकृष्टानि दीर्घाणि पर्वाणि यासामंगुलीनां ताः च विद्यंते ययोः तथाभूतौ करौ ययोः नृपतियोषितः राजपत्न्या
भवतः करतलं हस्ततलं न निम्नं नातिनीचं नात्युन्नतमुच्चं सुरेखान्वितं शोभनाभिः रेखाभिरन्वितम् युक्तं। चिरं चिरकालं अविधवं भर्तृसंयु
तां सुतसुतार्थसंभोगिनी पुत्रसुखधनसंभोगभुक्तां तथाविधां हस्ततलां कन्यकां करोति। तथा च। निगूढमणिबंधौ तु पद्मगर्भसमप्रभौ
विकृष्टांगुलिपर्वाणी करौ नृपतियोषितः। नोच्चं न निम्नं तु समं सुरेखाभिः समन्वितम् करं यस्या भवेन्नार्याः सा राजमहिषी स्मृता ॥ ॥
अथ दक्षाह ॥ मध्यांगुलिर्या मणिबंधनोत्था रेखा गता पाणितलेंगनायाः ऊर्ध्वा स्थिता पाणितलेऽथवा यां पुंसोऽथवा राज्यसुखाय सा स्यात् ॥

२६२

अंगनायाः स्त्रियः पाणितले हस्ततले यारेखा मणिबंधनोत्थाहस्तमूलाज्जाता मध्यांगुलिं यावद्गता। अथवा या रेखा पादतले चरणतले
ऊर्ध्वस्थिता पुंसः पुरुषस्य। अथवैवंविधे हस्ततले पादतले वा भवति सा राज्यसुखाय स्यात् राज्यसुखं करोतीत्यर्थः मणिबंधनसंभूता मध्यां
गुलिसमाश्रिता रेखा मणितले यस्याः सा कन्या राज्यभागिनी ॥ अथ चदयाह ॥ कनिष्ठिकामूलभवा गता या प्रदेशिनीमध्यमिकांतरालं
करोति रेखा परमायुषः सा प्रमाणं न्यूनात् तदूनमायुः ॥ या रेखा कनिष्ठिकातः मूलभवा कनिष्ठामूलादुत्पन्ना प्रदेशिन्या अंगुष्ठसमीपवर्ति
न्या मध्यमिकायाः चांतरालमध्यगता प्राप्ता सा रेखा परमायुषः प्रमाणं करोति विंशत्यधिकं सा वर्षशतं जीवनीत्यर्थः यद्यूना भवति तदायुष्
नमेव भवति। रेखानुसारेणायुः स्वबुद्ध्या स्वहनीयमिति। तथा च। कनिष्ठामूलसंभूता गता मध्यमिकांतरम् प्रदेशिन्याः च सा रेखा यस्याः सा दीर्घजी
विनी ॥ अथापत्यज्ञानमाह ॥ अंगुष्ठमूले प्रसवस्य रेखाः पुत्रा बृहत्यः प्रमदास्तु तन्व्यः अछिन्नमध्या बृहदायुषां ताः स्व[illegible]तेल[illegible]ल्पायुषि
न्न लघुप्रमाणाः ॥ अंगुष्ठमूले प्रसवस्य पुत्रा रेखा भवंति। यावत्यः रेखाः तत्र तावंतः प्रसवाः तत्र या रेखा बृहत्याः स्थूलास्ते पु[illegible]ाः याः चतव्याः
स्तनुल्याः ताः प्रमदाः स्त्रियः याश्च रेखा अछिन्नमध्या अछिन्नानि अछिन्नखंडानि मध्यानि यासां ता बृहदायुषो दीर्घजीविनो विज्ञेयाः केचिदछिन्नस्थ
लाद्भूतिपठंति, छिन्नमध्याद्विछिन्ना लघुप्रमाणाः अतिस्वल्पाः स्वल्पायुषामतिजीविनां विज्ञेयाः ॥ तथा च ॥ अंगुष्ठमूले या रेखाः स्थूलाः पुत्राः
चते मताः स्वक्ष्माः दुहितरः ताम्योविछिन्नाः स्वल्पजीविनः। वामहस्ते तु नारीणां पुरुषाणां च दक्षिणे। चिह्नं निरूपयेद्धीमान्समुद्रवचनं यथा ॥
एवं च शुभलक्षणान्युक्त्वा अधुनाहमशुभलक्षणानि वक्ष्यामीत्याह ॥ इतीदमुक्तं शुभमंगनानां मतो विपर्यस्तमनिष्टमुक्तम् विशेषतो
निष्टफलानि यानि समासतस्तान्यनुकीर्तयामि ॥ इतिशब्दः प्रकारायइतीदं प्रकारमिदमंगनानां स्त्रीणामुक्तं शुभं कथितम् अतोस्माद्वि
पर्यस्तं विपरीतं यत्तदनिष्टं अशुभमुक्तं यानि विशेषतो तीतिवानिष्टफलान्यशुभफलानि लक्षणानि तानि समासतः संक्षेपतः अनुकीर्तयामि
कथयामि ॥ तत्रादावेव पादयोरनिष्टलक्षणमाह ॥ कनिष्ठिका वा तदनंतरा वा महीं न यस्याः स्पृशति स्त्रियाः स्यात् गताथवांगुष्ठमतीतवः

स्यात्प्रदेशिनी सा कुलटा तिपापा ॥ यस्याः स्त्रियः अंगनायाः पादकनिष्ठा तदनंतरा वानामिका वा मही भूमिं न स्पृशति। अथवा। यस्याः प्र
देशिनी अंगुष्ठमतीत्य यस्याः प्रदेशिनी सा कुलटा असाध्वी तिपापा स्यात् भवेत्॥ तथाच॥ कनिष्ठा पादयोर्यस्या भूमिं स्पृशति नांगुलिः नसाति
ष्ठति कौमारी बंधकीं तां विनिर्दिशेत्। पादप्रदेशिनी यस्या अंगुष्ठादतिरिच्यते कुमारी कुरुते जारं यौवनस्था तु किं पुनः ॥ ॥ अथ जंघा गुल्फ
उदरलक्षणमाह ॥ उद्बद्धाभ्यां पिंडिकाभ्यां सिरालेश्लक्के जंघे रोमशे चातिमांसे वामावर्त्तं निम्नमल्पं च गुह्यं कुंभाकारं चोदरं दुःखितानां ॥
जंघे जानुनोरधोभागौ उद्बद्धाभ्यां ऊर्ध्वलग्नाभ्यां पिंडिकाभ्यामुपलक्षिते जंघापश्चिमभागः पिंडिका शब्दवाच्यः तथा सिराले सिरासंततेश्लु
क्ष्णे निर्मांसे रोमशे रोमबहुले तथा चातिमांसे वा रोमशे चोध्वपिंडके यस्याः सा दुःखिता। नित्यं पुत्रवित्तविवर्जिताः॥ वामावर्त्तमिति। गुह्यं भगं वा
मावर्त्तं वामावर्त्तैः रोमभिः संयुक्तं निम्नमनुह्यं चातिसंकटं दुःखितानां भवति॥ तथाच॥ वामावर्त्तं भगं यस्याः दीर्घचुन्नी समप्रभः निम्नं वातेन
दोषेणैव श्यास्त्रीत्वं सगच्छति। कुंभाकारमिति। उदरं कुंभाकारं घटाकारं दुःखितानामेव भवति ॥ तथाच॥ लंबोदरी च या कन्या दीर्घोदरसमन्वि
ता। भग्नोदरा च दुःखार्त्ता दासभावमवाप्नुयात् ॥ अथ ग्रीवालक्षणमाह ॥ ह्रस्वयातिनिःस्वता दीर्घया कुलक्षयम् ग्रीवि[illegible]कया
योषितः प्रचंडता ॥ ग्रीवया शिरोधरया अतिह्रस्वया अतिप्रमाणहीनया निःस्वनता निधनता भवति। अतिदीर्घया प्रमाणाधिकया कु
लक्षयो वंशविनाशः पृथुत्वया पृथुत्वमत्रया च पटग्रीवया योषितः स्त्रियः प्रचंडता क्रूरता भवति॥ तथाच॥ कुलक्षयकरी दीर्घा ग्रीवा ह्रस्वा
तु निर्धना। पृथुकया प्रचंडत्वं ग्रीवया योषितो वदेत् ॥ अथ नेत्रगंडयोर्लक्षणमाह ॥ नेत्रे यस्याः केकरे पिंगले वा सा दुःशीला श्या
वलोले क्षणाच। कूपौ यस्याः गंडयोः चास्मिते मुनिः संधिपृष्टं बंधकीं तां वदंति ॥ यस्याः स्त्रियः नेत्रे चक्षुषी केकरे काचले पिंगले कपिले

वा सा दुःशीला असाध्वी भवति। तथा श्यावे श्यामवर्णे लोले चंचले चपले चलमाने ईक्षणे चक्षुषी यस्याः सापि दुःशीला भवति॥ तथाच। पा
रावताक्षी या कन्या काचराक्षी तथापि वा उद्भ्रांता गमदक्षी च तां कन्यां वर्जयेद्बुधः॥ कूपौ यस्या इति॥ यस्या योषितः स्मिते सुहसिते सुगंडयोर्मुखगंडयोः

कूपौ गर्त्ताकारौ भवतः छिद्रे दृश्येते तां स्त्रियं निःसंदिग्धमसंशयं बंधकीं साधाधीं वदयंति कथयंति ॥ तथाच ॥ यस्यास्तु कूपसमानावाजायेतेगं
डकूपकाः भर्त्तारं हंति साहि जनैकत्र रमते चिरम् ॥ तथाच पराशरः ॥ यस्याः हसंत्या दृश्यंते कूपका गंडयोर्द्वयोः स्थूलकाकारगंडावाविष्ठिता
स्यामहाशनाः एकापि यस्या न महीं संस्पृशेच्चरणांगुली। तलं मध्यं मध्यं यस्या अधमां तां विनिर्दिशेत् ॥ अथ यदथाह ॥ प्रविलंबि निदेवरं ल
लाटं श्वशुरं हंत्युदरं स्फिजोः पतिं च। अतिरोमचयान्वितोत्तरोष्ठी न शुभा भर्तुरतीव याच दीर्घा ॥ ललाटे मुखपृष्ठभागे प्रविलंबिनि लंबमाने देवरं भ
र्तुर्भ्रातरं हंति मारयति। उदरे प्रविलंबिनि श्वशुरं भर्तुः पितरं हंति। स्फिजोः प्रविलंबमानयोः पितरं भर्त्तारं हंति ॥ तथाच ॥ स्त्रीणां यस्याः प्रलंबं तेल
लाटमुदरं स्फिजम् त्रीश्च सा पुरुषान् हंति देवरं श्वशुरं पतिम् ॥ अतिरोमचयान्वितोत्तरोष्ठीति। अतिरोमचयेन रोम्णां संचयेनान्वितः संयुक्तः उत्तरो
ष्ठो यस्याः सा भर्तुः पत्युः न शुभा। अतीव याच दीर्घा त्युच्चा सापि भर्तुर्न शुभा ॥ तथाच ॥ श्मश्रुयुक्तापि या कन्या यातिदीर्घा मलाहता। दासमभ्य[illegible] ॥
प्नोति देहदोषेण सांगना ॥ अथ स्तनकर्णदंतलक्षणमाह ॥ स्तनौ सरोमौ मलिनोल्बणौ च क्लेशं ददाते विषमौ च कर्णौ। स्थू[illegible]ला करालावि
षमाः च दंताः क्लेशाय चौर्याय च कृष्णमांसाः ॥ स्तनौ सरोमौ रोमसंयुक्तौ मलिनौ कृष्णवर्णौ उल्बणौ विषमावतुल्यौ क्लेशं दुःखं ददाते दधतः
तथाच ॥ रोमयुक्तौ स्तनौ यस्या मलिनौ च सिरा ततौ। दुःखिता सा भवेन्नारी नित्यं प्रव्रजिता तथा। एवंविधौ च कर्णौ सरोमौ मलिनावुल्बणौ विषमाव
तुल्यौ च क्लेशमेव दधाते ॥ तथाच ॥ सिरायुक्तौ न च समौ कर्णौ दारिद्र्यभाजनौ। स्थूलाः करालाद्वृति दंतारदाः स्थूला अतिविस्तीर्णाः करालाः दी
र्घाः करालाविकरालाबहिर्निर्गताश्च विषमा अतुल्याः क्लेशाय भवंति। कृष्णमांसश्च दंताः चौर्याय भवंति सा स्त्री चौरी भवतीत्यर्थः ॥ तथाच ॥
स्थूलाकरालाविषमाः कृष्णमांसबहिर्गताः दंता दुःखप्रदा ज्ञेयाः वैधव्यायासकारिणः ॥ ॥ अथ हस्तलक्षणमाह ॥ क्रव्याददर्पैर्वृक
काककंकैः सरीसृपोलूकसमानचिह्नैः शुष्कैः सिरालैः विषमैश्च हस्तैः भवंति नार्यः सुखवित्तहीनाः ॥ हस्तैः करैः क्रव्यादादिरूपैः
चिह्नैः चिह्नितैः क्रव्यादमांसाशिनो विडालादिकादयः वृकः प्राणी काककंकौ प्रसिद्धौ पक्षिणौ। सरीसृपाः प्राणिनः कीटाः उलूकः पक्षी तत्सम
नैः त त्स दृ शैः चि ह्नैः शु ष्कैः नि र्मां सैः सि रा लैः सि रा सं त तैः वि ष मै र स मै श्च नार्यः

सुखवित्तहीनाः सुखैर्धनैश्च विरहिता वर्जिताः च भवंति॥ तथाच॥ कूष्मादसदृशैश्छिन्नैः ककोल्लूकसमप्रभैः शुष्कैः करालैर्विषमैः करटुः खाश्रिताः स्त्रियः॥ अन्यदप्याह॥ यादृग्तरोष्ठेनसमुन्नतेन रूक्षाग्रकेशी कलहप्रिया सा। प्रायो विरूपासु दोषाः यत्राकृतिस्तत्र गुणावसंति॥ यातुस्त्रीसमुन्नतेनोत्तरेणोत्तरोष्ठेनोपलक्षिता रूक्षाग्रकेशी रूक्षाग्रकेशा यस्याः सा नित्यं कलहप्रिया कलहकारी भवति॥ तथाच॥ यादृग्तरोष्ठेनोच्चेन केशाग्रंस्नेहवर्जितम् यस्याः सा दुःखिता नित्यं भर्तुर्निधनकारिणी॥ प्रायो विरूपास्विति॥ प्रायो बाहुल्येन विरूपासु विगतरूपासु स्त्रीषु दोषा भवंति यत्र यस्याः साकृतिः शोभना भवति तत्र तस्यां गुणा वसंति॥ अधुनाशरीरे क्षेत्रविभागमाह॥ पादौसगुल्फं प्रथमं प्रदिष्टं जंघेद्वितीयं च सजानुचक्रे मेढ्रोरुमुष्कं च ततः तृतीयं नाभिकटिं स्योत्तिचतुर्थमाहुः॥ उदरं कथयंति पंचमं हृदयं षष्ठमतिस्तनान्वितम् अथसप्तममांसजत्रुणी कथयंत्यष्टमकोष्ठकंदरे॥ नवमं नयने च सभ्रुणी सललाटं दशमं शिरस्तथा अशुभेष्व शुभं दशाफलं चरणाद्येषु शुभेषु शोभनम्॥ पादौसगुल्फाविति। पादौ चरणौ सगुल्फौ गुल्फसहितौ प्रथममाद्यं दशाभागं च शुभाशुभं च शुभाशुभचिह्नितं प्रदिष्टमुक्तम् जंघे सजानुचक्रे जानुचक्राकारसहिते द्वितीयं दशभागमुक्तं मेढ्रं लिंगम् ऊरू [illegible] मुष्कौ वृषणौ ततोनंतरमेतात्त्दशाभागा नाभिः कटिश्चेति चतुर्थं दशभागमाहुः कथयंति। उदरमिति। उदरं दशाभागं कथयंति प्रवदंति मुनयः हृदयं [illegible]स्तनसंयुक्तम् षष्ठं दशाभागं। अंसौ द्वौ ककंदरा ग्रीवा एते अष्टकंदरे ष्टमं दशाभागं कथयंति। नयने नेत्रे सभ्रुणी भ्रूसहिते नवमं दशाभागं शिरोबुधिसललाटं ललाटसहितं दशमं दशाभागं आ[illegible]र्दशमकारणे। अथयद्यपि समानेनार्थेन तथापि परमाद्भुः प्रमाणेन द्वादशवार्षिकी द्वादशवार्षिक दशांपरिकल्प्य विवादः कर्तव्यः ज्ञात्वा युक्तप्रमाणेन एतेषु क्षेत्रविभागेषु चरणाद्येषु वा तत्प्रभृति ष्व शुभेषु शुभमनिष्टं दशाफलं शुभेषु शोभनमिति॥ एतदुक्तं भवति। यत्रात्र [illegible] मांसविहीनं सिरावनद्धं च तदनिष्टं प्रोक्तम् विपरीतमतः शुभम् सर्वमित्यनेनक्रमेणसर्वांगः अशुभलक्षणानि तद्दशाभागमशुभं यत्र शुभानि तत्शोभनं यत्र व्यामिश्राणि तन्मध्यम् इतिशुभम्॥ ॥ ॥ इति भट्टोत्पलविरचितायां संहितावित्तौ कन्यालक्षणं नामाध्यायाः सप्ततितमः॥ ६८॥ अथवस्त्रच्छेदलक्षणं व्याख्यायते॥

२६४

रितियावत् रत्नैर्मणिभिर्भूषितमलंकृतम् उदयमुद्भवं श्रेष्ठम् इति ॥ तथा चवर्गः ॥ हंसतः कुक्कुटपदैश्च मयूरैः सारसैस्तथा निचितं पट्टसंक्षेत्रं शुक्लं मुक्ता
फलान्वितम् तदातपत्रं नृपतेः कल्याणं विजयावहम् ॥ अथ युवराजनृपतिपत्नीसेनापतिदंडनायकानां छत्रलक्षणमाह ॥ युवराजनृपति
पत्न्योः सेनापतिदंडनायकानां च दंडोर्धपक्षहस्तः कार्यः ॥ अर्धः पंचमो हस्तो यत्र हस्तचतुष्टयं सार्धमित्यर्थः समपंचहस्तोर्धविस्तारः समानां प
चानामर्धहस्तो विस्तारो यस्य हस्तद्वयं सार्धं विस्तीर्णमित्यर्थः ॥ अन्येषां राजपुरुषाणां छत्रलक्षणमाह ॥ अन्येषामुक्तं छत्रं प्रसादपट्टैर्विभूषि
तशिरस्कम् व्यालंबिरत्नमालं छत्रं कार्यं ललामपूरम् ॥ अन्येषां युवराजातिवर्जितानां मायूरं मयूरपक्षनिचितं उक्तं छत्रमातपनिवारणं छत्रं कार्यं
प्रसादपट्टैर्विभूषितशिरस्कम् प्रसादपट्टैः पट्टलक्षणोक्तैर्विभूषितमलंकृतं शिरो यस्मिन् छत्रे तत्तथा व्यालंबमाना रत्नमाला यत्र तत् पि
अथ राजपुरुषवर्जितानामन्येषां नराणां ब्राह्मणानां च छत्रलक्षणमाह ॥ अन्येषां तु नराणां शीतातपवारणं तु चतुरश्रम् समवृत्तदंडं स्तुतं छ
त्रं कार्यं तु विप्राणाम् ॥ अन्येषां सामान्यानां नराणां पुरुषाणां शीतातपनिवारणं शीतमातपं च धारयति रक्षतीति तत् छत्रं चतुरश्रं चतु[ष्को]णं कार्यम् वि
प्राणां ब्राह्मणानां समवृत्तं समंतात्परिवर्तुलं दंडयुक्तं छत्रं कार्यमिति ॥ ॥ इति भट्टोत्पलविरचितायां संहिताविवृतौ छत्रलक्षणं नामा
ध्यायः एकसप्ततितमः ॥ ७१ ॥ अथ स्त्रीप्रशंसाध्यायो व्याख्यायते ॥ तत्रादावेव प्रयोजनप्रदर्शनार्थमाह ॥ जित्वा धरित्र्याः पुरमे

शयने

व सारं पुरे गृहं सद्मनि चैकदेशः तत्रापि शय्या शयने वरस्त्री रत्नोज्ज्वला राज्यसुखस्य सारम् ॥ धरित्र्याः पृथ्व्या जये विजये सति पुरमेक
सारं समस्तां वसुधां जित्वा ततः पुरमात्रं सारः तत्र च पुरे गृहं वेश्म एकमेव सारः तस्मिन् सद्मनि गृहे च एकदेशः कश्चित् सारः श्रेष्ठः तत्रापि तस्मि
न्नपि गृहैकदेशस्य शय्या आस्तरणं सारः तस्मिं शयने वरस्त्री प्रधाना युवतिः सा च रत्नोज्ज्वला मणिकनकभूषिता एतन्मात्रं राज्यसुखस्य सा
रः इति। अन्यत्सर्वमसार इत्यर्थः ॥ अथ स्त्रीप्रशंसार्थमाह ॥ रत्नानि विभूषयति योषा योषा भूष्यंते वनिता न रत्नकांत्या। चेतो वनिता
हरंत्यरत्ना नो रत्नानि विनांगनांगसंगम् ॥ रत्नानीत्येतत्कर्मपदे योषाः स्त्रियो रत्नानि विभूषयंति शोभायंते वनिताः स्त्रियः पुनः नरत्नकांत्या

मणिरिदीत्याशूघंतेयतोवनिताः अरत्नाः रत्नवर्जिता चेतोमनः हरंति रत्नानि पुनरंगनांगसंगं विना चेतो न हरंति युवः स्त्रियः अंगेनश्लिष्टानि तावच्चित्तह
राणि न भवंतीति ॥ अन्यदप्याह ॥ आकारं विनिगूहतां रिपुबलं जेतुं समुत्तिष्ठतां तं तं चेचिंतयतां कृताकृतशतव्यापारशाखाकुलम् मंत्रिप्रोक्तनि
षेविनां क्षितिभुजां मार्गाकिनां सर्वतः दुःखांभोनिधिवर्तिनां सुखलवः कांत्या समालिंगनम् ॥ क्षितिभुजां राज्ञां दुःखांभोनिधिवर्तिनां कष्टसमुद्र
पतितानां कांतासमालिंगनं वल्लभापरिष्वजनं सुखलवः सुखलेशः कीदृशं राज्ञामाकारं विनिगूहताम् अंतः चेतसि को सुखो भयहर्षादिरूपविका
रः तत्तथाभूतमाकारं विनिगूहतां प्रच्छादयतां तथारिपुबलं शत्रुबलं जेतुं अभिभवितुं समुत्तिष्ठताम् प्रयत्नं कुर्वतां तं तं चेचिंतयतां ध्यायताम् की
दृशं तंत्रं कृताकृतशतव्यापारशाखाकुलम् व्यापाराणां कर्मणां या शाखाः विस्तारः कृतश्चाकृतश्च कृताकृताः कृताकृताश्च शतशो व्यापा
राः कर्माणि त एव शाखाः ताभिराकुलं व्याप्तम् किलवाचकं तंत्रं शतशाखाकुलं भवति मंत्रिप्रोक्तनिषेवनम् मंत्रिभिः सचिवैः यत्प्रोक्तं कथि
तं नीतिशास्त्रविहितनियमस्तदनुसेविनां तत्कुर्वतां मंत्रिमतानुसारेण व्यवहारतां सर्वतः सर्वस्मात् यत्र दद्याशंकिता श्रांकमानानां दुः
खांभोनिधिवर्तिनां कांतासमालिंगनं सुखलवाइति ॥ अन्यदप्याह ॥ आतंह दृष्टं स्पृष्टं स्मृतमपि नृणां ह्लादजननं न रत्नं स्त्रीभ्योऽन्य
त्क्वचिदपि कृतं लोकपतिना। तदर्थं धर्मार्थौ सुतविषयसौख्यानि च ततो गृहे लक्ष्म्यो मान्यः सततमबला मानविभवैः ॥ लोकपतिना
प्रजापतिना स्त्रीभ्यो योषिद्भ्यः अन्यत् रत्नं द्वितीयं न क्वचिदपि रत्नं कृतम् केवलमेव स्त्रीरत्नमित्यर्थः स्त्रीरत्नं कीदृशं आतं नाममात्रेण श्रुत
मथाह्लादकरम् दृष्टमवलोकितं स्पृष्टमवयवैकदेशेन स्मृतं चिंतितमपि नृणां पुंसामाह्लादजननम् सुखकरमाह्लादकरोतीत्यर्थः तद
र्थं धर्मार्थौ धर्मश्चार्थश्च तौ धर्मार्थौ धर्मार्थौ तदर्थं क्रियेते ततः तस्याः सकाशात् सुतविषयसौख्यानि भवंति सुतः पुत्रः विषयसौख्यानी
द्रियसौख्यानि च भवंति अबलाः स्त्रियः गृहे वेश्मनि लक्ष्म्यः श्रियः अतो मानविभवैः मानेन पूजया विभवेन ऐश्वर्येण एतैर्बहुविधैः सततं
सर्वकालं मान्याः पूज्याः ॥ अन्यदप्याह ॥ येष्वंगनानां प्रवदंति दोषान्वैराग्यमार्गेण गुणान्विहाय। ते दुर्जना मे मनसो वितर्कः सद्भाववाक्या

मिनतानि तेषाम् ॥ येनराः अंगनानां स्त्रीणां गुणान्विता येगुणाविद्यमानान् त्यक्त्वा वैराग्यमार्गेण विना शब्दारेण दोषान्प्रवदंति कथयंति ते दु-
र्जनाद्भुतिमेमनसः चिंतयाविर्तकः निश्चयः तेषां दुर्जनानां नतानि संभववाक्यानि परमार्थवचांसि न भवंति ॥ अथ यदपि प्रशंसार्थमाह ॥
प्रभूतसत्यं कलबोंगनानां दोषोऽस्ति यो नाचरतो मनुष्यैः दार्ष्येन पुंभिः प्रमदा निरस्ता गुणाधिकास्ता मनुना च चोक्तम् ॥ अंगनानां स्त्रीणां क-
तरो दोषोऽस्ति कः न धानो वशो विद्यते यः आदावेव मनुष्यैः पुरुषैर्नाचरितो नानुष्ठितः एतत्सत्यं परमार्थं विरक्ता अपि भवंतो ब्रूत कथयत अ-
सौ दोषः परदारागमनादिकः प्रथमं पुरुषैराचरितः पश्चान्नारीभिः तेषां सकाशाच्छिक्षितः पुंभिः मनुष्यैर्दार्ष्ट्येन दृष्टत्वेन निर्लज्जतया प्रमदाः स्त्रि-
यो निरस्ता दोषमार्गे क्षिप्ताः यतः ताः च स्त्रियः पुरुषाणां सकाशाद्गुणाधिकाः अत्रास्मिन्नर्थे मनुना धर्मशास्त्रकर्त्रा तासामेव साधान्यं चोक्तम् कथि-
तम् ॥ तदाह ॥ समस्तासां पदः शौचं गंधर्वः शिक्षितां गिरम् अग्निश्च सर्वभक्षत्वं तस्मान्निष्कसमाः स्त्रियः ॥ तासां स्त्रीणां सोमश्चं-
द्रमसा शौचं शुद्धिं दददयत् गंधर्वः देवयोनयः शिक्षितां श्रेष्ठामाह्लादकरीं गिरं वाचं दददत् अग्निः हुताशनः सर्वभक्षत्वं सर्वांशित्वं ददत्
तस्माद्धेतोः स्त्रियो निष्कसमाः सुवर्णतुल्याः सर्ववर्णगामिन्योऽपि शुद्धा भवंतीत्यर्थः ॥ अथ यत्प्राधान्यमाह ॥ ब्राह्मणाः पादतो मेध्या
गावो मेध्याश्च पृष्ठतः अजाश्वा मुखतो मेध्याः स्त्रियो मेध्यास्तु सर्वतः ॥ ब्राह्मणा द्विजाः पादतो मेध्याः पादाभ्यां शुद्धाः पवित्राः गावाः सुरभ-
यः पृष्ठभागान्मेध्याः अजाः छागाः अश्वाः तुरगाः एतदजाश्वम् मुखतो मुखाद्वक्त्रात् मेध्यम् स्त्रियो योषितः सपत्न्याः सर्वांगेषु मेध्याः प-
वित्राः ॥ अथ यदाह ॥ स्त्रियः पवित्रमतुलं नैता दुष्यंति कर्हिचित् मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति ॥ स्त्रियः योषि-
तः अतुल्यमसमं परं पावनं पवित्रमेताः स्त्रियो न कर्हिचित् न कदाचिद्दुष्यंति दुष्टतां यांति। आसां स्त्रीणां मासि मासि प्रतिमासं रजो रक्तं
समुद्भूतं दुष्कृतानि दुष्टकर्माण्यपकर्षति विनाशयति ॥ अथ यदाह ॥ जामयो यानि गेहानि शपंत्यप्रतिपूजिताः तानि कृत्या-
हतानीव विनश्यंति समंततः ॥ जामिन्यो भर्तुर्भगिन्यः कुलस्त्रियाश्च ताश्चाप्रतिपूजिता असंमानिता यानि गेहानि वेश्मानि शपयंति

२६८

269

अतिशमंत्याक्रोशंते तानि चक्षुत्याहतानीतप्रत्ययाहतानिविनाशितानियथातथासमंततः समंतात् विनश्यंतिविनाशयतिविनाशयंति ॥
अथयदयाह ॥ जायांवास्याज्जनित्रीवासंभवाः स्त्रीकृतोद्भवाणाम् हेष्कृतघ्नाः स्त्रियोनिंदां कुर्वतांवाकुतः शुभम् ॥ जायाभार्यात्तिज्जाया
जायाभवतितस्यांजायतेपुनरितिश्रुतिः तानिस्त्रीमातः स्त्रीकृतः संभवः अंगादंगात्संभवसिहृदयादभिजायसे। आत्मावैपुत्रनामासिसं
जीवशरदांशतमितिश्रुतिः पुत्ररूपेणात्मनएवोत्पत्तिः जायावास्यात्भवेत् जनित्रीमातावाभवेत् नृणांसर्वथास्त्रीकृतः संभवउत्पत्तिः
हेष्कृतघ्नाद्रुतिदुर्जनानामामंत्रणंतयोर्जायाजनित्र्योर्निंदांकुत्सांकुर्वतांवोयुष्माकंकुतः कस्मात् शुभंश्रेयोभवति ॥ अथयदयाह ॥
दंपत्योर्व्यत्क्रमेदोषः समः शास्त्रेप्रतिष्ठितः नरानतमवेक्ष्यंतेतेनात्रवरमंगनाः ॥ दंपत्योर्जायापत्योर्व्यत्क्रमेसतिव्यत्क्रमोनियमः
नरस्यपरस्त्रीगमनम् स्त्रियाः पुरुषगमनंव्यत्क्रमः तस्मिन्योदोषोदुष्टतासशास्त्रेधर्मशास्त्रेदोसमस्तुल्यः प्रतिष्ठितउक्तः यथानरोहि
श्रमनायुष्यंयथान्यस्त्रीनिषेवनमित्यादिसामान्यमुभयोरपिनरः पुनर्गतंदोषंपरस्त्रीगमनादिकंसमवेक्ष्यंते। तेनकारणेनात्रास्मिन्
धारणेंगनायाः स्त्रियः वरंश्रेष्ठंप्रधानागमेत्यर्थः ॥ ॥ अथदारातिक्रमेणप्रायश्चित्तमाह ॥ ॥ वसित्वेलोम्नातुषण्मासान्कृतिन्
खरचर्मणा। दानातिक्रमणेभिक्षांदेहीत्युक्त्वाविशुध्यति ॥ दाराणामतिक्रमणंदारातिक्रमणम् अन्यस्त्रीनिषेवनम् तस्मिन्धारा
तिक्रमणेबहिर्लोम्नाखरचर्मणागर्दभत्वचाबहिर्लोम्नाबाह्येलोमानिकृतानियस्मिंस्तेनषण्मासान्वेष्टिताः प्रावृतशरीराः प्रतिगृहंभिक्षां
देहीतिभिक्षांमेप्रयच्छेत्युक्त्वासंभाष्यततोविशुध्यतिशुद्धिमायाति ॥ अथयदपिस्त्रीप्रशंसार्थमाह ॥ नश्यतेनापिवर्षाणा
मपैतिमदनाशयः तत्राशक्त्यानिवर्त्तंतेनराधैर्येणयोषितः ॥ मदनः कामः चैततेस्मिन्नितिमदनाशयः कामवासनाभिसंस्का
रः अभिलाषः पुरुषाणांशतेनापिवर्षाणामंधानांनापैतिहृदयान्नापसर्पति। यथास्त्रियाः सहसंयोगः पूर्वमासीत्तथासांप्रतंयदि
नभवतितदापुरुषाणांवर्षशतेनापिमदनाशयोनापैतिकिंतुतत्रतस्मिन्कामोपभोगविषयेनराः पुरुषात्रशक्त्याप्रसामर्थ्येननिवर्त्तंतेनिष्टतिं

२६

कुर्वंति योषितः स्त्रियः पुनर्धैर्येण दृष्टत्वेन निवर्त्तंते अनेन स्त्रीणामभिलाषाः शीलता श्लाघाय्यं प्रदर्शितं भवति ॥ अन्यदप्याह ॥ अक्रोधाद्धूर्मसा
धूनां निंदतामनघाः स्त्रियः । मुष्णतामिव चौराणां तिष्ठ चौरेति जल्पताम् ॥ असाधूनां दुर्जनानामनघा अपापाः स्त्रियः योषितः निंदतां
कुत्सां कुर्वतां अक्रोधाद्धूर्म अक्रोधीरता अक्रो आश्चर्ये दार्ढ्यं निर्लज्जता दुर्वसाद दृश्ये यथा चौराणां तस्कराणां मुष्णतां दोषं कुर्वतां यस्यैव मुष्णं
ति तस्यैव पलायमानस्य तिष्ठ चौरेति जल्पतां भाषतां दार्ढ्यं तद्वदिति एवं धर्मशास्त्रोक्तां प्रशंसामुपपन्नस्याधुनास्तुकृतामाह ॥ ॥ कुरुषः
चटुलानि कामिनीनां कुरुते यानि रहसि न तानि पश्चात् अथकृतज्ञतयांगनागताश्च नवपूरुष प्रविशंति सपत्नजिह्वाम् ॥ कुरुषो मनुष्यः का
मिनीनां स्त्रीणां संजातकामानां रहसि निर्जने सुरतकार्याणि चटुलानि चाटूनि प्रियवचांसि कुरुते संभाषते न तानि पश्चादीषदपि तापराधानुं
रोति दौर्जन्यात् अंगनाः स्त्रियाः सकृतज्ञतया शोभनं कृतं सुकृतम् सुकृतं जानातीति सुकृतज्ञा तस्य भावः सुकृतज्ञ तातया सुकृत... आगताश्च
नूतनान्पुरुषान्नवपतीन्नवपूरुष परिहृत्य सपत्नजिह्वामग्निं प्रविशंति । भर्तुरुपकृतं स्मृत्वा तेनैव मरणात्मानमग्निना व्यापादयतीत्यर्थः ॥ ॥
अन्यदप्याह ॥ स्त्रीरत्नभोगोस्ति नरस्य यस्य निःस्वोपि सो प्रत्यवनीपवनीश्वरोसौ । राज्यस्य सारो दनमंगनाश्च त्रस्नानलोद्दीपन चारु शेषं ॥
यत्र नगरस्य पुरुषस्य स्त्रीरत्नभोगः स्त्रीवरत्नं स्त्रीरत्न तया सह संभोग उपभोगो यस्यास्ति विद्यते स पुरुषो निःस्वोपि निर्धनोपि सो प्रत्यवनी
श्वरो सो अहमेवमन्ये यथा सौ राजा कोपि सो प्रत्यवनीश्वरो सौ इति पठंति । यथा संप्रति तस्मिन्नेव काले सो राजा अपि शाह्नः संभावनायां ईश्वर
त्यमागणनायस्मा राज्यस्यैतावत्सारः श्रेष्ठम् अशनं भोजनमंगनाश्च स्त्रियः शेषमन्यद्द्वंधुधनादिकं तृष्णानलस्य तृष्णाग्नेः उद्दीपने ज्वलने
यदा काष्ठनिचयः यतः तेनाग्निमधिकतरं प्रज्वलति ॥ अथ तत्प्रशंसार्थमाह ॥ कामिनीं प्रथमयौवनान्वितां मंदवल्गुमृदुपीडित
स्तनाम् उत्स्तनीं समवलंब्य या रतिः सा न वा त्रिभुवनेस्ति मे मतिः ॥ कामिनीं मुद्गतमन्मथां तां च प्रथमयौवनान्विताम् अभिनवयौव
नोपेतां मंदमल्पवल्गु रम्यं मृदु मधुरं पीडितं स्तनम् शनैरालिंगितां सतीं मंदवल्गुमृदुपीडितः स्तनं शब्दं करोति तत्तथा कुर्वन् उत्स्तनीमुद्गत

स्तनाभ्युद्भिद्यमानकुचामेवंविधां स्त्रियं योषितां समवलंब्य परिष्वज्य या रतिर्भवति सुखं यादृशं संजायते स धातृभवने प्रजापतिगृहे ब्रह्मलोके
नास्ति न विद्यते समतिर्बुद्धिरेव मह्यम् मम अद्य इति मरुतां लोके येन तपसा ज्ञानेन यागादिना वा ब्रह्मलोकमासाद्यते तत्र किमनुभूयत इत्युक्तं तदाह ॥
तत्र देवमुनिसिद्धचारणैर्मान्यमानपितृसेव्यसेवनात् । धृतं धातृभवनेऽस्ति किं सुखं यद्रहः समवलंब्यनः स्त्रियाम् ॥ तत्र तस्मिन् धातृभ
वने ब्रह्मलोके देवासुरैर्मुनिभिर्महर्षिभिः सिद्धैः विद्याराधनेन ये सिद्धदेवयोनयः संपन्नः तैः तथा चारणैः नटनर्तकज्ञेयवाद्यज्ञैर्गंधर्वाप्सरो
भिः मान्यानां पूजनीयानां मानयितृणां पूजकानां सेव्यानां च सेवनादुपासनात्परतः अन्यत्किं सुखमस्त्येतत्त्वद्भूतं कथयत । तत्र सेवकैः से
व्या आराध्यंते मान्यमानपितृभिः पूज्यंते एतावानेव यद्रहो निर्जने सुरतसमये स्त्रियो योषितमवलंब्य परिष्वज्य नास्ति न सुखं विद्यते अपितु
सर्वं ब्रह्मलोकादत्यधिकं तत्र विद्यत इति । यद्येनं तैर्लौकिकैर्गणानाकार्यत्यतदाह ॥ ॥ आब्रह्मकीटान्तमिदं निबद्धं पुंस्त्रीप्रयोगेन जगत्स
मस्तम् । व्रीडा तु का यत्र चतुर्मुखत्वमीशोऽपि लोभाद्गमितो युवत्या ॥ इदं समस्तं निरवशेषं जगद्विश्वमाब्रह्मकीटान्तं क्रिमेः ब्रह्मणः पिता
महात्प्रभृति कीटान्तं यावत् स्त्रीप्रयोगेन स्त्रीपुरुषसंप्रयोगेन निबद्धं ग्रथितं पुंस्त्रीप्रयोगादृते नान्यत्किंचिद्दृश्यते । अत्र जगति [illegible] व्रीडाका
लज्जा पुरुषमात्रस्य यत्र न । तीव्रोऽपि महादेवोऽपि युवत्याः स्त्रियाः चतुर्मुखत्वं गमितः प्राप्तः अत्र पौराणिकी श्रुतिः यथा तिलोत्तमायाः प्रद[illegible]
णं क्रियमाणाया अतिलावण्योपेताया उमाया उत्संगस्थिताया क्रोधतया भगवता तद्रूपलंपटेन तदवलोकनाय चतसृषु दिक्षु मुखचतुष्टय
सृष्टमिति ॥ ॥ इति श्रीभट्टोत्पलविरचितायां संहिताविवृत्तौ भंतः पुरचिंतायां स्त्रीप्रशंसानामाध्यायः द्विसप्ततितमः ॥ ॥
७२ ॥ अथ सौभाग्यकरणं व्याख्यायते ॥ तत्रादावेव सुभगं पुरुषं प्रति विशेषमाह ॥ जात्यं मनोभवसुखं सुभगस्य सर्वमाभासमा
त्रमितरस्य मनोवियोगात् । चित्तेऽपि भाववति निद्दूरगतापि यं स्त्री गर्भं बिभर्ति सदृशं पुरुषस्य तस्य ॥ सुभगस्य स्त्रीवल्लभस्य पुरुषस्य सर्वं मनोभ
वः सुखम् कामजं सुखं जात्यं श्रेष्ठं जात्यमुचितं सर्वं सर्वस्यां नार्याम् यतः सुभगं पुरुषं संभोगे स्त्री निजहृदये आस्ते अन्यत्र मनो न नयति ततः स्त्री चित्ते

तस्योपरिरज्यते। इतरस्य दुर्भगस्य मनोवियोगश्चित्तस्याच्य त्रगमनादाभासमात्रम्। न जात्वयं स्त्रीमनोवियोगादन्यगतत्वान्मनसः यतोवक्ष्यति
मनोहि मूलं हरदग्धमूर्तेः स्त्रीमनः सुभगं प्रति याति सा च स्त्री दूरगताप्यस्मीपस्था अपि यं पुरुषं चित्तेन मनसा भावयति चिंतयति कामयते
तस्य पुरुषस्य सदृशं तदाकृतिं गर्भं बिभर्ति धारयति पुरुषस्यात्मा एव स्त्रीषु पुनर्जायते इत्येतत्प्रतिपादयितुमाह ॥ ॥ भक्ताकांडं पादप
स्योत्तमं यथा बीजं वा यथा नान्यतामेति यद्वत् एवं ह्यात्मा जायते स्त्रीषु भूयः कश्चित्तस्मिन्क्षेत्रयोगाद्विशेषः ॥ पादपस्य वृक्षस्य कांडं शाख
भक्त्वा उन्द्यां भूमावुत्तं रोपितं यथा नान्यथामेति स्वस्य चान्यत्वं नापद्यते। तस्मान्नात्मनि क्षेत्रयोगाद्धेतोः कश्चित्क्षेत्रे विचित्रभावो भवति। यत्क्षेत्रे बी
जमुप्यते तद्वशात्तस्यान्यत्वं तत्सदृशं किंचिद्भवतीत्येवं मात्रवशात्किंचिद्विशेषो भवति। दूरस्थस्य कथं कामं नसंभवतीत्येतदाह ॥ ॥पत
आत्मा संधत्ते मनसा मन इंद्रियेण स्वार्थेन चेंद्रियमिति क्रम एष दीर्घः योगोऽयमेव मनसः किमगम्यमस्ति यस्मिन्मनो व्रजति तत्र गतो नात्मा ॥
आत्मा कर्मात्मा चिद्रूपो मनसा चित्तेन संधत्ते गच्छति मनः चित्तमिंद्रियेण संधत्ते तत्रेंद्रियाणि दश पंच बुद्धीन्द्रियाणि पंच कर्मेंद्रियाणि श्रोत्रं त्व
चक्षुर्जिह्वा नासिकेति पंच बुद्धीन्द्रियाणि। उक्तं च। पायूपस्थं हस्तपादं वाचं चैवात्र पंचमी। पंच कर्मेंद्रियाण्याहुः बलं षष्ठानि तानि तु। श्रोत्रं त्व क्
चक्षुषी जिह्वा नासिका चेति पंचमी। पंच बुद्धीन्द्रियाण्याहुर्मनः षष्ठानि तानि तु। एवं मन इंद्रियेण संधत्ते इंद्रियः स्वार्थेनात्मीयार्थेनेंद्रियार्थे
न संधत्तेति योयस्येंद्रियस्य इंद्रियस्तेन संधत्त्यागच्छति क्रम एष शीघ्रस्तात्पर्यक्रमः आत्मा मनसा संयुज्यते मन इंद्रियेण। इंद्रियमर्थेन अनंतरमु
र्थः श्रोत्रादीनि बुद्धीन्द्रियाणि वागादीनि कर्मेंद्रियाणि अर्थाः शब्दादयः शब्दस्पर्शरसरूपगंधाः अनंतरमिंद्रियाख्यादितमर्थं मनः आत्मने नि
वेदयति आत्मार्थक्रियाकारितां तस्यसंपृक्त्वा मनसा आज्ञां ददाति कर्मेंद्रियाण्यादाने त्यागे वा विनियुंक्ते इत्यनेन प्रकारेण क्रम एष दी
र्घः क्रमः प्रक्रियैषा अवलंबिता योगः संबंधः अयमेव मनसः तस्य किमगम्यमस्ति अपितु सर्वत्रैव व्रजति यस्मिन्देशे मनो व्रजति तत्रा
यमात्मागमः ॥ एतदेव विशेषयन्नाह ॥ आत्मायमात्मनिगतो हृदयो निरुद्धो यास्योचलेन मनसा सतताभियोगात् यंयंवि

चिंतयतियातिसतन्मयत्वंयस्मादतः सुभगमेवगतायुवत्यः ॥ अयमात्माकर्मात्माचिद्रूपोजीवः आत्मनिपरमात्मनिगतः स्वसत्तायां
बोधरूपः स्थितः कर्त्ताज्ञाताचसंपन्नः क्वहृदयेसूत्स्थाने। तथाच। नाभेरूर्ध्वंवितस्तिंचकंठाधस्तात्षडंगुलम् हृदयंतद्विजानीयाद्विश्व
स्यायतनंमहत् इति। कीदृशः अतिसूक्ष्मोत्यंताल्पप्रमाणःसचग्राह्योविषयीकार्याचलेनास्थिरेणमनसाचित्तेनसततावियोगादवि
च्छेदाभ्यासात् यः पुरुषोयंवक्तृरूपंविचिंतयतिचित्तेनभावयतिसतन्मयत्वंयातितस्यएवस्वरूपतोयस्यसतन्मयः यस्मादेवमतोस्माद्धेतो
र्युवत्यस्त्रियः सुभगंपुरुषंप्रतिगताः प्राप्ताः सतताभ्यासादिति ॥ अथसुभगदुर्भगत्वस्यलक्षणमाह ॥ दाक्षिण्यमेकंसुभगत्व
हेतोर्विद्वेषणंतद्विपरीतचेष्टः मंत्रौषधाद्यैः कुहकाप्रयोगैर्भवंतिदोषाबहवोनशर्म ॥ दाक्षिण्यमानुकूल्यंचित्ताराधनमेकमेवसु
भगत्वहेतुर्वाल्लभ्यकारणम् स्त्रीणामानुकूल्याद्दुर्लभः पुमान्भवतितद्विपरीतचेष्टाविपर्ययानुचरणमनानुकूल्यंविद्वेषणंदौर्भाग्यकर
णंमंत्रौषधाद्यैः मंत्रैः वशीकरणमंत्रैरौषधैर्द्रव्यविशेषैः आदिग्रहणाद्भोजनपानलिंगलेपानुलेपनैरन्यैश्चोपतापकरैः कुहकप्रयोगैः
विस्मयोत्पादकैर्बहवाः प्रभूतादोषाः शरीरोपद्रवानशर्मश्रेयोभवति। तस्मादानुकूल्यमेकमेवसौभाग्यकरणंनान्यत्प्रयोगादि[illegible] ॥ ॥
अन्यदपिसौभाग्यकरणंकार्यमाह ॥ वाल्लभ्यमायातिविहायमानंदौर्भाग्यमासादयतेभिमानः कृच्छ्रेणसंसादयतेभिमानीकार्याणिपंक्ता
नवदन्प्रियाणि ॥ मानंगर्वंविहायत्यक्त्वापुरुषोजनस्यवाल्लभ्यंवल्लभत्वमायातिगच्छति। अभिमानोहंकारोगर्वः दौर्भाग्यंदुर्भगत्वमापा
दयतेप्रापयति यः चाभिमानीधार्मिष्टः सकृच्छ्रेणक्लेशेनकार्याणिसंसाधयतेनिवर्त्तयतिप्रियाणिप्रीतिवचनानिवदन्नभाषयन्यत्नेना
क्लेशेनकार्याणिसंसाधयतइति ॥ अन्यदप्याह ॥ तेजोनतद्यत्प्रियसाहसत्वंवाक्यंनचानिष्टमसत्प्रणीतम् कार्यस्यगत्वां
तमनुद्धतायेतेजस्विनस्तेनविकत्थनाये ॥ असमीक्षितानांकार्याणांकरणंसाहसंतस्यभावःसाहसत्वंप्रियम् यत्रवेस्तनिसाहसत्वं
नततेजः श्रृंगारोनतत्प्राणविनाशउत्पद्यते। यच्चवाक्यमननुकूलंमर्मस्पृक्च्चासत्प्रणीतमसद्भिर्दुष्टैः प्रणीतमुच्यतेनततेजः येजनाः

कार्यस्यकरणीयस्यवक्ता नोंतं परिसमाप्तिमपिगत्वातन्निर्वर्त्यानुद्धता अभिमानिनस्तेतेजस्विनः भयविकत्थनावाचाल्पानिरर्थकमसद्वाक्यं
जल्पंतितितेजस्विनमिति ॥ अथ्यदथाह ॥ यःसार्वजन्यंसुभगत्वमिच्छेद्गुणात्मसर्वस्यवदेत्परोक्षम् प्राप्नोतिदोषानसतोथनेकान्परस्य
योदोषकथांकरोति ॥ यःपुरुषःसार्वजन्यंसर्वजनानांसुभगत्वंवाल्लभ्यमिच्छेदभिलषेत् ससर्वस्यनिरवशेषस्यजनस्यपरोक्षमप्रत्यक्षं
गुणात्मकतिंवदेत्ब्रूयात् यःपुनःपरस्यसंबंधिनींदोषकथांकथांकरोतिसपुरुषःअसतोदुर्जनादनेकान्बहुप्रकारान्दोषान्प्राप्नोतिलभ्यते ।
किलसज्जनःज्ञातिशीलोभवति।दुर्जनःपरदोषैकपरायणोभवतीति ॥ अथ्यदथाह ॥ सर्वोपकारानुगतस्यलोकःसर्वोपकारानुगतोनरस्य
कृत्वोपकारंद्विषतांविपत्सुयाकीर्तिरल्पेननसाशुभेन ॥ सर्वेषामुपकारेअनुगतोनिरतःसर्वोपकारानुगतःतस्यसर्वोपकारानुगतस्यपुरुषस्य
सर्वोनिरवशेषोलोकःउपकारानुगतोभवति अत्युपकारःकरोतिद्विषतांशत्रूणांविपत्सुआपत्सूपकारमुपकृतिंकृत्वायाकीर्तिर्य[illegible]यक
तिलोकेसाल्पेनशुभेनपुण्येनभवतिबहुनाशुभेनभवतीत्यर्थः एवंसज्जनसर्वस्योपकारःकर्तव्यइतितात्पर्यार्थः ॥ ॥ अथदुर्जनंप्र[illegible]आह ॥
तृणैरिवाग्निःसुविवृद्धिमाकाद्यमानोपिगुणैरभ्युपैति। सकेवलंदुर्जनभावमेति हंतुंगुणान्वांछतियःपरस्य ॥ दुर्जनःसज्जनस्यगुणैराश्ला
घमानोपिसुतरामतिशयेनविवृद्धिमुपैतिवृद्धिंप्राप्नोति।यथातृणेनाछाद्यमानोग्निर्विवृद्धिंयाति यःपरस्यगुणान्हंतुंविनाशयितुंवांछतीच्छ
ति।सकेवलंदुर्जनभावंदौर्जन्यमेवप्राप्नोतिनमाधवोगुणविनाशोभवतितस्याधिकतरागुणाःप्रकाशत्वमायांति।यथातृणैरग्निःकेवलमे
वतृणानितत्रदस्येतेइति ॥ ॥ इतिभट्टोत्पलविरचितायांसंहिताविवृत्तौअंतःपुरचिंतायांसौभाग्यकरणंनामाध्यायस्त्रिसप्ततितमः ॥
७३ ॥ ॥ अथकांदर्पिकंव्याख्यायते ॥ तत्रादावेवप्रयोजनप्रदर्शनार्थमाह ॥ रक्तेधिकेस्त्रीपुरुषस्तुशुक्रेनपुंसकंशोणितशुक्र
साम्ये।यस्मादतःशुक्रविवृद्धिदानिनिषेवितव्यानिरसायनानि ॥ गर्भाधानकालेस्त्रीपुरुषयोःरक्तेशोणितेअधिकेसतिगर्भेस्त्रीभवतिशु
क्रेरेतस्यधिकेपुरुषोभवतिनरोवा।शोणितस्यरक्तस्यशुक्रस्यरेतसःसमतामेतुल्यत्वेनपुंसकंभवति।यस्मादेवमतोस्माद्धेतोःशुक्रविवृद्धिर्यानिरतसः

संवर्धनानि रासायनानि वृष्टिप्रयोगाः निषेवितव्यान्यपवर्गार्याणीति ॥ अथ कामस्य बंधनरज्जुमाह ॥ हर्म्यपृष्ठमुडुनाथरश्मयः सोत्पलं मधुमदालसा प्रि-
या। वल्लकी स्मरकथा रहः स्रजो वर्ग एष मदनस्य वागुरा ॥ हर्म्यपृष्ठं गृहपृष्ठं उडुनाथरश्मयः चंद्रकिरणाः सोत्पलं नीलोत्पलसहितं मधु मद्यम् मद्यग्रहण-
मुपलक्षणार्थम् मृद्वमधिकृत्येतदुक्तम् आसवादेरप्यदभिमतं मानम् प्रिया वल्लभा मदालसा मद्यपानेनालसा माद्वीवा वल्लकी वीणा मधुरकथाः स्मरकथाः
कामसंकथा रहः एकान्तो निर्जनं स्थानं स्रजः ताभिनिवेशश्च स्रक्माला एष वर्गः समूहो मदनस्य कामस्य वागुरा बंधनरज्जुः अनया सर्वस्यतदुति ॥ ॥
अथ शुक्रवृद्धियोगमाह ॥ माद्वीकधातुमधुपारतलोहचूर्णपथ्याशिलाजतुविडंगफलानि योज्यात् सैकानि विंशतिरहानि जरान्वितोपि सोऽशी-
तिकोपि रमयत्यबलां युवेव ॥ माद्वीकधातुः पाषाणमाक्षिकम् मधुमाक्षिकं क्षौद्रं पारतं प्रसिद्धं। लोहचूर्णं शस्त्रचूर्णम् पथ्या हरीतकी शि-
लाजतु प्रसिद्धः घृतमाज्यं एतानि माद्वीकवर्जं सर्वाणि सममात्राणि कार्याणि घृतमाक्षिकाभ्यां सममात्राभ्यां भावयित्वा गुलिका कार्या तानि योज्यात्
भक्षयेत् सैकानि विंशतिरहानि सैकेन वर्त्तते विंशतिरहानि दिनानि एकविंशतिर्दिनानीत्यर्थः यो[illegible]न्वितोपि जरायुक्तोऽपि अशीति-
कोपि अशीतिवर्षोपि अतिवृद्धोपि तथा भूतोप्यबलां स्त्रियं युवेव तरुणइव रमयति क्रीडयति ॥ अन्यदप्याह ॥ क्षीरं शृतं यः का[illegible]
मूलैः पिबेत्पयः स्त्रीषु रसो न्भ्युपैति। माषान्पयः सर्पिषि वा विपक्वान् ग्रासमात्रांश्च पयोनुमानात् ॥ यः कामी कपिकच्छमूलैः आत्मगुप्तामू-
लैः सह क्षीरं दुग्धं क्वथितं पिबेत् स स्त्रीषु विषये रुग्य मशक्ततां नाभ्युपैति नायाति क्षीरमेव निर्मथ्य यत् घृतमुत्पाद्यते तत्पयोघृतम् पयः
सर्पिषि पयोघृते माषान्विपक्वान् कृत्वा घट्ग्रासमात्रान्भुक्त्वा स एव ग्रासान्प्राश्यानुपश्चात् पयसः क्षीरस्य पानं कार्यम् तस्मात्पयोनुमानात्
स्त्रीषु क्षयं नाभ्युपैति ॥ अन्यदप्याह ॥ विदारिकायाः स्वरसेन चूर्णं मुहुर्मुहुर्भावितशोषितं च। शृतेन दुग्धेन सशर्करेण पिबेत्स यस्याः प्रमदाः
प्रभूताः ॥ विदारिका प्रसिद्धा। तस्याः चूर्णं स्वरसे नैव विदारिकारसेनैव मुहुर्मुहुः प्रतिक्षणं भावितं शोषितं मुहुर्मुहुः एतदुक्तं भवति। स्वरसेन
यावत्सनिपालनं भावयितुमायाति तेन भावयित्वा तापे शोषयेत् पुनः शुष्कं भावयित्वा शोषयेत् एवं च भूयो भूयः सप्तवारानित्यर्थः तस्य चूर्णं विसपत्र

कलहंकरोति ॥ अथसंग्रहणमाह ॥ लग्नेथवेदोर्भृगुभांशसंस्थोवेदिक्स्थितोथवदनाच्चरोति। दीप्तः सवेत्संग्रहणांकरोति, योऽन्योनुयायाद्दिदिग्निप्र
